श्री पाञ्चरात्र आगम संरक्षण विश्वस्त ग्रन्तमाला संख्या -१

SRI PANCHARATRA AGAMA SAMRAKSHANA TRUST PUBLICATION SERIES NO. -1




पराशर संहिता

PARĀŚARA SAṂHITĀ

(With Sanskrit Text & Tamil Translation)

PUBLISHED BY



SRI PANCHARATRA AGAMA SAMRAKSHANA TRUST,

SRIRANGAM - 620 006.

2000

FIRST EDITION : A.D. 2000
NO. OF COPIES: 1000
ISBN 81-87557-00-1
PRICE : Rs. 125/-

This book is published under the financial assistance of
TIRUMALA TIRUPATHI DEVASTHANAMS, TIRUPATI-517 501, ANDRA PRADESH.

For Copies apply to:

Thiruvellarai V. RAMASWAMY BHATTAR, B.E.,
MANAGING TRUSTEE,
SRI PANCHARATRA AGAMA SAMRAKSHANA TRUST,
No. 173/73, WEST CHITRA STREET,
SRIRANGAM,
TIRUCHIRAPPALLI DISTRICT,
TAMIL NADU - 620 006,
INDIA.
e-mail : ramaswamybhattar @ india.com

Printed at:

SRISRI PRESS,
No. 131/61, North Chitra Street,
Srirangam,
Tiruchirappalli District,
Tamilnadu - 620 006,
India.

श्रियै नमः

श्रीमते हयग्रीवाय नमः

पराशरसंहिता

अथ प्रथमोऽध्यायः

प्रपन्नलक्षणं सम्यग्वद मे मुनिसत्तम ।
मूलादिसर्वमन्त्राणां केशवादिमनोस्तथा ॥१॥
विष्णोर्नामसहस्त्रस्य मन्त्रन्यासादिलक्षणम् ।
तत्तन्मूर्तिप्रतिष्ठार्थं प्रपत्तिफलसिद्धये ॥२॥
सर्वेषां विष्णुसायुज्यसिद्धये च युगे युगे ।
विष्णुप्रतिष्ठासिद्ध्यर्थं विष्णुदीक्षादिसिद्धये ॥३॥

श्रीपराशरः

अथ वक्ष्ये विधानेन श्रुणुष्व सुतपोधन ।
पूर्वं तु विष्णुना प्रोक्तं प्रपन्नस्य च लक्षणम् ।
सर्वेषां विष्णुसायुज्यसिद्धये सर्वदा च तत् ॥४॥

मूर्तित्रयविभागः

विष्णुप्रतिष्ठासिद्ध्यर्थं नित्यार्चासिद्धये सदा ।
सहस्त्रनाममूर्तीनां मूलादीनां तथैव च ॥५॥
केशवाद्यादिमूर्तीनां मत्स्यादीनां विशेषतः ।
मन्त्रन्यासादिकं वक्ष्ये तत्तद्बिम्बादिलक्षणम् ॥६॥

प्रपन्नाचारः

विप्रादि सर्ववर्णानां आचारं श्रुतिचोदितम् ।
प्रपन्नानां सदाचारं वसिष्टाद्यैः कृतं च तत् ॥७॥
नित्य नैमित्तिकोक्ताद्यं आचारं सात्विकं तथा ।
ततः प्रपन्नविप्राणां सर्वेषां च महामुने ॥८॥
विष्ण्वर्चनादि दीक्षायां निषेकादि क्रियादिषु ।
अर्थपंचकसंज्ञाकं पंचसंस्कारमुत्तमम् ॥९॥
पंचकालविधानाक्तं सदाचारं सुसात्विकम् ।
यावज्जीवं प्रपन्नानां आकारत्रयलक्षणम् ॥१०॥
विष्णुसायुज्यसिद्ध्यर्थं कर्तव्यं सर्वदा मुने ।
तापादि पंचसंस्काराः प्रपन्नस्य विशेषतः ॥११॥
प्रपत्त्यंगानि विज्ञेया वसिष्टाद्यैरनुष्ठिताः ।
सर्वदा सत्प्रपन्नानां तृप्तानां वेदमार्गिणाम् ॥१२॥
तापादि पंचसंस्काराः प्रपत्यंगानि सर्वदा ।
देवादीनां ऋषीणां च भवेत् सत्यं चतुर्मुख ॥१३॥
मत्सायुज्यादि सिद्ध्यर्थं सर्वेषां च युगे युगे।
आर्तानां अंगवैकल्ये मत्सायुज्यं भजेत्तदा ॥१४॥
प्रपत्त्यंगानि विज्ञेयमर्थपंचकमाश्रितः ।
पश्चात् कुर्यात्तदंगानि पंचसंस्कारमुत्तमम् ॥१५॥

मन्त्र पंचांगम्

पंचकालविधानं च पंचांगानीति तद्विदुः।
मन्त्रपंचांगममलं प्रपन्नस्य चतुर्मुख ॥१६॥

प्रपत्त्यंगानि विधिवत् यावज्जीवं विदिर्भवेत् ।
त्रिकाल पूजा जापश्च तर्पणं होम एव च ॥१७॥
भोजनं ब्राह्मणानां च मन्त्रपंचांगमुच्यते ।
एवं न्यासविधिं कृत्वा पंचांगादि समाचरेत् ॥१८॥

चक्राद्यायुधपंचकधारणकालः

प्रायश्चित्ते जपे चैव विष्णोराराधने तथा ।
विष्ण्वर्चनादि दीक्षायां चक्राद्यायुधपंचकम् ॥१९॥
तप्तं कृत्वा चक्रशंखे धारयेत् बाहुमूलयोः ।
पश्चात् दद्यान्मन्त्रदीक्षां आचार्यो मन्मनाश्शुचिः ॥२०॥

आचार्यशिष्यमन्त्रलक्षणम्

कौपीनं कटीसूत्रं च सुधौतं चोत्तरीयकम् ।
शिखाछिद्रोर्ध्वपुण्ड्रं च आचार्यस्य च लक्षणम् ।
शिष्यस्य लक्षणं चैव मन्त्रकस्य च लक्षणम्॥२१॥

अनर्चकः

पंचसंस्काररहितः शिखाकौपीनवर्जितः ।
नित्यकर्मादिरहित अनर्चक इति स्मृतः ।
प्रपत्तिरहितस्सोऽपि अधमश्च भवेन्मुने ॥२२॥
अनर्चकद्विजानीतं तीर्थपानं सुरासमम् ।
प्रसादंमाम्सतुल्यं च चन्दनं रुधिरं भवेत् ॥२३॥

संकरः

अनर्चकस्त्यजेत् सम्यक् पङ्क्तिपाकादिकर्मसु ।
पाकशय्यासनं पङ्क्ति भाण्ड पक्वान्नमिश्रणम् ॥२४॥
याजनाध्यापने दानं तथैव सहभोजनम् ।
नवधा संकरः प्रोक्तो नकुर्याच्चाधमैस्सह ॥२५॥

अधमः

सात्विकानि पुराणानि यो ब्रुवन् याचते धनम् ।
स याति नरकं घोरं अधमस्स भवेत् ध्रुवम् ॥२६॥
प्रपन्नः परमैकान्ती वैष्णवं शास्त्रं अभ्यसेत् ।
यावज्जीवं विशेषेण वदेत्भक्त्या सदा द्विजः ॥२७॥

मायावादादिनिषेधः

धर्मादि कर्म सिद्ध्यर्थं विष्णुसायुज्यहेतवे ।
माया वादं बौद्धशास्त्रं यो वदेत् वैष्णवोत्तमः ॥२८॥
सयाति नरकं घोरं रौरवं रोमसंख्यया ।
स पुनर्वैष्णवो भूत्वा याति विष्णोः परं पदम् ॥२९॥
प्रपन्नः परमैकान्ती श्मश्रुधारी भवेद्यदि ।
चण्डाळवत् त्यजेत् तं वै सर्वदा कमलासन ॥३०॥
वर्जयेत् विधवात्तान्नं अनर्चकहुतं तथा ।
अधमान्नं तथा सम्यक् वर्जयेत् सर्वकर्मसु ॥३१॥

पाषण्डि लक्षणम्

माया वादं बौद्धशास्त्रं यो वदेत् प्रत्यहं स्मरेत् ।
स पाषण्डीति विज्ञेयस्सर्वकर्मबहिष्कृतः ॥३२॥

वैष्णवशास्त्राभ्यासः

तस्मात् सर्वप्रयत्नेन वैष्णवं शास्त्रमुत्तमम् ।
पठेत् वदेत् सदा ध्यायेत् प्रपत्तिफलसिद्धये ॥३३॥

वैष्णवान्नग्रहणम्

वैष्णवान्नं सदाऽश्नीयात् विष्णुसायुज्यहेतवे ।
वैष्णवान्नं त्यजेत् यो वै स याति नरकं ध्रुवम् ॥३४॥

प्रपन्नैस्त्याज्यम्

सदैव विष्णुशुश्रूषां गुरुसेवां तथैव च ।
सदा वैष्णव बिम्बार्चां कुर्यात्मोक्षविचिन्तकः ॥३५॥
भगवत् सात्विकादन्यत् रुद्राद्या देवतान्तराः ।
मन्त्रान्तराश्च तन्मन्त्र श्रौतस्मार्तविगर्हितः ॥३६॥

साधनान्तरम्

ईषणात्रयकं सम्यक् कामाद्याश्च ग्रहादयः ।
स्वदेह रक्षणं पौष्य साधनान्तरमुच्यते ॥३७॥
प्रयोजनान्तरास्तद्वत् स्वदेहस्य प्रयोजनम् ।
एतच्चतुर्विधंत्याज्यं प्रपन्नस्य विशेषतः ॥३८॥

आचार्यपरित्यागः

अर्थकामातुरं क्रूरं क्रोधलोभमदान्वितम् ।
मलिनं स्वगुरुं सद्यो मोक्षार्थी शूद्रवत् त्यजेत् ॥३९॥
एतादृशं प्रपन्नं च वैष्णवं सर्वदा त्यजेत् ।
दारपुत्रवियोगार्तो शोकं कुर्वन् स्वबान्धवैः ।
प्रपन्नो वैष्णवो यो हि सचण्डालो भवेत् ध्रुवम् ॥४०॥

शिशुभिस्सह भुक्तिनिषेधः

यःकुर्यात् कामतोवापि शिशुभिस्सह भोजनम् ।
स जीवन्नेव चण्डालस्स याति नरकं ध्रुवम् ॥४१॥

देवलकः

परार्थं पूजयेत् विष्णुं वित्तार्थी यो दिनत्रयम् ।
स वै देवलको नाम सर्वकर्मबहिष्कृतः ॥४२॥
कुक्षिंभरार्थं विष्णुं धनार्थेभ्यर्चयेत् धनम् ।
स वै देवलको नाम सर्वकर्मबहिष्कृतः ॥४३॥

श्वादिदर्शन निषेधः

असत् दृष्टिंपरिहरेत् अच्युतस्य निवेदने ।
प्रपन्नः परमैकान्ती भोजने पितृकर्मसु ॥४४॥
श्वानवायसचण्डाल दृष्टिदोषं परित्यजेत् ।
योऽश्नीयात् कामतो मोहात् भुक्त्वा वत्सरपंचकम् ।
रौरवं नरकं गत्वा स पश्चात् मुक्तिभाक् भवेत् ॥४५॥

अवैष्णवकृततक्रनिषेधः

अवैष्णवकृतं तक्रं प्रपन्नो मद्यवत् त्यजेत् ।
अवैष्णवान्नं तच्छेषं वैष्णवो माम्सवत् त्यजेत् ॥४६॥
प्रपन्नः परमैकान्ती सर्वदा कमलासन ।
तस्मात् सर्वप्रयत्नेन प्रपत्तेर्वृत्तिमाश्रयेत् ॥४७॥

इति श्रीपांचरात्रे पराशरसंहितायां विशिष्टपरमधर्मशास्त्रे प्रथमोऽध्यायः

अथ द्विदीयोऽध्यायः

प्रपन्नवृत्तिमाचारं वद मे पुरुषोत्तम ।
सर्वेषां मुक्तिसिद्ध्यर्थं प्रपत्तिफलसिद्धये ॥१॥

श्रीभगवानुवाच–

अथ वक्ष्ये विधानेन सर्वेषां सुलभं सदा ।
प्रपन्नवृत्तिमाचारं प्रपत्तिफलसिद्धये ॥२॥
प्रपन्नः परमैकान्ती सर्वदा कमलासन ।
निषेकादिक्रियास्सर्वा वैष्णवश्रुतिमार्गतः ॥३॥

नवग्रहपूजादिनिषेधः

सर्वदा ब्रह्ममेधान्तं कुर्यादेव न संशयः ।
रोगादौ प्रथमार्ते च निषेकादिक्रियादिषु ॥४॥

नवग्रहजपं होमं पूजनं वर्जयेत् सदा ।
पुत्रोत्पत्ति मुहूर्ते वै ब्राह्मणः स द्विजोत्तमः ॥५॥

जातकर्म

तापसंस्कारविधिना चक्रं शंखं सदा शुचिः ।
कृत्वा तप्तं लघुतरं सार्द्रकं श्वेतमृत्स्नया ॥६॥
पिता वा गुरुशिष्यो वा चक्रशंखाख्य मन्त्रवित् ।
दक्षिणे तु भुजे चक्रं शंखं वामे भुजे न्यसेत् ॥७॥
अर्धचन्द्राकृतिं सम्यक् ललाटे श्वेतमृत्स्नया ।
ऊर्ध्वपुण्ड्रं तथा कृत्वा जातकर्म समाचरेत् ॥८॥
एतत् कर्म न कुर्यात् यस्तच्छिशुं शूद्रवत् त्यजेत् ।
चक्रादीन्धारयेदेवं तप्तं कृत्वाथ पंचकम् ॥९॥

नामकरणम्

पिता वा नामकरणे तद्वच्चक्रादिधारणम् ।
कृत्वाथ नामकरणं भगवद्दास्यपूर्वकम् ॥१०॥
सूत्रस्मृतिविधानेन नामकर्म समाचरेत् ।

अन्नप्राशनम्

अन्नप्राशनकाले तु तद्वच्चक्रादिधारणम् ॥११॥
कृत्वा शिशोः पिता वाथ शुचिमार्गेण सद्द्विजः ।
कृत्वान्नप्राशनं कर्म मन्त्रोक्तविधिना द्विज ॥१२॥

चौळम्

चौळकर्मदिने सम्यक् तप्तचक्रादिधारणम् ।
कृत्वा श्रुतिविधानेन चौळकर्म समाचरेत् ॥१३॥

शिखापरिमाणम्

द्विजधर्मादिसिद्ध्यर्थं प्राप्तिफलसिद्धये ।
मत्सायुज्यादिसिद्ध्यर्थं शिखैकां धारयेत् द्विजः ॥१४॥
शतानां सप्ततिगुणमष्टोत्तरमथापि वा ।
केशानामपि संख्यानां शिखैका परिकीर्तिता ॥१५॥
शिखैकांगुळमात्रं स्यात् द्विजानां सर्वदा द्विज ।
मध्यमं मध्यमांगुष्ट पर्वमंगुलमिष्यते ॥१६॥

ब्रह्मचार्यादीनां क्षौरनियमः

कक्षोपस्थशिखावर्जं वपनं सर्वदा भवेत् ।
चौळेतथा ब्रह्मचर्ये सन्यासीषु विशेषतः ॥१७॥
गंगायां भास्करक्षेत्रे मातापित्रोर्गुरोर्मृतै ।
आधानकाले सोमे च वपनं सप्तसु स्मृतम् ॥१८॥
शिखाभ्रूकोष्टवर्जं स्यात् गृहस्थानां तु सर्वदा ।
आधाने यज्ञकाले च सर्वांग वपनं विदुः ॥१९॥
शिशूनां ब्रह्मचारीणां मासे मासे विधीयते ।
मासि मासि गृहस्थानां पक्षे पक्षे च यज्वनाम् ॥२०॥
ऋतादृते यतीनां च वपनं मुनिसम्मतम् ।

शिखाहीन शिशुं सम्यक् तथा माणवकं ततः ।
तद्वद्द्विजगृहस्थांश्च यतिं चण्डाळवत् त्यजेत् ॥२१॥

प्रपन्नानां स्मश्रुधारण निषेधः

प्रपन्नो वैष्णवो यो हि श्मश्रुधारी भवेद्यदि ।
चण्डाळपतितस्स स्यात् सर्वकर्मबहि ष्कृतः ॥२२॥
सर्वान् केशांश्च यो धृत्वा श्मश्रुकृन्तनमाचरेत् ।
प्रपन्नो वैष्णवो विद्यात् स चण्डाळो भवेत् धृवम् ॥२३॥
प्रपन्नस्तं त्यजेत् सम्यक् पङ्क्तिपाकादि कर्मसु ।
विष्णवर्चने पितृकार्ये तं त्यजेत् अन्त्यजातिवत् ॥२४॥
मौंजीबन्धनकाले तु पंचसंस्कारमार्गतः ।
कुर्याद्गुरुः पितावाथ तप्तचक्रादिधारणम् ॥२५॥
द्विजः प्रपन्नो वा सम्यक् चक्रादीन् धारयेत् तदा ।
द्विजकर्मादिसिद्ध्यर्थं विष्णुसायुज्य हेतवे ॥२६॥

ऊर्ध्वपुण्ड्र लक्षणम्

सच्छिद्रमूर्ध्वपुण्ड्रं च धारयेत् श्वेतमृत्स्नया ।
पार्श्वे सांगुलमात्रस्तु मध्ये छिद्रं प्रकल्पयेत् ।
नासादिकेशपर्यन्तं ऊर्ध्वपुण्ड्रस्य लक्षणम् ॥२७॥
ऊर्ध्वपुण्ड्रस्यमध्ये तु हरिद्राचूर्णमुत्तमम् ।
लक्ष्मीनिवाससिद्ध्यर्थं ललाटे धारयेत् हरेः ॥२८॥
सच्छिद्रं धारयेत् सम्यक् सुश्वेतं गोपिचन्दनम् ।
अन्यथा धारयेद्यो वै स याति नरकं ध्रुवम् ॥२९॥

ततः कुर्वीत पुण्याहं मौंजीबन्धादिकं तथा ।
ब्रह्मचार्यस्य पोशान इत्यक्त्वा वै गुरुश्शुचिः ॥३०॥
भगवद्दास्यनामादि दद्यात् सम्यक् विशेषतः ।
जनार्धनः पितृरूपि तस्योच्छिष्टं च पैतृके ॥३१॥
दद्याद्वै पितृमुक्त्यर्थं भगवद्धास्यसिद्धये ।
त्वयोपभुक्त स्त्रक्गन्धवासोऽलंकारचर्चिताः ॥३२॥
उच्चिष्ट भोजिनो दासाः तव मायां जयेम वै ।
तस्मात् दद्यात् दास्यनाम विष्णुसाजुयहेतवे ॥३३॥

समूलमन्त्रगायत्रीजपः

गायत्र्या उपदेशो वै न्यासध्यानादि संयुतः ।
श्रीमन्नारायणमनुं वदेत् अष्टाक्षरं तथा ॥३४॥
अष्टाक्षरं च गायत्री गायत्रोग्निरिति स्मृतः ।
ओमिति ब्रह्मयुक्तस्तदे[illegible]मा ॥३५॥
अग्निरग्रे प्रथमो देवतानाम् ।
सं[illegible]ो विष्णुरासीत् ।
पवित्रमित्यग्निरिति अग्निर्वै सहस्त्र आसीत् ॥३६॥
नारायणपरं ब्रह्मतदिवोमिति तत् श्रुतिः ।
चतुर्तिसत्यक्षरा गायत्री गायत्रीब्रह्मवर्चसमिति श्रुतिः ॥३७॥
नारायणमनोरर्थं तत्सवितुरिति श्रुतिः ।
एतत् त्रिपादा गायत्री तदष्टाक्षरसंभवा ।
चतुर्थपादागायत्री तदष्टाक्षर उच्यते ॥३८॥

तदेवैषागायत्री सर्वेषां मुक्तिदा भवेत् ।
तस्मात् सर्वप्रयत्नेन मूलमन्त्रं वदेत् तदा ॥३९॥
अष्टाक्षरस्सदा सम्यक् मालामन्त्र इति स्मृतः ।
गायत्री मन्त्रशुद्ध्यर्थं नित्यकर्मादि सिद्धये ॥४०॥
गायत्रीजपकाले तु अर्घ्यकाले विशेषतः ।
अष्टाक्षरेण सहितां गायत्रीं उच्चरेत् सदा ॥४१॥

द्वयोच्चारणविधिः

द्वयमष्टाक्षरार्थस्स्यात् पंचविंशाक्षरो मनुः ।
चतुर्विंशति गायत्री पंचविंशाक्षरा भवेत् ॥४२॥
तच्छब्दवाचकःश्रीमान् इति वेदः प्रपंचतः ।
द्वयं सदा जपेत् ब्रह्मन् मत्सायुज्यदिसिद्धये ॥४३॥
ब्रह्मचारी गृहस्थस्च वानप्रस्थो यतिर्व्रती ।
सत्यं सत्यं गु[illegible]ं इदमेव सुनिश्चितम् ॥४४॥
गायत्र्या उपदेशे च वदेत् द्वयमनुत्तमम् ।
गायत्रींमूलमन्त्रांश्च द्वयं गुरुपरम्पराम् ॥४५॥
न्यासध्यानादि विहितं शोषणादि विधानतः ।
पंचकालविधानं च नित्यनैमित्तिकादिकम् ॥४६॥
पंचरात्रोक्तदीक्षादि तस्यैव च विधानतः ।
नृसिंहरामकृष्णादि मनुनर्चाविधिस्तथा ॥४७॥
उपदिश्य तथा सम्यक् विष्णुयागं सुसात्विकम् ।
पंचसंस्कारममलं एतत्दृष्ट्वा तदा गुरुः ॥४८॥

नित्यनैमित्तिके सम्यक् पश्चात् तद्वद्दुमुत्तमम् ।
नियोजयेत् प्रपन्नं च पङ्क्ति पाकादिकर्मसु ॥४९॥

अधमः

तत्तत्कर्मविहीनो यस्सोऽधमः पतितो भवेत् ।
वर्जयेत्तं प्रपन्नं च मुखे स्मशृवादि धारिणम् ॥५०॥
प्रपन्नवैष्णवं विप्रं पंचसंस्कारवर्जितम् ।
चण्डाळवत् त्यजेत् सम्यक् मुखे श्मश्रुधरं सदा ॥५१॥
निषेकमौंजीपर्यन्तं एतत् कर्म समाचरेत् ।

वर्ज्यानि

वाणिज्यं गणिकत्वं च वैद्यं कुर्याच्च वैष्णवः ॥५२॥
प्रपन्नवृत्तियुक्तोऽपि स याति नरकं ध्रुवम् ।
स जीवन्नेव चण्डाळः सर्वकर्मबहिष्कृतः ।
तस्मात् सर्वप्रयत्नेन वैष्णवीं वृत्तिमाश्रयेत् ॥५३॥
आचार्यादिकरक्षादौ विष्णवर्चादि रक्षणे ।
प्रपन्नः परमैकान्ती ब्रह्मचारी यतिस्सदा ।
प्रपन्नवृत्तिममलां आचारान् वेदमार्गतः ।

प्रपन्नैः कर्तव्यानि

प्रतिग्रहं राजसेवां धनधान्यादि संग्रहम् ॥५४॥
कृषिगोरक्षवाणिज्यगणिकं वैद्यमुत्तमम् ।

यतिभिः कर्तव्यानि

स्मरन् द्वयार्थं अमलं कुर्यादौषधपानवत् ॥५५॥
देवविप्राधिकारे वै यतीनां सद्विधिर्भवेत् ।
वेदान्तश्रवणं पाठ्यं व्याख्येयं वैष्णवं सदा ॥५६॥
देवद्विजाधिकारं वै गृहस्थस्तु न कारयेत् ।
अन्यदा यःकरोत्येवं स याति नरकं ध्रुवम् ॥५७॥
तस्यनिष्पतितं कर्म तस्यायुश्श्रीश्च नश्यतिः ।
माठपत्यं यतिः कुर्यात् विष्णुधर्माभिवृद्धये ॥५८॥
विष्णोर्नित्योत्सवार्थं च वेदान्तस्थापनाय च ।
अन्यथा यःकरोत्येवं स याति नरकं ध्रुवम् ॥५९॥
मयोक्तं वैदिकं मार्गं [illegible]स्सदा ।
यावच्छरीरपातान्तं पुत्रोत्पत्यादिकर्मसु ॥६०॥
प्रपन्न[illegible]त्तिमेतद्वा आचरेद्वैष्णवोत्तमः
प्रपन्न[illegible]त्तिस्खालित्ये पुन[illegible] आचरेत् ॥६१॥
ततः कुर्याद्विवाहादीन् ब्रह्ममेधान्तमुत्तमम् ।
श्रुतिस्मृतिविधानेन प्रपन्नस्त्वाच[illegible]त् सदा ॥६३॥

प्रपन्नैस्त्या[illegible]ानि

कुक्षिंभरार्थं द्रव्यादीन् तच्छास्त्रं योऽब्रवीत् द्विजः ।
[illegible] गृहिणींमोहात् स चण्ड[illegible] भवेत् ध्रुवम् ॥६४॥
प्रपन्न[illegible] त्यजेत् सम्यक् नित्यनैमित्तिकादिषु ।
मदर्थं मत्प्रसादं च तद्वा यो याचयेत् धनम् ॥६५॥

स जीवन्नेव चण्डालस्स वै सन्मातृविक्रयी ।
स्वभार्याविक्रयी सोऽपि स याति नरकं ध्रुवम् ॥६६॥
कृत्वा तापादि संस्कारान् धनार्थी याचयेत् गुरुः ।
स वै चण्डाळ इत्युक्तः पत्नीविक्रयी च सः ॥३७॥
उक्त्वा च देवमन्त्रादीन् नित्यनैमित्तिकादिषु ।
विष्णुगानादिकं तद्वत् प्रायश्चित्तादि कर्मसु ॥३८॥
धनादीन् याचयेद्योऽसौ स पत्नीविक्रयी सदा ।
स याति नरकं घोरं तस्यायुश्श्रीश्च नश्यति ॥६९॥

परमैकान्ति लक्षणम्

प्रपन्नो वा यदि श्रेष्ठ एतदुक्तविधानतः ।
निषेकब्रह्ममेधान्तं पंचसंस्कारपूर्वकम् ॥७०॥
प्रपन्नवृत्तिं आचारं स्वयंव्यक्तस्थलादिषु ।
अग्रहारे पट्टणे वा गृहग्रामार्चनादिषु ॥७१॥
आचरेद्योथवा विप्रस्स गुरुर्वैष्णवश्शुचिः ।
प्रपन्नः परमैकान्ती स द्विजो ब्राह्मणोत्तमः ॥७२॥
सत्यं सत्यं पुनस्सत्यं इदमेव चतुर्मुख ।
आपस्तम्भो याज्ञवल्क्यस्तथा वाजसनेयकः ॥७३॥
बोधायनाद्यास्सर्वेपि तथा वैखानसस्तथा ।
सागमाः पंचरात्रज्ञास्तथा वा आश्वलायनः ॥७४॥
एतदाचार विधिना द्विजाद्याःकुर्वतां सदा ।
प्रपन्नवृत्तिमाश्रित्य मत्सायुज्यादि हेतवे ॥७५॥

मन्मना भगवद्भक्तो मद्याजी मामनुस्मरेत् ।
तमैव वैष्णवं सत्यं प्रतिजाने प्रियो हि मे ॥७६॥
सर्वधर्मान् परित्यज्य सर्वकर्मफलानि च ।
शरणं मां प्रपद्यस्व सर्वबन्ध विमुक्तये ॥७७॥
मत्सायुज्यादि सिद्ध्यर्थं धर्ममोक्षादिसिद्धये ।
एतच्छास्त्रं वेदमार्गं सर्वेषां मुक्तिदं भवेत् ॥७८॥

इति श्रीपांचरात्रे पराशरसंहितायां विशिष्टपरमधर्मशास्त्रे द्वितीयोऽध्यायः

अथ तृतीयोऽध्यायः

ब्रह्मोवाच -

वासुदेव जगन्नाथ वदमे भक्तवत्सल ।
प्रपन्नस्य विशेषेण नित्याचारादिकं क्रमात् ॥१॥

नित्याचारः

श्रीभगवानुवाच–

नित्यं नैमित्तिकाचारं प्रपन्नस्योच्यते मया ।
पंचकालविधानेन श्रुतिधर्मानुसारतः ॥२॥
प्रातस्संध्यामुपासीत अर्घ्यान्तं स द्विजः शुचिः ।

मूलेन गायत्रीजपः

मूलेन जप्त्वा गायत्रीं तिष्ठोदासूर्यदर्शनात् ॥३॥

उपस्थानं ततः कुर्यादभिवादनपूर्वकम् ।
सूर्यनारायणं दृष्ट्वा कुर्यादौपासनं शुचिः ॥४॥
षट्पंचाशदुषःकाल सप्तपंचाशदारुणः ।
अष्टपंच भवेत् प्रातः शेषस्सूर्योदयस्मृतः ॥५॥
उत्तमा तारकोपेता। मध्यमा लुप्ततारका ।
अधमासूर्यसहिता इति वेदे प्रपंचिता ॥६॥
पंचकालपरास्सर्वे सर्वे च भगवन्नयाः ।
नान्यं यजेत ध्यायेत नान्यं नारायणात्परः ॥७॥
ते यान्ति वैष्णवं स्थानं पुनरावृत्तिवर्जितम् ।

पंचकालः

आद्यं कर्माभिगमनं उपादानमतःपरं ॥८॥
इज्याथ पश्चात् स्वाध्यायस्ततोयोगस्ततः परम् ।
पंचैते विषयास्तेषां कालाः पंचैव ते क्रमात् ॥९॥

श्रुतिमार्गेणपूजनम्

कल्याणाचरणान्तं यत् कर्मजातं चतुर्मुख ।
श्रुतिसेवा द्विजातीनां निशश्रेयसकरीपरा ॥१०॥
यतो वै श्रुतिमन्त्रेण नित्यमाराधयन् हरिम् ।
कैवल्यं परमं प्राप्य नभूयस्संसरेदिह ॥११॥
स एव श्रुतिमन्त्रस्स्यात् वेदस्वर विवर्जितः ।
तांत्रिकं मन्त्र इत्युक्तं तदेव श्रुतिचोदितम् ॥२२॥
श्रुत्यादीनां च सर्वेषां तांत्रिकं मनुमुच्चरेत् ।
विप्राणां तांत्रिकं मन्त्रं आपत्काले विधिर्भवेत् ॥२३॥

प्रातस्सूर्योदयात्पूर्वं घटिकात्रयमात्रके ।
प्रपन्नः प्राङ्मुखोत्थाय सम्यक् ज्ञानेन सादरम् ॥१४॥
प्रक्षाळ्यकरपादाश्च गण्डूषाचमनं चरेत् ।
स्थित्वैकान्ती शुचौ देशे कुर्यात् गुर्वादिकीर्तनम् ॥१५॥

नामस्मरणम्

श्रीमन्नारायणस्यैव कीर्तनं भाषयापि वा ।
प्रपत्या मनसा वाचा गृहीभिक्षुश्च कारयेत् ॥१६॥
विष्णुसायुज्ययोगं च ज्ञात्वा गुर्वाज्ञया तदा ।
शेष[illegible]रेण जीवात्मपरमात्मनोः ॥१७॥
योग[illegible]स्यात् राजयोगस्स उच्यते ।
एतद्योगविधिं ज्ञात्वा विष्णोर्दास्यं समाचरेत् ॥१८॥
कर्मणा मनसा वाचा यावज्जीवं तु सर्वदा ।
इति संचिन्त्य यः पश्चात् बुद्धिमान् वैष्[illegible]त्तमः ॥१९॥
शुभे स[illegible] दण्डे पूर्वेद्युश्च सदा शुचिः ।
कौपीनं [illegible] बद्धा दण्डे प्रयत्नतः ॥२०॥
तद्दण्डं च करे धृत्वा [illegible] कुशादिकम् ।
मृत्स्नां शौचादि शुद्ध्यर्थं श्रीमृत्स्नाद्यां च पेटि[illegible] ॥२१॥
नदीं तडाकं वा गच्छेत् कीर्तयन् [illegible]म् ।
शुचौ देशे नदीतीरे सर्वं निक्षिप्य मन्त्रवित् ॥२२॥

विण्मूत्रोत्सर्जनविधिः

आपादपानस्नानार्थं त[illegible]त्स्नां तु त्रिधाक्षिपेत् ।
[illegible]णपर्णोपरिततो दुर्भूमौ निर्जने भुवि ॥२३॥

धृत्वा कर्णे य ।सूत्रं त ...पुरीषके ।
संध्ययो ।भयोरह्नि कुर्यादेव उदङ्मुखः ।।२४।।
स्यात् दक्षिणामुखं रात्रौ ... ...त् ।
गुदे मृत्स्ना त्रयास्त्र... द्यालिंगे तु षोडश ।।२५।।
...त्तिकां दद्यात् पा...योरुभयोस्तदा ।
दद्यात् करार्धपर्यन्तं मृत्भि ...म्यक् त्रिवारकम् ।।२६।।

शौचविधिः

शौचार्धभागकं सम्यक् द्वितीयं करपा...योः ।
तृतीयभागमृत्स्नां वै स्नानार्थं योजयेच्छुचिः ।।२७।।
कृत्वाद्वादशगण्डूषं यज्ञसूत्रं सुधारयेत् ।

दन्तधावनविधिः

तृणपर्णैस्सदा कुर्यात् दन्तधावनमादितः ।।२८।।
निम्बकाष्टेन वा कुर्यात् जिह्वा निर्लेखनं ततः ।
वक्त्र जिह्वादि शुद्ध्यर्थं नित्य नैमित्तिकादिषु ।।२९।।
त्रिंशद्गण्डूषणं कुर्यात् वक्त्रं संशोध्य सद्विजः ।
मुखप्रक्षाळनं कुर्यात् द्विनेत्राग्रान् विशोध्य च ।।३०।।
त्रिराचम्य विधानेन केशवाद्यादि नामभिः ।
प्राणायामत्रयं कुर्यात् सव्याहृतिविधानतः ।।३१।।

स्नान संकल्पः

विष्ण्वाचार्यादिकैंकर्यं शुद्ध्यर्थं चाज्ञया हरेः ।
करिष्ये स्नानमित्युक्त्वा करे धार्यं पवित्रकम् ।।३२।।

पवित्रलक्षणम्

कुशेन वा सुवर्णेन पवित्रं धारयेत् शुचिः ।
अंगुल्यग्रेप्यनायुष्यमंगुल्यादौ तपः क्षयः ॥३३॥
अनामिका मध्यपर्वे पवित्रं धारयेत् द्विजः ।
अग्रं तु चतुरंगुल्यं ग्रन्थिरेकांगुली भवेत् ॥३४॥
द्वयंगुलं वलयं चैव पवित्रस्य च लक्षणम् ।

स्नानविधिः

त्रिभागमृत्स्नां मूलेन अंगं कृत्वानुलेपयेत् ॥३५॥
शरीरे लेपयित्वाथ स्नानं कृत्वा द्वयेन वै ।
त्रिधा वामकरे मृत्स्नां कृत्वा मालेन मन्त्रयेत् ॥३६॥
दद्यादेवं तीर्थपीठे एकं दिग्बन्धनाय च ।
स्वदेहे लेपनं कुर्यात् तृतीयं भागमब्जज ॥३७॥
अघमर्षणसूक्तेन पुंसूक्तेन हरिं स्मरन् ।
मूलेन मन्त्ररत्नेन स्नानं कुर्यादतन्द्रिरितः ॥३८॥
विष्णुपादक्षाळितांतांगंगां तद्विरजाजलम् ।
सरिद्वरां च कावेरीं चंद्रपुष्करिणीजलम् ॥३९॥
गुरुपादोदकं तद्वत् गुरुसाम्याधिकं तथा ।
स्मृत्वा स्नानं प्रकुर्वीत इन्द्रध्युम्नाख्य तीर्थकम् ॥४०॥
अष्टाविंशतिवारं वा तर्पणं दशद्वादशषोडश ।
स्थित्वा तज्जलमध्ये वै मूलमन्त्रं द्वयंतदा ॥४१॥
जपेदष्टोत्तरशतमष्टोत्तरदशंतथा ।
देवानृषीन् पितृन् सम्यक् पार्षदांतांश्च तर्पयेत् ॥४२॥

कौपीनादिवस्त्रधारणम्

नदीतीरं [illegible]त्य मौनेन [illegible]यमुच्चरन् ।
कौपीनं धौतमुत्तर्यं सुश्वेतं धारयेत् ततः ॥४३॥
कार्पासं पट्टवस्त्रं च धारयेदथकर्पटम् ।
प्रक्षाळ्य पादावाचम्य शुद्धपात्रे जलं हरेत् ॥४४॥

पुण्ड्रधारणम्

बद्ध्वासनं शुचौ देशे स्थित्वा शुद्धासने तदा ।
धारयेत् प्राङ्मुखो भूत्वा श्रीमृत्स्नाद्यादि पेटिकम् ॥४५॥
हस्तौ प्रक्षाळ्य शुद्धात्मा गृहीत्वा दक्षिणे करे ।
सौवर्णेन च रौप्येण नाळिकेरेण मुख्यतः ॥४६॥
कृत्वा चोद्धरणीं पात्रं एतद्दार्वादि पीटके ।
जलं संपूर्य तत्पात्रे उद्धरिण्या च तद्धरेत् ॥४७॥
किंचिज्जलं वामहस्ते धृत्वा मूलमनुं स्मरन् ।
प्रपत्तिफलसिद्ध्यर्थं विष्णुसान्निध्य हेतवे ॥४८॥
पंकीकृत्य द्वयेनैव शुद्धां तु श्वेतमुत्तिकाम् ।
विष्णोर्नुकेतिमन्त्रेण गन्धद्वारेति मन्त्रतः ॥४९॥
सुदर्शनानुष्टुभेन च नृसिंहैकाक्षरेण च ।
भूबीजेनैवमामन्त्र्य गोभिर्मन्त्रं हरिं स्मरन् ॥५०॥
मोक्षधर्मादि सिद्ध्यर्थं विष्णुसायुज्य हेतवे ।
तर्जन्या तद्गृहीत्वाथ ललाटे धारयेत् द्विजः ॥५१॥
दृष्ट्वा सुदर्पणं कास्यं गणं दैवाख्यमानुषम् ।
ऊर्ध्वपुण्ड्रं रुजुं सम्यक् हरिपादाकृतिं सुचिः ॥५२॥

नासादे द्व्यंगुलं पादं मध्यं सार्धांगुळं भवेत् ।
पार्श्वमंगुळमात्रंतु सुस्पष्टं धारयेत् द्विजः ॥५३॥

श्रीचूर्णम्

विष्णवर्पितं रक्तवर्णं हरिद्राचूर्णमुत्तमम् ।
लक्ष्मीनिवाससिद्ध्यर्थं दीपाकारं तु सूक्ष्मकम् ॥५४॥
ऊर्ध्वपुण्ड्रस्य मध्ये तु ललाटे धारयेत् द्विजः ।
ओम् नमः केशवादीनां अर्थं ध्यायंश्चतुर्मुख ॥५५॥
धृत्वा दामोदरान्तं वै शेषं तु शिरसि न्यसेत् ।

माला धारणम्

धृत्वा कण्ठे स्वशिरसि पवित्रं विष्णुधारितम् ॥५६॥
श्रीकृष्णतुळसीकाष्टमणिमालां गळे तथा ।
सह पद्माक्षमालाभिः मुक्ता हारादिकं शुचिः ॥५७॥
शिखायां विष्णुनिर्माल्यं चन्दनाद्यनुलेपनम् ।
अहर्निशं धारयतो न पुनर्जन्म भवेत् ॥५८॥
ये कण्ठलग्नतुळसीनलिनाक्षमालाः
ये बाहुमूल परिचिह्नितशंखचक्राः ।
ये वा ललाटफलके लसदूर्ध्वपुण्ड्राः
ते वैष्णवा भुवनमाशु पवित्रयन्ति ॥५९॥
श्मश्रुहीनश्शिखाधारी सच्छिद्रश्वेतपुण्ड्रधृत् ।
स वै प्रपन्न इत्युक्तस्स हि भागवतोत्तमः ॥६०॥

रुद्राक्षधारिणं विप्रचण्डाळं भस्मधारिणम् ।
श्राद्धकाले हि पश्येतु निराशाः पितरो गताः ॥६१॥
चण्डाळं पतितं म्लेच्छं रुद्रार्चनपरायणम् ।
नित्यनैमित्तिके चैव वैष्णवो नावलोकयेत् ॥६२॥
शिवभक्तैर्बुद्धभक्तैस्सहसंभाषणादिकम् ।
रुद्रार्चनादिसंयुक्तैः वर्जयेत् वैष्णवोत्तमः ॥६३॥
मद्यपादिद्विजाद् सम्यक् दूरतः परिवर्जयेत् ।
एकान्ती शुचीदेशे वै तस्मादाचाममाचरेत् ॥६४॥

पादतीर्थम्

पुनः प्रक्षाळ्य हस्तौ तु नाळिकेराख्य पात्रके ।
जलं किंचित् गृहीत्वा तु जले किंचित् विमिश्रितम् ॥६५॥
पादतीर्थं च गृह्णीयात् गुरूणां च हरेस्सदा ।
प्रपन्नः परमैकान्ती विज्ञानात्मविशुद्धये ॥६६॥
गंगा गतं च मृत्तोयं पादतीर्थस्य मृत्तिकाम् ।
विष्णुपादोदकं तद्वत् गुरुपादोदकं तथा ॥६७॥
गुरुसाम्यादि तीर्थं च पिबेत् ज्ञानात्मसिद्धये ।
प्रक्षाळ्य पादहस्तादीन् सम्यक् सम्शोध्य वारिणा ॥६८॥

वटिकालक्षणम्

विष्णोस्तत् पादतीर्थस्य वटिकालक्षणं श्रुणु ।
बिल्वमूलगतां वापि तुळसीमूलमृत्तिकाम् ॥६९॥

संशोध्य चूर्णं कृत्वाथ मूलमन्त्रेण मन्त्रवित् ।
विष्णुपादोदकेनैव पंकीकृत्य हरिं स्मरन् ॥७०॥
सम्यगामलकाकारं वटकं कारयेत् शुचिः ।
छायाशुष्कं शुचौकृत्वा गुरुपादोदकं तथा ॥७१॥
प्रत्येकं बद्धयेद्धीमान् वटं वस्त्रादिना सदा ।
मृत्स्नाद्यादि समायुक्त पेटिकायां विनिक्षिपेत् ॥७२॥
नित्यं तद्वटकं सम्यक् पूर्वोक्त विधिना पिबेत् ।
पूर्वोक्तं तत्सदाविष्णोः निशाचूर्णं द्विजादयः ॥७३॥
सम्यक् बिल्वकरण्डे वै निक्षिप्य द्विजसत्तमः ।
ब्रह्मं तत् वटिकायां तु तत् करण्डं विनिक्षिपेत् ॥७४॥

जपः

नाळिकेरस्य पात्रादि पेटिकायां च निक्षिपेत् ।
तत् पेटिकायां निक्षिप्य दर्पणं कांस्य[illegible] ।
पुनस्तत् पेटिकां बद्ध्वा जपेत् गुरुपरम्पराम् ॥७५॥
मूलमन्त्रं मन्त्ररत्नं चरमश्लोकपंचकम् ।
श्रीमद्वराहचरमं श्रीकृष्णचरमं तथा ॥७६॥
श्रीरामचरमं तद्वत् श्रीरंगचरमं तथा ।
सुदर्शनाख्य चरमं सकृद्ध्यायन् ततोर्चयेत् ॥७७॥
कुर्यात् सूर्योदयात् पूर्वं सन्ध्यावन्दन कर्म च ।
स्नानं वा तप्ततोयेन तोये वैष्णवसम्भवे ॥७८॥
नाभेरध्वस्थाद्वा देहं क्षाळयेदात्मनस्तनुम् ।
शुद्धवस्त्रादिकं सर्वं पूर्वोक्तं सर्वदा भवेत् ॥७९॥

स्त्रीधर्मः

सदा प्रपन्ननारीणां सन्ध्यावर्जं सुतांत्रिकम् ।
द्वयेन मूलमन्त्रेण विधिरेष चतुर्मुख ॥८०॥
शौच[illegible]ादिकं सर्वं प्रातः काले विशेषतः ।
गृहं संशोध्य विधिवत् गृहोपकरणादि च ॥८१॥
ऊर्ध्वपुण्ड्रं तथा स्त्रीणां अर्धचन्द्राकृतिर्भवेत् ।
[illegible] विशे[illegible] सम्यक् सूर्योदये तथा ॥८२॥
औपासनार्थममलं विहृत्याग्निं च साक्षतैः ।
अलंकृत्य च कुण्डादीन् विष्णुपूजास्थलादिकम् ॥८३॥
सायं प्रातस्स्त्रियस्सर्वाः कुर्युस्तच्छुद्धवारिणा ।
भक्त्या च पति शुश्रूषां मोक्षार्थं सर्वदा चरेत् ॥८४॥

क्षौरम्

स्यात् क्षौरं विधवानांतु शिरोमात्रं सदाब्जज ।
शिखावर्जं मासिमासि अन्यत् सर्व विधिर्भवेत् ॥८५॥

रजस्वलाधर्मः

सुमंगलीनां सर्वासां न सकृत् क्षौरमाचरेत् ।
एकादशदिनादर्वाक् स्नानमेव रजस्वला ॥८६॥
अथ ऊर्ध्वं त्रिरात्रं स्यात् इति वेदे प्रपंचितम् ।
सूतके सात्विकाहारं अश्नीयात् स्वकरे पुटे ॥८७॥
अखर्वेणैव पात्रेण विधवानां च सद्विधिः ।
सूतके सूतिकां स्पृष्ट्वा सवासा जलमाविशेत् ॥८८॥

शूद्राणां स्पृ[illegible]चेत् सूतकेगर्भसूतके ।
शुद्धवस्त्रादिकं धृत्वा कृत्वा गण्डूषणादिकम् ।।८९।।
रजनीलेपनात् शुद्धिः भवेदत्र न संशयः ।
सूतकान्ते विशेषेण त्रिंशत्स्नानानन्तरम् ।।९०।।
द्वा[illegible]मृ[illegible]कास्नानं कृत्वा मन्त्रकमुत्तमम् ।
त्रिवारं पंचगव्यं वै पिबेत् विष्णवर्पितं तथा ।।९१।।
सूतकस्पृष्टिदोषादौ शिशूनां स्नानमेव हि ।
प्रायेण सूतके स्त्रीणां एतदेव विधिर्भवेत् ।।९२।।
सूतके स्पृष्टिदोषादौ श्वानशूद्रादिभिः सदा ।
विधवानां दुर्बलानां रजनीलेपनं विना ।।९३।।
भक्ष्यपानं तथा दत्वा स्नानादीन् पूर्ववत् चरेत् ।
सूतके स्पर्शने चैव चण्डाळस्पर्शनेपि वा ।।९४।।
शिशूनां मृत्तिकास्नानं भवेदेतद्दिने दिने ।
अन्येषां किमुत प्रोक्तं सूतकस्पर्शनादिकम् ।।९५।।
स्त्रीणां तत्पुरुषाणां च मूत्रोत्पत्यादि मैथुने ।
द्वात्रिंशत् मृत्तिका चापि भवेल्लिंगे च षोडश ।।९६।।
करयोः पादयोस्तद्वत् कुर्यात् गण्डूषणं दश ।
त्यक्त्वा तत्कालवस्त्राणि उष्णतोयेन वा तथा ।।९७।।
स्नानं कुर्यात् कटिस्नानं कण्ठस्नानं द्वयं स्मरन् ।
द्वयं सदा स्मरेत् ध्यायेत् सर्वो मोक्षार्थ[illegible]: ।।९८।।
धृत्वा च शुद्धवस्त्राणि ऊर्ध्वपुण्ड्रादिकं ततः ।
पश्चात् चन्दनताम्बूलं हरिशेषं स्रगादि[illegible]म् ।।९९।।

प्रतिगृह्य च रात्रौ तु पूर्वशय्यासनादिकम् ।
आच्छाद्य वस्त्रं तत्रैव रात्रिशेषं नयेत् सुधीः ।।१००।।
पूर्वोक्त भावममलं प्रत्यहं वैष्णवश्चरेत् ।
द्विजस्त्रीणां यथा तद्वत् शूद्राणां च चतुर्मुख ।।१०१।।
क्षौरं भवेत् शिखावर्जं शूद्रादीनां सदा विधिः ।
मासि मासि गृहस्थानां शूद्रसंन्यासिनां तथा ।।१०२।।
योक्त्रं तद्यज्ञसूत्रं वै नास्ति सन्ध्या द्विजोक्तवत् ।
शूद्रादीनां तु सर्वेषां [illegible] दिने दिने ।।१०३।।
धारयेत् सूत्र कौपीनं वस्त्रकण्डन वेष्टनम् ।
शौचं स्नानं चोर्ध्वपुण्ड्रं पंचसंस्कारमुत्तमम् ।।१०४।।
सदा गोपीचन्दनेन तप्त चक्रादिकं तुहि ।
भगवद्दास्यवृत्तं च भगवत्कीर्तनादिकम् ।।१०५।।
सदा प्रणवसंयुक्तं मूलमन्त्रद्वयादिकम् ।
वेदस्वरादिवर्ज्यं स्यात् शूद्राणां मन्त्रजापने ।।१०६।।
दीक्षायां प्रणवादिस्यात् सर्वदा कमलासन ।
तारादीन् मुक्तये लक्ष्मीबीजादिर्मुक्तये तथा ।।१०७।।
सदा तान्त्रिकमन्त्रस्स्यात् वेदस्वर विवर्जितः ।
मूलादिसर्वमन्त्राणां विधिरेष सदा भवेत् ।।१०८।।

शूद्रप्रपन्नलक्षणम्

स्नानं न सिद्धिर्दास्यं स्यात् सर्वतान्त्रिकभेदतः ।
सदा प्रपन्नशूद्राणां सर्वषां मोक्षकांक्षिणाम् ।।१०९।।

मत्सायुज्यादि सिध्यर्थं द्विजधर्मोक्तवत् भवेत् ।
तदा शूद्रप्रपन्नश्च केशश्मश्र्वादि धारणात् ।।११०।।
स एव जातिचण्डाळो सत्यमेव सदा भवेत् ।
श्मश्रुधारी प्रपन्नो यः स याति नरकं ध्रुवम् ।।१११।।
मत्सायुज्यं च सर्वेषां वैष्णवाचारसेवनात् ।
भवेत् युगे युगे ब्रह्मन् सत्यमेव पुनः पुनः ।।११२।।
आचारप्रभवो धर्मः धर्मस्य प्रभुरच्युतः ।
आचारयुक्त आचार्यस्वरूपी सदा हरिः ।।११३।।
आचार्यमाश्रयेत् धीमान् प्रपत्त्या वृत्तिसंयुतम् ।
प्रपत्या विष्णुसायुज्यं लभेतात्र न संशयः ।।११४।।
तस्मादाचार्यचरणं शरणं संप्रयच्छति ।
इति श्रुत्या विनिर्णीतं सर्वदा ब्रह्मवादिभीः ।।११५।।
वसिष्ठो याज्ञवल्क्यश्च शु[illegible]क् बृहस्पतिः ।
शक्तिर्बोधायनो व्यासो हरितोप्याश्वलायनः ।।११६।।
कात्यायनश्शौनकश्च आपस्तम्भादयस्तथा ।
सात्विका ऋषयश्चान्ये ऋषयो हरितान्वयाः ।।११७।।
भारद्वाजादि ऋषयः गार्ग्यश्श्रीवत्सकादयः ।
अम्बरीषो यावनाश्विश्शाण्डिल्यश्शठमर्षणः ।।११८।।
एते शुद्धाश्च सर्वे वै वेदमार्गप्रवर्तकाः ।
एतदाचारनिष्ठा वै सर्वदा कमलासन ।।११९।।
तस्मात् त्वमेतदाचारं नित्यं कुरु चतुर्मुख ।
मत्सायुज्यादि सिद्ध्यर्थं सर्वबन्धविमुक्तये ।।१२०।।

एतदाचारनिष्ठो वै प्रपन्नोत्तम एव च ।
श्रीमत्सेने[illegible]वत् सर्वे मत्प्रियास्तु पराशरः ॥१२१॥
अनन्तो वैनतेयश्च तथा वैरवानसस्तथा ।
एते प्रपन्ननिष्ठास्च पंचसंस्कारसंयुताः ॥१२२॥
पंचकालपरास्सम्यक् बिम्बार्चायां प्रियाश्शुभाः ।
श्रीशास्त्रसंहिता संख्या अष्टोत्तरसहस्रकम् ॥१२३॥
सार्धकोटि प्रमाणं हि पंचरात्रमिदं स्मृतम् ।
पाद्मेप्यष्टोत्तरशतमुक्तं तत्संग्रहेण वै ॥१२४॥
ज्ञानयोग, क्रिया , चर्या भेदेनैव चतुर्विधम् ।
मया प्रोक्तं इदं शास्त्रं वेदोक्तं स्यान्मदर्चने ॥१२५॥

अर्चकः

सदाद्विजः प्रपन्नो वै मया प्रोक्त क्रमेण तु ।
अर्चयेदर्चकस्सो वै आचार्यस्स उदाहृतः ॥१२६॥

अनर्चकः

पंचसंस्काररहितो मन्त्रन्यासविवर्जितः ।
वैष्णवाचाररहितोप्यनर्चक इति स्मृतः ॥१२७॥
अनर्चकार्चितं बिन्बं नमस्कारेण वर्जयेत् ।
तस्मात् सर्वयत्नेन मन्त्रदीक्षापरो भव ॥१२८॥
मदर्चनाय यो ब्रह्मन् दीक्षां कुर्यात् द्विजोत्तमः ।
मुमुक्षुभिरुपास्यस्स्यात् तस्मिन् न्यासादितः क्रमात् ॥१२९॥

तस्मा‍ुपासितव्यो हि वेदान्ते श्रुतिनिश्चितः ।
उपासनार्थं भक्तानां मत्सायुज्यादिसिद्धये ॥१३०॥

दीक्षाविषयः

पंचरात्रे विशेषेण मया प्रोक्तं चतुर्मुख ।
गायत्रीमन्त्र दीक्षा च ब्र ककर्मविधानकम् ॥१३१॥
दीक्षां मदर्चनार्थाय देहे बिम्बे च सर्वदा ।
अर्चनार्थं च मन्त्राणां एत‍ुक्तं सुशत्विकम् ॥१३२॥
अदीक्षितस्तु यो मोहात् कामान् मोक्षार्थमादरात् ।
अर्चयेन्मां वेदयुक्तं स चण्डाळो भवेत् ध्रुवम् ॥१३३॥
स वै देवळको नाम सर्वकर्मबहिष्कृतः ।
स याति नरकं घोरं तस्यायुश्श्रीश्च नश्यति ॥१३४॥
राजा वा राजभृत्यो वा मोहात् कामात् - च मत्सरात्
अदीक्षितस्य हस्तेन स्वयं व्यक्तस्थलादिषु ॥१३५॥
वे[illegible]भिस्सम्यक् विष्णव[illegible] शास्त्रमार्गतः ।
धनधान्यादिभिस्सम्यक् राजा राष्ट्रं च नश्यति ॥१३६॥
तत्तत् धर्मादिकं सम्यक् तस्मात् राजा विचारयेत् ।
तस्मात् सर्वात्मना ब्रह्मन् दीक्षां कुर्याद्विचक्षणः ॥१३७॥

इति श्रीपांचरात्रे पराशरसंहितायां विशिष्टपरमधर्मशास्त्रे
तृतीयोऽध्यायः

अथ चतुर्थोऽध्यायः

श्रीभगवानुवाच-

अतः परं प्रवक्ष्यामि सन्ध्यायोपासनलक्षणम् ।
संग्रहेण प्रपन्नानां मत्सायुज्यादिसिद्धये ॥१॥
संयक् सूर्योदयात्पूर्वं सन्ध्यावन्दनं आचरेत् ।
स्वसूत्रोक्तेन मार्गेण ब्रह्मास्त्रेणैव मन्त्रवित् ॥२॥

अर्घ्यम्

अर्घ्यं दत्वा त्रयं सम्यक् सूर्यनारायणं स्मरन् ।
सूर्यनारायणस्यैव जयार्थं चाज्ञया हरेः ॥३॥
उभौ पादौ जले न्यस्य पाणिभ्यां जलमुद्धरेत् ।
गोशृंगमात्रमुद्धृत्य जलमध्ये जलं क्षिपेत् ॥४॥
सद्विजः प्राङ्मुखो भूत्वा जले नारायणं स्मरन् ।
एकं शस्त्रास्त्रनाशाय एकं वाहननाशने ॥५॥
असुराणां वधायैकं दद्यादर्घ्यत्रयं शुचिः ।
प्रायश्चित्तार्थं एकं च पश्चात्तन्मन्त्रसिद्धये ॥६॥
षडंगन्याससहितं प्रणवस्य सदा शुचिः ।
असावदित्यो ब्रह्मवदेत्तद्दोषोपशान्तये ॥७॥
कुर्वन् प्रदक्षिणं चैकं सूर्यनारायणं स्मरन् ।
वक्ष्ये सन्ध्यार्घ्यसिद्ध्यर्थं ब्रह्मास्त्रं च विशेषतः ॥८॥

दान्तं वह्निसमायुक्तं व्योमहालाहलान्वितम् ।
मेषद्वयं दन्तयुतं हालाहलमतःपरम् ॥९॥
घनाद्यं वायूपूर्वं च .... ।
सरसं वृक्षपर्यायं भ्रान्तं भृगुपदं परम् ॥१०॥
अम्बरं वायुसंयुक्तं अति मर्दय मर्दय ।
प्रदीप्तमथवक्तव्यं परमस्त्रपरं ततः ॥११॥
तत्ते पदं प्रयोक्तव्यं एतद्ब्रह्मास्त्रमीरितम् ।
एतद्ब्रह्मास्त्रमन्त्रेण दद्यादर्घ्यचतुष्टयम् ॥१२॥
एतद्ब्रह्मास्त्रममलं न जानाति च यो द्विजः ।
स वै दुर्ब्राह्मणो नाम स विप्रश्शूद्र एव हि ॥१३॥
पादविप्र स एव स्यात् सर्वकर्मबहिष्कृतः ।
चण्डालवत् त्यजेत् तं वै पङ्क्तिपाकादि कर्मसु ॥१४॥
ब्रह्मास्त्रमन्त्ररहितो ... ।
वेदशास्त्रविरहितः एतदाचारवर्जितः ॥१५॥
पंचसंस्काररहितो दुर्ब्राह्मण इति स्मृतः ।
चण्डाळं तं विजानीयात् कन्या विक्रयवैष्णवम् ।
नित्यनैमित्तिके चैव तं त्यजेत् सर्वकर्मसु ॥१६॥
क्रयकन्या च चण्डाली सर्वदा सर्वकर्मसु ।
क्रयकन्या पतिस्स चण्डाळस्सर्वकर्मसु ॥ १७॥
विशेषेण त्यजेत् सम्यक् कन्याविक्रयवैष्णवम् ।
ब्रह्मास्त्रं अमलं ज्ञात्वा ततस्सन्ध्यादिकं भवेत् ॥१८॥

ब्रह्मास्त्रं यत्तु जानाति प्रपन्नः स द्विजोत्तमः ।
उपसंहरणं कुर्यात् गायत्र्यास्तुर्यमेव च ॥१९॥
अष्टोत्तरसहस्त्रं वा अष्टोत्तरशतं तु वा ।
अष्टाविंशतिवारं वा प्रदोषे दश वा जपेत् ॥२०॥
विष्णुं स्वहृदये ध्यायन् गायत्री मूलविद्यया ।
शोषणादीन् तदा कृत्वा बहिरन्तश्चमातृकाम् ॥२१॥
मूलेन वा केशवादीन् कुर्याद् वै शास्त्र मार्गतः ।
पंचोपनिषदां ध्यानं पुंसूक्तन्यासमुत्तमम् ॥२२॥
प्राणप्रतिष्ठां कृत्वाथ गायत्रीं च समाचरेत् ।
चतुर्विंशति संख्यां वा षडङ्गन्यासमुत्तमम् ॥२३॥
षडगन्यासमात्रेण विष्णुसारूप्यमाप्नुयात् ।
चतुर्विंशतिसंख्याकन्यासातकाम्यान्तिके लभेत् ॥२४॥
पूजारम्भे भयस्थाने नित्यनैमित्तिके तथा ।
प्राणान्तिके च दुर्गेषु पञ्चन्यासमाचरेत् ॥२५॥
मुद्राणां चक्रमुद्रा च विष्णुसायुज्यसिध्दिदा ।
प्राकाराणां अग्निरेव विष्णुसायुज्यदायकः ॥२६॥

जपः

ध्येयस्सदा सवितृमण्डलमध्यवर्ति
नारायण सरसिजासन सन्निविष्ठः ।
केयूरवान् मकरकुण्डलवान्
किरीटीहारी हिरण्मयवपुः धृतशंखचक्रः ॥२७॥

सूर्यनारायणं सम्यक् ध्यायेदेतत्क्रमेण च ।
हृत्पद्मे रविबिम्बेतु त्रिसन्ध्यायां च सर्वदा ॥२८॥
मानसैरुपचारैश्च षोडशैश्च सदा शुचिः ।
जपेन्मूलेन पुरुषः तिष्ठेद्यसूर्यदर्शनात् ॥२९॥

उपस्थानम्

उपस्थानं ततः कृत्वा स्वसूत्रेणोक्तमार्गतः ।
उपस्थानं ततः कुर्यात् द्विजस्सूर्योदयात्परम् ॥३०॥

औपासनम्

श्रुवीरहा वा एष देवानां योऽग्निमुद्वासयते ।
यो वा अयथावदेव तमग्निं चिनुत आ देवताभ्यो वृश्च्यते
पापीयान् भवति ॥३१॥
यावज्जीवं अग्निहोत्रं जुहोति अनुदिते रवौ ।
उदिते तु रवौ प्रातर्जुहुयात् इति वेदविधिर्भवेत् ॥३२॥
पत्नीसंयाजानां रुचा यजति ।
औपासनमकुर्वाणस्स्त्रियं वा योधिगच्छति ॥३३॥
[illegible]मनं प्रोक्तमिति वेदविदो विधुः ।
विधुरस्चसदाकुर्यात् औपासनमतन्द्रितः ॥३४॥
स्वर्णादि प्रतिमां सम्यक् पत्नीरूपं स्मरन् शुचिः ।
वानप्रस्थो ब्रह्मचारी कुर्यादौपासनं सदा ॥३५॥

न कुर्यादेव सन्यासी स[illegible]प्यौपासनं शुचिः ।
गृहस्थानां कदळयादि [illegible] विधिर्भवेत् ॥३६॥
तस्मात् सर्वात्मना ब्रह्मन् अग्निकार्यं चरेत् गृही ।
श्रु अग्निर्वै य[illegible]मुख इति यज्ञ एव ब्रह्म ॥३७॥
यज्ञो वै विष्णुरित्युक्तः एव रुद्रो [illegible] नारायण इति च ।
अग्निरग्रे प्रथमो [illegible]वतानां संयातानां उत्तमो विष्णुरासीत् ।३८।
यजमानायेति [illegible]त्यमिति वेदे सुनि[illegible]चितः ॥३९॥

[illegible] – [illegible]र्षिपितृतर्पणम्

ब्रह्मयज्ञं ततः कृत्वा देवऋष्यादि तर्पणम् ॥४०॥
पित्रादि तर्पणं कुर्यात् चतुस्सम्यक् चतुर्मुख ।
सर्वदेवान् सर्वगणान् पतिपत्नीसहेति च ॥४१॥
एकैकं काण्डऋष्य[illegible]िन् वदामि ऋषयस्तथा ।
निवीतमिति श्रुत्यर्थं तत्तन् ज्ञत्वा च तर्पयेत् ॥४२॥
ब्रह्मयज्ञेप्युपस्थाने पुंसूक्तं वै जपेत् द्विजः ।
सर्वोपनिषत् सर्ववेदसमं पुंसूक्तमेव हि ॥४३॥
मोक्षवश्येप्युपस्थाने सुपुत्रप्रापणेहि च ।
सर्वकामफलावाप्तो आरोग्ये मृत्युनाशने ॥४४॥
तत्तत् प्रयोगभेदेन पुंसूक्तं वै प्रयोजयेत् ।
विष्णवर्चनेपितृदिने पुंसूक्तेनोच्चरेत् द्विजः ॥४५॥
तस्मै ब्रह्मयज्ञान्ते गृहे विष्णुं समर्चयेत् ॥४६॥

पंचरात्रेण पूजनम्

विष्णुपूजां ततः कुर्यात् पंचरात्रविधानतः ॥४७॥
पंचरात्रप्रयोगेण पंचकालविधानतः ।
दत्वा गोग्रासं अमलं वने धेनुं नियम्य च ॥४८॥
श्रीमद्विष्णोश्च नैविद्यं कुर्यात् शास्त्रोक्तमार्गतः ।
शुद्ध वैखानसोक्तेन चरुं तन्त्रेण वा द्विजः ॥४९॥
एतदाचार्यसंयुक्तैस्सहसम्यग्विशेषतः ।
उपादानं ततः कुर्यात् प्रपन्नस्य गृहे तदा ॥५०॥
ततो विष्ण्वर्चकस्सम्यक् विष्णु देवालयं गतः ।
प्रविश्य पंचरात्रेण वैखानसमतेन वा ॥५१॥
दिव्ये सैद्दे मानुषे च स्वयं व्यक्तस्थलादिषु ।
अर्चयेत् वासुदेवं च केशवादीन् श्रिया सह ॥५२॥
नारसिम्हं विशेषेण मत्स्यादीन् सात्विकोत्तमान् ।
रामं कृष्णं जगन्नाथं रंगनाथं विशेषतः ॥५३॥
ज्ञानादि षड्गुणोपेताः मूर्तीं वै शुद्धसात्विकीः ।
अर्चयेत् बलि पर्यन्तं प्रपन्नोप्यर्चको मतः ॥५४॥

अर्चकः – उत्सवादि

नित्योत्सव विधानाद्यैस्तथा नैमित्तिकादिभिः ।
ज्ञत्वा कालोत्सवादींश्च मन्त्रतन्त्रादि भेदतः ॥५५॥

नित्या[illegible] प्रतिष्ठा

कर्षणादि प्रतिष्ठान्तं प्रतिष्ठाद्युत्सवान्तिकम् ।
उत्सवादि गुरुस्सम्यक् प्रायश्चित्तान्तमुत्तमम् ॥५६॥
नित्यमुक्त प्रतिष्ठां च विष्णु भक्तादिकान् तथा ।
मन्त्रतन्त्रादिकं सर्वं ज्ञात्वा विष्णुं समर्चयेत् ॥५७॥
विष्णोस्तत् सेवकानां वै विष्णुपूजादि सिद्धये ।
तापादिपंचसंस्कारान् कुर्यात्तच्छास्त्रमार्गतः ॥५८॥
नृत्तगीतादिदासानां दासीनां च विशेषतः ।
नृत्तगीतादिसंसक्त स्त्रीणां चैव विधानतः ॥५९॥

पंचसंस्काररहितैराराधनादि न कर्तव्यम्

पंचसंस्काररहितस्सेवको [illegible]र्चयेत् हरिम् ।
तस्यवंशक्षयं याति तस्यायुश्श्रीश्च नश्यति ॥६०॥
राजा वा राजभृत्यो वा मन्त्री वाथ पुरोहितः ।
पंचसंस्काररहितान् विष्णोर्नि[illegible]दिषु ॥६१॥
नृत्याद्यर्थं कल्पयेत् यस्स याति नरकं ध्रुवम् ।
तस्य वंशक्षयं याति तस्यायुश्श्रीश्च नश्यति ॥६२॥
तस्य निष्फलितं कर्म भवेत् पूजादिकं तथा ।
सदा विष्णुप्रतिष्ठायां उत्सवाद्यादि कर्मसु ॥६३॥
राजा वा राजभृत्यो वा पत्नीपु[illegible]च वा ।
प्रपन्नो वैष्णवो विप्रो गृही वाथ यतिर्वनी ॥६४॥

विष्णुचक्रप्रतिष्ठायां विघ्नमाचरते तु यः ।
मायावादमतस्थो वा शैवो बौद्धादयस्तथा ॥६५॥
ते यान्ति नरकं घोरं रौरवं रोमसंख्यया ।
तेषां वंशः क्षयं याति तस्यायुश्श्रीश्च नश्यति ॥६६॥
तस्य रोगाधिकं सम्यक् भवेदत्र न संशयः ।

परिचारकाः

प्रपन्नस्यैव भार्या च तथा विष्ण्वर्चकस्य च ॥६७॥
पाचकाद्या द्विजास्सम्यक् विष्ण्वर्चापरिचारकाः ।

पात्रशोधनम्

महानसस्थलादींस्च गोमयेनानुलिप्य च ॥६८॥
प्रत्यहं विष्णुपूजार्थं द्विजानां मुक्तिसिद्धये ।
प्रत्यहं ताम्रपात्रं वै मृण्मयं नूतनं तु वा ॥६९॥
अन्तर्बहिर्विशुद्ध्यर्थं तद्द्रव्येण लोहजान् ।
प्रत्यहं नूतनं भाण्डं मृण्मयं तु समाहरेत् ॥७०॥
तेन प्राणाग्निहोत्रादि शुद्ध्यर्थमिव एव हि ।
मुद्गान् माषांश्च गोधूमान् श्यामाकान् व्रीहितण्डुलान् ॥७१॥
विष्णोर्निवेदनं कुर्यात् पैतृके प्रत्यहं द्विजः ।

यावनाल निषेधः

औपासने देवकार्ये पैतृके प्रत्यहं द्विजः ॥७२॥

गोमाम्सवत् त्यजेत् श्रीमान् यावनालत्रयं द्विजः
प्रपन्नः परमैकान्ती यावनालस्य भक्षणात् ।
श्वानयोनिशतं प्राप्य विष्णुभक्तो भवेत् पुनः ॥७३॥
भवेत् चण्डालजन्मादि यावनालान्न भक्षणात् ।
तस्मात् सर्व प्रयत्नेन क्षुध्रधान्यानि वर्जयेत् ॥७४॥
उपादानं प्रकुर्वीत दिनं द्विजगृहेषु वै ।
न शूद्रस्य गृहेवाथ तण्डुलादीन् परिगृहेत् ॥७५॥
पानशेषं पाकशेषं भुक्तशेषं परित्यजेत् ।
गृह्णीयात् राशिमध्यस्थं शाकमूलफलादिकम् ॥७६॥
घृतं दधि गुडं क्षीरं तैलं लवणमुत्तमम् ।
भाण्डस्थितं द्विजश्रेष्ठश्शुद्धमेव परिग्रहेत् ॥७७॥

निषि[illegible]शाकादयः

शाकमूलफलादीनी सात्विकान्येव संग्रहेत् ।
उपोतकी त्रयं सम्यक् लशुन[illegible]यमेव च ॥७८॥
पलाण्डुद्वितयं तद्वत् मूल[illegible]मेव च ।
मद्यं मांसं चारनाळं शिग्रुत्रयमतः परम् ।
करंज हिंगुनिर्यासं तक्रं लवणकृत्रिमम् ॥७९॥
कालिंगद्वितयंतद्वत् कतळ[illegible]यमेव च ।
बिल्वद्वयं भिस्सदश्च तथा चौदुम्बरद्वयम् ॥८०॥

अलाबु त्रितयं तद्वत् महिषक्षीरमुत्तमम् ।
तं माहिषं दधि घृतं तस्यास्तक्रादिकं त्यजेत् ॥८१॥
अजा क्षीरं च दधिच त्यजेत् उष्ट्रादिजं तथा ।
त्यजेत् गोमाप्सवन्नित्यं देवपित्र्यादिकर्मसु ॥८२॥
प्रपन्नः प[illegible]न्ती द्विजाश्शूद्रादयस्तथा ।
ताळद्वयं च हिंताळं वर्जयेत् तद्वदेवहि ॥८३॥
तत्व[illegible]सिद्ध्यर्थं विष्णु[illegible] हेतवे ।
[illegible]तन्निषि[illegible] द्रव्याणि सर्वदा वर्जयेत् द्विजः ॥८४॥
मनोनिमित्तदु[illegible]ं च भावदुष्टं परित्यजेत् ।
क्रियादु[illegible]ं तथा सम्यक् तद्वदाश्रयदुष्टकम् ॥८५॥

शैवाद्या[illegible]त [illegible]कादे निषेधः

अनुलोम[illegible]न् [illegible]वानीतान् तथैव च ।
तथाप्यवैष्णवानीतान् सर्वं शाका[illegible] वर्जयेत् ॥८६॥
शैवाद्यैरपि गृह्णीयात् धनमापत्सु वैष्णवाः ।
विष्णोर्यत् स्थापनादे च शै[illegible] परिग्रहेत् ॥८७॥
ब्र[illegible]चारी यति[illegible]क् सर्वदा कम[illegible] ।
शुद्धं द्रव्या[illegible]कं सम्यक् आर्जयेत् सात्विकेन च ॥८८॥
[illegible] दत्तं सर्वं परित्यजेत् ।
नारायणस्य नैवेद्यं प्रत्यहं च चतुर्मुख ॥८९॥
एतदुक्तप्रकारेण भण्डस्थानादिशुध्धिभिः ।

भगवन्निवेदितान्नभोजनम्

सम्यक् चतुर्विधं चान्नं व्यंजनोपेतमुत्तमम् ।
कुर्यदेवं विशुद्धात्मा भिष्टान्नायुष्य हेतवे ॥९०॥
मुखवायु हताघ्रातं रजो दूषणकान्वितम् ।
मृत्पाषणशकृद्भिश्च दूषितं न निवेदयेत् ॥९१॥
पादलंधितमेवाथ तथा तत्कीटदूषितम् ।
श्वानस्पृष्टं तथा स्पृष्टं च प्रतिलोमजैः ॥९२॥
मण्डूकमूषिकासर्प विडालाद्यैश्च जन्तुभिः ।
स्पृष्टं दुष्टहविश्चैव देवाय न निवेदयेत् ॥९३॥
प्रपन्नः परमैकान्ती चरेदेवं विधानतः ।
उपादानात् परं सम्यक् कालात् संगमनात् परम् ॥९४॥
प्राप्ते मध्यान्हसमये स्नानं कुर्यात् यथाविधि ।

इज्या

देवादितर्पणं कृत्वा श्रीवैकुण्ठादि स द्विजः ॥९५॥
पार्षदांश्च सुसंतर्प्य सर्वं पूर्वोक्तवत्तथा ।
धृत्वा व्यक्तोर्ध्वपुण्ड्रादीन् सुगन्धाद्यनुलेपनम् ॥९६॥
देहदुर्गन्धनाशार्थं विष्णुसेवादिकर्मसु ।
ब्रह्मचारी गृही सम्यक् वानप्रस्थो यतिर्व्रती ॥९७॥
दुर्गन्धयुक्तदेहेन योऽर्चयेत् हरिं आदरात् ।
स याति नरकं घोरं रौरवं रोमसंख्यया ॥९८॥

सत्यं सत्यं पुनस्सत्यं एतदेव चतुर्मुख ।

चतुर्विध दास्यम्

दासस्ता[illegible]ष्णुपत्नीं च राजवत् पूजयेत् हरिम् ॥९९॥
प्रपन्नानां सदा सम्यक् विष्णो[illegible]स्यं चतुर्विधम् ।
पति भार्यादि संबन्धं पि[illegible] पुत्रादिकं तथा ॥१००॥
स्वामि भृत्यादि संबन्धं शि[illegible] तथा ।
एतच्चतुर्विधं दास्यं विष्णोः प्रीतिकरं सदा ॥१०१॥
सर्वेषां विष्णुसायुज्यसि[illegible]ये श्रुतिचोदि[illegible]म् ।
ज्ञात्वा कृत्वैवममलं सदा [illegible] यथा ॥१०२॥
पं[illegible] मार्गेण मध्यान्हे विष्णुं अर्चयेत् ।

वैखानसविधा[illegible]

वैखानसविधानेन त्यक्त्वा तामसपूजनम् ॥१०३॥
देवान्तरादिरहित्यप्रयोगेणैव पूजयेत् ।
गृहे देवालये सम्यक् प्रपन्न[illegible]चार्चयेत् सदा ॥१०४॥
श्रियं भूमिं च नीळां च चक्रादीनर्चयेत् सदा ।
अनन्तं वैनतेयं च विष्वक्सेनमनन्तवत् ॥१०५॥
नित्यान् मुक्तान् गुरून् सम्यक् एकैकानेव पूजयेत् ।
विष्णुपूज्यायुधांस्तद्वत् [illegible]श्चपूजयेत् ॥१०६॥
सर्वोपचारैस्सततं क्रमाद्विष्ण्वर्चनादिकम् ।

वैश्वदेवम्

ततस्त्रिकरणैः कृत्वा वैश्वदेवं यथाविधि ॥१०७॥
कृत्वा बल्यन्नममलं तच्छेषं च सदा द्विजः ।
प्रपन्नः परमैकान्ती नित्यं भुंजीत सादरम् ॥१०८॥

अनन्तादीनां निवेदनम्

श्रीभूनीळाख्यकानां विनतानन्दनस्य च ।
चक्रादीनां आयुधानां वस्तु यद्यन्निवेदितम् ॥१०९॥
भोक्तव्यमेव सर्वेषां विप्रादीनामशंकितम् ।
विष्वक्सेनस्य नैवेद्यं प्रापणं दुर्लभं भवेत् ॥११०॥
विष्णोर्निवेदितान्नेन यष्टव्यं देवतान्तरम् ।
पितृभ्यश्चापि तद्देयं तदानत्याय कल्पते ॥१११॥
विष्णोर्निवेदितं शुद्धं पावनानां च पावनम् ।
प्रापणं दुर्लभं भोज्यं नत्याज्यं स्यात् कदाचन ॥११२॥
भुंजानानां एधते श्रीस्त्यजतां परिहीयते ।
व्रतोपवासतुलितं अशनं तस्य पावनम् ॥११३॥
शुनामिव पुरोडाशो न नीचेषु च दीयते ।

निर्माल्यम्

धारितं विष्णुनिर्माल्यं चन्दनाद्यनुलेपनम् ॥११४॥
अहनिर्शं धारयतो न पूनर्जननं भवेत् ।

यः कुर्यादन्यथैवैतत् स याति नरकं ध्रुवम् ॥११५॥
तस्य वंशः क्षयं याति आयुश्श्रीश्च नश्यतः ।
ब्र ोशानादिदेवानां नैव भोज्यं निवेदितम् ॥११६॥
न स्पृश्यं न गृहीतव्यं चण्डिकादि [illegible]तम् ।
न च [illegible]वैर्भक्षणीयं क ाचन ॥११७॥
[illegible]वैर्दूषितं परिवर्जयेत् ।
प्रपन्नः प मैकान्ती काले तत्कार्यमाचरेत् ॥११८॥
[illegible]शेषेण विष्णुतीर्थेन सादरम् ।

पङ्क्तिभोजन लक्षणम्

नित्यं श्राद्धादिकं कृत्वा [illegible]सहादरात् ॥११९॥
वृद्[illegible]लादिकैस्सम्यक् ध्रुवं भुंजीत वैष्णवः ।
[illegible]स्थले सम्यक् अतिथीनपि भोजयेत् ॥१२०॥
विष्णुशेषं च ताम्बूलं गृ णीयात् चन्दनं तथा ।
तत्तत् धर्मेण चाश्नीयात् विष्णुनैवेद्य भक्षणम् ॥१२१॥
द्वयाधिकारहीनैश्च शिशुभिस्सह भोजनम् ।
प्रपन्नो यः करोत्येवं स याति नरकं ध्रुवम् ॥१२२॥
स जीवन्नेव चण्डाळस्सर्वकर्मसु सर्वदा ।
त्रपुकांस्यादि पात्रेषु योऽ नीयात् पतितो भवेत् ॥१२३॥
द्विजः प्रपन्नो मोहाच्च शिशुभिस्सह भोजनात् ।
चण्डाळत्वं भजेत् सम्यक् यथा स्वगुरुदूषणात् ॥१२४॥

पंचसंस्कारदीक्षायां मन्त्रदीक्षागुरुस्सदा ।
अग्रे पूज्यस्स एवस्यात् सर्वदा कमलासन ॥१२५॥

गुरुनिन्दा नकार्या

गुरुनिन्दा गुरुत्यागात् श्वपाकी शिष्य एव सः ।
चण्डाळत्वं भवेत्तस्य दश पंच च षोडश ॥१२६॥
तस्यवंशः क्षयं याति तस्यायुः श्रीश्च नश्यति ।

शूद्राद्यवैष्णवकृततक्रविषेधः

द्विजश्शूद्रादितक्रं वै यः पिबेत् वैष्णवोत्तमः ॥१२७॥
चण्डाळो भवेत् सत्यं जीवन्नेव सदाऽशुचिः ।
अवैष्णवगृहानीतं तक्रं यो वैष्णवः पिबेत् ॥१२८॥
श्वानयोनिशतं प्राप्य स पश्चात् मुक्तिभाक् भवेत् ।

मद्यपायिनां सत्कर्मणि निषेधः

हित्वा शिरो वैष्णवो यश्श्मश्रुकृन्तनं आचरेत् ॥१२९॥
स चण्डाळो भवेन्नित्यं पङ्क्तिपाकादि कर्मसु ।
श्मश्र्वादिधारिणं विप्रचण्डाळं मद्यपं तथा ॥१३०॥
यश्श्राद्धे भोजयेत् विप्रः पितृणां तस्य दुर्गतिः ।
अनधिकारा दुराचाराः गायकाः कुण्डगोळकाः ॥१३१॥
प्रपन्ननिन्दकाः क्रूरा भगवन्मन्त्रदूषकाः ।

चण्डाळसदृशास्तेस्युः [illegible]सु सर्वदा ।
सर्वदा पङ्क्तिपाकादौ त्यजेच्चण्डाळहीनवत् ॥१३३॥
वेदमार्गपरिभ्रष्टान् कांश्चित् वैष्णवाधमान् ।
प[illegible]दिषु सदा शिखाहीनयतिं त्यजेत् ॥१३४॥

सन्यासि नियमः

नित्यकर्म[illegible]खां चैव त्रिदण्डं यज्ञसूत्रकम् ।
सन्यासे यस्त्यजेत् विप्रः स याति नरकं ध्रुवम् ॥१३५॥
त्रिदण्डहीने प्रेतत्वं यतीनां सर्वदा भवेत् ।

क्षत्रियादीनां स[illegible]नियमः

क्षत्रियाणां च वैश्यानां मुण्डत्वं च विधीयते ॥१३६॥
यज्ञसूत्रशिखावर्जं सन्यासे सर्वदा भवेत् ।
विप्रकर्मोक्तमाचारं एकदण्डादिधारणम् ॥१३७॥
शूद्रादीनां यज्ञसूत्रशिखायोक्तादिवर्जनम् ।
न च संध्यादिकं कार्यं ब्रह्मयज्ञं सुवैदिकम् ॥१३८॥
शौचं स्नानं चोर्ध्वपुण्ड्रं नित्यं विष्णोश्च पूजनम् ।
रामं गोपालममलं शूद्राद्यः पूजयेत् सदा ॥१३९॥
[illegible]ष्णरामादिमन्त्रैश्च वेदस्वरविवर्जितः ।
प्रणवं न भवेत् सत्यं विष्णुसाजुज्यसिद्धये ॥१४०॥
आयुश्श्रीराज्यकाम[illegible] सर्वशत्रुक्षयाय च ।
संतानारोग्यवांछार्थं विष्णुसायुज्यहेतवे ॥१४१॥

एतद्विजोक्त मार्गेण अन्नशुद्ध्यादिके चरेत् ।
शूद्रादीनां क्षत्रियाणां राज्यदेशादिपालनम् ॥१४२॥
सर्वदा विष्णु भक्तानां केशश्मश्र्वादिधारणम् ।
भवेत् सम्यक् विशेषेण उपादानादिवर्जनम् ॥१४३॥
न्यायार्जित धनेनैव विष्णुपूजादिकं चरेत् ।
द्रोहिणां पापीनां सम्यक् देशत्यागविधिर्भवेत् ॥१४४॥
अन्यथा यः करोत्येवं तस्यायुः श्रीश्च नश्यति ।
स याति नरकं घोरं तस्य वंशक्षयो भवेत् ॥१४५॥
तस्यैव विष्णुसायुज्यं नास्ति सत्यं चतुर्मुख ।
येन केन प्रकारेण यस्य कस्यापि देहिनः ।
संतोषं जनयेद्विद्वान् तदेवेश्वरपूजनम् ॥१४६॥

पुराणश्रवणवर्जनकालः

आयुः श्रीमोक्षकाम्यार्थं आशौचादिषुकर्मसु ।
पुराणश्रवणं कुर्यात् तस्यायुः श्रीश्च नश्यति ॥१४७॥
सात्त्विकानि पुराणानि स्नानात् पूर्वं श्रुणोति यः ।
स याति नरकं घोरं तस्यायुः श्रीश्च नश्यति ।१४८॥

पुराणश्रवण कालः

भोजनानन्तरे वेदवेदान्तादिसेवनम् ॥१४९॥
इतिहासपुराणादि विष्णुगानादिकं तथा ।
यथा शृंगारभीभत्सरहितं दुःखनाशनम् ॥१५०॥

श्रुति संकीर्तनादींश्च कालक्षेपार्थमभ्यसेत् ।
कालक्षेपार्थममलं द्वयमेव सदा जपेत् ॥१५१॥
कर्मणा मनसा वाचा विष्णुमेवाभ्यसेत् सदा ।
प्रपन्नः परमैकान्ती द्वयमेव सदा जपेत् ॥१५२॥
सुखे दुःखेऽप्यनाचारे द्विजाद्यास्सर्वकर्मसु ।
विष्णुसायुज्यसिद्ध्यर्थं सर्वबन्धविमुक्तये ॥१५३॥
स्पृष्ट्यादिकं तथा ज्ञात्वा कृत्वा स्नानादिकं तथा ।
सायं संध्यादिकं कृत्वा स्वसूत्रानुक्त मार्गतः ॥१५४॥
विष्णुपूजादिकं कृत्वा भोजनं पूर्वच्चरेत् ।

शयनविशेषः

शय्यायां च हरिं ध्यात्वा ताम्बूलादीन् परिग्रहेत् ॥१५५॥
गृहे गोवृद्धबालादीन् विचार्यानादिभिस्सह ।
ततस्वोचित कार्यैश्च कुर्यात् शयनमुत्तमम् ॥१५६॥
स्त्रिया सह प्रपन्नाद्याः पर्वादीन् सुविचार्य च ।
एतदाचारयुक्तो वै प्रपन्नो द्विजसत्तमः ॥१५७॥
स जीवन्नेव मुक्तस्स्यात् स याति परमं पदम् ।

दीक्षा द्विविधा

गुरुवर्यस्स एवस्यात् सर्वेषां मुक्तिसिद्धये ॥१५८॥
तप्तचक्रादि दीक्षां च पंचसंस्कारभेदतः ।
विष्णवर्चनादि दीक्षां वै मद्धर्मस्थापनाय च ॥१५९॥

कुर्यात्तां ब्रह्मविद्ब्रह्मन् दीक्षीतैस्सहदीक्षितः ।
द्विजानां च विशेषेण शूद्रादीनां तथैव च ॥१६०॥
संवत्सरं परीक्ष्यैव शिष्यार्जनमथापि वा ।

पंचसंस्कारदीक्षा

दीक्षाकर्मविधानेन तप्तचक्रादीधारणम् ॥१६१॥
ति[illegible]दीक्षार्थं प्रपत्तिश्च युगे युगे ।
गायत्र्या उपदेशे च क्षौरकर्म विधिर्भवेत् ॥१६२॥
पंचसंस्कारदीक्षायां कालदोषादिकं न च ।
भक्तानां विष्णुसान्निध्यं प्रपत्या सर्वदा भवेत् ॥१६३॥
ततः शिष्यं समानीय स्नाते शुद्धं गुरुश्शुचिः ।
कलशस्थापनं कृत्वा तं शिष्यं अभिषेचयेत् ॥१६४॥
स्वाग्ने कुर्यात् ब्रह्मचारी तप्तचक्रादि धारणम् ।
पंचरात्रोक्त विधिना मन्त्रहोमं विधानतः ॥१६५॥
स्वाग्ने कुर्यात् गृही तद्वत् वानप्रस्थस्तथैव च ।
कुर्याद्देव[illegible] तु सन्यासी होममार्गतः ॥१६६॥
तद्वद्द्विजानां शूद्राणां तप्तचक्रादिधारणम् ।
वैखानसद्विजानां च कुर्यात् सत्यं चतुर्मुख ॥१६७॥
विष्णुपूजादि सिद्ध्यर्थं सर्व[illegible]य च ।
पंचसंस्कारदीक्षार्थं कुर्यादेव गुरूत्तमः ॥१६८॥

शूद्रवैश्यक्षत्रहस्तेन अन्येषां मुक्तिसिद्धये ।
पंचसंस्कारदीक्षादीन् दत्वानुज्ञां च कुर्वते ॥१६९॥
नियम्यस्स्यात् स मन्त्रेण कुर्याद्वा वैष्णवाग्निना ।
चाण्डालम्लेच्छजातीनां कुर्यान्मोक्षादिसिद्धये ॥१७०॥
जातिहीनप्रपन्नानां स्नानवेषादिकं सदा ।
भाण्डशुद्धिरित्यादि शेषं शूद्रप्रपन्नवत् ॥१७१॥
विष्णुसायुज्यपर्यन्तं तारतम्यं समाचरेत् ।

गुरुपत्न्यानाशौचम्

रजस्वला गुरोः पत्नी यथा योग्या सदा भुवि ॥१७२॥
देवालये गुरुगृहे तथा विप्रगृहे च सा ।
सदा विप्रप्रपन्नानां द्विजानां च विशेषतः ॥१७३॥
शूद्रादीनां प्रपन्नानां पङ्क्तिपाकादि कर्मसु ।
गुरोः पत्न्यास्सूतकवदाचारं सर्वदा भवेत् ॥१७४॥
मोक्षे तद्विष्णुसायुज्यं सर्वेषामेकमेव हि ।
वर्तमान शरीरादेः जातिभेदं चरेत् सदा ॥१७५॥

वेदमार्गेण प्रतिष्ठा

सदा विष्णुप्रतिष्ठादेः स्वयं व्यक्त स्थलादिषु ।
प्रतिष्ठार्चादिकं सर्वं विप्राणां विधिरेव हि ॥१७६॥
शूद्रादीनां क्षत्रियाणां वैश्यानां तन्न विद्यते ।
षट्कर्मयजनेत्यादि विप्राणामधिः सर्वदा ॥१७७॥

तस्मात् सर्वप्रयत्नेन वेदमार्गं समाचरेत् ।
सर्वेषां मुक्तिसिद्ध्यर्थं एतदाचारभेदतः ॥१७८॥
विवाहादौ जाति योनिस्तथा चान्नं यथा भवेत् ।
विष्णुलोकादिपर्यन्तं जात्यादीन् नत्यजेत् सदा ॥१७९॥
यथोक्तविधिना सम्यक् शूद्रमाचारयेत् सदा ।
पंचकालविधानेन भवेदुक्तं जपादिकम् ॥१८०॥
सर्वेषां मुक्तिसिद्ध्यर्थं उक्तमेव चतुर्मुख ।

शूद्रादीनां न संध्यादि

शूद्रादीनां वैदिकोक्त संध्याप्यौपासनं न च ॥१८१॥
अस्त्येव पंचसंस्कारो विष्णुपूजा विशेषतः ।
पंचकालविधानेन वक्तशुद्धे जपादिकम् ॥१८२॥
ब्रह्मध्यानं यतीनां वै सन्ध्या च परिकीर्तिताः ।
एतदाचार संयुक्तैः प्रपन्नैर्वैष्णवैःकृतम् ॥१८३॥
विष्णोर्निवेदितान्नं च भिक्षाभक्ष्यादिकम् भवेत् ।
अवैष्णवादिजान्नेन यतिश्शूद्रोभवेत् सदा ॥१८४॥
ध्यानं पूजा च विधिवत् सन्यासे सद्भिर्भवेत् ।
सर्वदा विष्णुकैंकर्यं मनोवाक्कायकैरपि ॥१८५॥
देवब्राह्मण संरक्षा वेदान्ताभ्यासनादिकम् ।
उक्तमेव विधानं च यतीनां सुविशेषतः ॥१८६॥

विष्णुसायुज्यसिद्ध्यर्थं सर्वबन्धविमुक्तये ।

स्वेच्छाकाले हरिपूजा निषेधः

त्रिदण्ड[illegible] रूपेण सदा विप्रयतिश्चरेत् ॥१८७॥
पूजाकालं परित्यज्य स्वेच्छाकाले हरिं त्यजेत् ।
स याति नरकं घोरं [illegible] द्विजोत्तमः ॥१८८॥
मध्यान्हे वैष्णवीं पूजां नैवेद्यं शक्ति[illegible]तः ।
यः प्रपन्नो न दद्याच्च स चण्डाळो भवेत् ध्रुवम् ॥१८९॥
विष्णुद्रोही स एव स्यात् तं त्यजेत् सर्वकर्मसु ॥१९०॥
त्रिकालं एककालं वा मध्यान्हे च विशेषतः ।
द्विजो निवेदयेत् ब्रह्मन् विष्णु सायुज्य हेतवे ॥१९१॥
सुच[illegible] सदा कुर्यात् विष्णुदेवालयादिषु ।
श्रिया सहैव तद्विष्णु पूजाप्यागमना त्विकैः ॥१९२॥

क्षत्रियादीनां गृहपूजा

गृहेवै क्षत्रियादीनां विष्णुपूजाविधिर्भवेत् ।
क्षत्रियादिस्पर्शने च विप्रार्चि[illegible] हरेस्तदा ॥१९३॥
संप्रोक्षणं तदा कृत्वा पश्चाद्विप्रस्तु पूजयेत् ।

रुद्रपूजानिषेधः

चण्डाळत्वं भवेत् सम्यक् विप्राणां रुद्रपूजनात् ॥१९४॥
तथैव क्षत्रियाणां च शूद्रादीनां तथा भवेत् ।

रुद्रार्चनाधिकारे

रुद्रार्चनासंकराणां विधिस्स्यात् सर्वदा मुने ॥१९५॥
चण्डाळानां शक्तिपूजा शैवदुर्गादिसंज्ञिता ।
तद्वद्भैरवपूजा च जैनबौद्धादिकं भवेत् ॥१९६॥

दृष्टिदोषः

देवतान्तरभक्तानां दृष्टिदोषं परित्यजेत् ।
नैवेद्य पाककालेच पङ्क्तिभोजनकर्मसु ॥१९७॥
श्वानवायसचण्डाळ दृष्टिदोषं परित्यजेत् ।
विष्णुनैवेद्यकाले च भोजने च विशेषतः ॥१९८॥
असत्दृष्टिं परिहरेत् अच्युतस्य निवेदने ।
[illegible]दृष्टं प्रपन्नश्च योऽश्नीयात् लोभतोऽपिवा ॥१९९॥
स जीवन्नेव चण्डाळस्स याति नरकं ध्रुवम् ।
अवैष्णवानां दृष्टिश्चेत् भोजने वैष्णवस्त्यजेत् ॥२००॥
तस्मात् सर्वप्रयत्नेन एतदाचारमुत्तमम् ।
विष्णुसायुज्यसिद्ध्यर्थं सदाकुर्याच्च वैष्णवः ॥२०१॥

इति श्रीपांचरात्रे पराशरसंहितायां विशिष्टपरमधर्मशास्त्रे
चतुर्थोऽध्यायः

अथ पञ्चमोऽध्यायः

सहस्त्रनामजपलक्षणम्

श्रीभगवानुवाच-

सहस्त्रनामस्तोत्रस्य न्यासध्यानादिकं ततः ।
वक्ष्ये मूलादि[illegible] सर्वेषां मुक्तिसि[illegible]ये ॥१॥
नित्यनैमित्तिकाचारे शुद्धिसिद्ध्यर्थमुत्तमम् ।
धर्मकामादिसिद्ध्यर्थं प्रपत्तिफलसि[illegible]ये ॥२॥
सहस्त्रनाममन्त्रस्य वेदव्यासोमुनिस्ततः ।
छन्दोनुष्टुप् तथा देवश्श्रीमन्नारायणस्तथा ॥३॥
ओं नमो विष्णव इति क्लींबीजमभिधीयते ।
सर्वप्रपहरणायुध इति शक्तिं वदेत् शुचिः ॥४॥
सर्वप्रपहरणायुध इति शक्तिं वदेत् शुचिः ।
श्रींकीलकंकवचमों अस्त्रं अभिधीयते ।
सहस्त्रनाममूर्तीनां वक्ष्ये ध्यान[illegible]म् ॥५॥
जपार्चनादि सिद्ध्यर्थं मुक्ति[illegible]क्षादिसिद्धये ।
सहस्त्रनाममूर्तीनां चक्रशंखग[illegible]भयम् ॥६॥
स्मरेत् कुर्यात् तथा ध्यायेत् जपार्चा[illegible]षु बुद्धि[illegible] ।
दक्षिणोर्ध्वकरे चक्रं प्रादक्षिण्येन सत्क्रमात् ॥७॥
ध्यात्वैवमर्चये[illegible] देवं धर्ममोक्षादिसि[illegible]ये ।

श्रीभूनीळाधिपं देवं सहस्त्रवपुषं हरिम् ॥८॥
सहस्त्रनामनामांकं किरीटादि विभूषितम् ।
चक्रशंखगदापद्मधारिणं वनमालिनम् ॥९॥
परसूक्ष्मस्थूलरूपं तं भजेत् विश्वतोमुखम् ।
सहस्त्रनामस्तोत्रं वै एवं ध्यात्वा जपेत् शुचिः ॥१०॥
सहस्त्रनामभिर्देवं चतुर्थ्यन्तं नमोन्तकम् ।
प्रातःकाले विशेषेण जुहयात् पूजयेत् सदा ॥११॥
शू..द्यस्सततं भक्त्या द्विजवत् पूजयेत् द्विज ।
रामकृष्णादिमन्त्रोक्त संध्यां कृत्वा जपादिकम् ॥१२॥
विप्रार्चि ते विष्णुबिम्बे सहस्त्रं नामभिर्यजेत् ।
आनीयाग्निं विप्रगृहात् तमग्निं स्थण्डिले बुधः ॥१३॥
त्रिकोणप्रोक्त कुण्डे वा मेखलासु चतुष्कृते ।
कुशाक्षतादिभिस्सम्यक् अलंकृत्य हरिं स्मरेत् ॥१४॥
..ष्णमन्त्रेण मतिमान् कुर्यात् त..रि..चनम् ।
चक्रशंखधरं देवं कि..टा.. विभूषितम् ॥१५॥
अग्निमण्डलमध्यस्थं ध्यायेत् य..पतिं हरिम् ।
एवं ध्यात्वा भावयेच्च शूद्र..सर्वसि..ये ॥१६॥
त्रिमेखलासमायुक्तं बुध्वा ध्याना..पूर्वकम् ।
द्विजः कुर्यात् विशेषेण सर्वदा सर्वसिद्धये ॥१७॥
शूद्रा..नां जपे होमे ..र्व..न्त्रेष्वयं विधिः ।

पुरश्चरणकालेच नित्यनैमित्तिकादिषु ॥१८॥
चतुरंगेन विधिना जपेयुश्शूद्रजातयः ।
कृष्णरामनृसिंहादि ह्यष्टाक्षरमथापि वा ॥१९॥

चतुरंगं जप [illegible]

जपश्च तर्पणहोमः पूजाब्राह्मणभोजनम् ।
चतुरंगमिति प्रोक्तं मन्त्रस्य कमलासन ॥२०॥
सदा देवस्य नैवेद्यं शूद्राद्यास्सर्वकर्मसु ।
विष्णुभक्तास्सदाचारा देवब्राह्मणतत्पराः ॥२१॥
विष्णुभक्तियुतैर्विप्रैः शक्त्या कुर्वीत भक्तितः ।
जपस्यैव दशांशेन विधिना विप्रभोजनम् ॥२२॥
भोजयेत् विष्णुभक्तान् वै विष्णुमन्त्रादिसिद्धये ।
पर्वग्रहणकालेषु धनुर्मासे विशेषतः ॥२३॥
प्रत्यहं पूजयेत् यस्तु, सर्वान् कामान् लभेत् सः ।
मन्त्राणां उत्तमं मन्त्रं एतदेव चतुर्मुख ॥२४॥
सहस्रनामहोमे तु घृतेन तिलतण्डुलैः ।
महतीं श्रियमाप्नोति शत्रुनाशे भवेत् सदा ॥२५॥
अपामार्ग समिद्धोमात् शत्रुरोगौ विनश्यतः ।
सहस्रनामपठनादर्चनादपि मानवः ॥२६॥
विष्णुसायुज्यमाप्नोति पापिष्ठ[illegible] च महान् भवेत् ॥२७॥

जीवन्मुक्तस्स एवस्यात् मुमुक्षुस्स जितेन्द्रियः ।
सहस्रनाममूर्तीनां विष्णुरूपं स्मरन् सदा ॥२८॥
कुर्यात्द्विजादिस्सम्यक् वै तस्मादेव चतुर्मुख ।
यजेत् स्मरेत् अन्यथा वै तस्यायुः श्रीश्च नश्यति ॥२९॥
तच्चनिष्फलितं कर्म तस्य वंशक्षयो भवेत् ।
तस्मात् सर्वप्रयत्नेन एतदुक्तविधानतः ॥३०॥
श्रीसहस्रनामभिः गौणं मुख्यं कृष्णादिकं जपेत् ।
मुमुक्षुर्विष्णुभक्तश्च प्रपन्नश्च विशेषतः ॥३१॥

इति श्रीपांचरात्रे पराशरसंहितायां विशिष्ठपरमधर्मशास्त्रे पञ्चमोऽध्यायः

अथ षष्टोऽध्यायः

मन्त्रदीक्षा

श्रीपराशर उवाच-

अथ वक्ष्येसुविधिवत् मन्त्रदीक्षाविधिं क्रमात् ।
जपार्चनादि सिद्ध्यर्थं श्रुणुष्व कमलासन ॥१॥
द्विजानां शूद्रजातीनां विधिरेष सदा भवेत् ।
अन्येषां च मनुं दद्यात् कलशस्थापनं विना ॥२॥
देशकालादिनियमं अरिमित्रादि शोधनम् ।
पंचसंस्कारदीक्षायां मोक्षार्थी न विचारयेत् ॥३॥

विष्ण्वर्चनादि दीक्षायां स्वयंव्यक्तस्थलादिषु ।
अयनं मास ऋक्षाणि तिथिवारादिकं सदा ॥४॥
अरिमित्रादिकं तद्वत् अर्चको न विचारयेत् ।
विष्णुसायुज्यसिद्ध्यर्थं विष्णु धर्मादिसिद्धये ॥५॥
अभिजिल्लग्नकालेच द्रेक्काणे शोभनांशके ।
भगवन्मन्त्रदीक्षां च कारयेव चतुर्मुख ॥६॥
यजमानगृहे सम्यक् आचार्यस्य गृहेऽपिवा ।
देवालये विमानस्य उत्तरे वा सुबुद्धिमान् ॥७॥
समक्षेत्रे पूर्वदेशे उत्तरे वा समाधिमान् ।
चतुर्द्वारसमोपेतं षोडशस्तम्भसंयुतम् ॥८॥
रम्यं सुमण्डपंकृत्वा मध्ये वेदीं प्रकल्पयेत् ।
अरत्निमात्रं अमलं चतुरश्रं दृढं तथा ॥९॥
तत्पूर्वे चाप्युत्तरे वा कुण्डमेकं विचक्षणः ।
हस्तमात्रप्रमाणेन चतुरश्रं प्रकल्पयेत् ॥१०॥
त्रिमेखलासमायुक्तं षडष्टद्वयंगुलम् ।
ऊर्ध्वादीन् कल्पयेत् धीमान् योनिनाभिसमन्वितम् ॥११॥
विस्तारयां असदृशं समं कृत्वाथ बुद्धिमान् ।

कुण्डालंकारः

सुधाचूर्णैरलंकृत्य गोमयेनानुलेप्य च ॥१२॥
पताकाभिर्वितानकैश्च मण्डपं तोरणादिभिः ।
खारिद्वयं तदर्थं वा धान्यं तद्वेदिकोपरि ॥१३॥

कुण्डस्थापनम्

निधाय कुण्ड तन्मध्ये कलशाष्टक संयुतम् ।
वस्त्रादि परिसंयुतं पंचरत्न पंचपल्लवैः ॥१४॥

कुण्डालंकरणम्

पंचामृतैः पल्लवैः पुष्पैः गन्धाक्षतादिभिः ।
रत्नाद्यैः कूर्चसंयुतं नारिकेळफलादिभिः ॥१५॥
सिंहप्रतिमां कृत्वा शनिष्कप्रमाणतः ।
तदर्धेन तदर्धेन यथाशक्त्यनुसारतः ॥१६॥
कुण्डे तत्प्रतिमां स्थाप्य ज्ञात्वा द्वादशमानतः ।
सुचक्रप्रतिमां कृत्वा कलशेषु क्षिपेत् क्रमात् ॥१७॥
शुद्धतोयेन संपूर्य कुण्डं तत्कलशानि च ॥१८॥

वरणम्

तत्कुण्डस्थापनं कुर्यात् मूलमन्त्रेण सद्गुरुः ।
पूर्वोक्तवैष्णवाचार्यार्थं वरयेत् सदा ॥१९॥
ब्राह्मणानांच संघं तु कल्पयेत् ऋत्विजस्ततः ।

अलंकारः

कुण्डलैः अंगुलीयाद्यैः पट्टवस्त्रादिना तदा ॥२०॥
गुरुस्ततः ऋत्विजादीन् शिष्यश्शक्त्यनुसारतः ।
अलंकुर्यात् गुरुश्चापि तत्कर्म कुरुष्विति ॥२१॥

विष्णुप्रीत्यै मदर्थं च नमस्कृत्वाभिवाद्य च ।
शिष्यःकुर्यात्तदा एव एवमुक्तविधानतः ॥२२॥

वेदपारायणम्

तत्कर्माचरणं कुर्यात् गुरुस्तद्वद्विजैस्सह ।
वेदपारायणैस्स्तोत्रैः पुराणाद्यैश्च वैष्णवैः ॥२३॥
भाषागानैर्महावाद्यैः कुम्भस्थापनमाचरेत् ।
एतद्गुरोस्समीपेवै शिष्यालंकारसंयुतः ॥२४॥

पुण्याहांकुरार्पणौ

ततः कुर्वीत पुण्याहं अंकुरार्पणकर्म च ।
पूर्वेद्युराचरेदेवं तदा सन्मन्त्रविद्गुरुः ॥२५॥
कुम्भे नृसिंहमावाह्य प्राणस्थापनमार्गतः ।
न्यासध्यानादिसंयुक्त मन्त्रराजेन सादरम् ॥२६॥
चक्रमुद्रां प्रदृश्याथ मन्त्रराजं सुभक्तितः ।
अष्टोत्तरसहस्त्रं वै जप्त्वा मूलमनुं तथा ॥२७॥
वासुदेवं विष्णुमनुं पुंसूक्तं दशवारकम् ।
श्रीभूसूक्तं तथा सम्यक् न्यासध्यानादिसंयुतम् ॥२८॥
सहस्त्रनामपठनमेकवारं जपेत्तदा ।
तदा तण्डुलवेद्यां तु खारीमात्रे तदर्थकैः ॥२९॥
षोडशैरुपचारैश्च पूजयेत् विष्णुमादरात् ।
पश्चात् होमं प्रकुर्वीत घृतेन होमः चरुपायसैः ॥३०॥

पलाशौदुम्बराश्वत्थैः अपामार्गैश्च लाजकैः ।
तिलैश्च घृतसंयुक्तं अयुतं घृत तण्डुलैः ॥३१॥
अष्टोत्तरसहस्रं वा शतं अष्टोत्तरं तु वा ।
अष्टाविंशतिभिर्वाथ कुर्याद्वाथाहुतित्रयम् ॥३२॥
द्वयेन मूलमन्त्रेण कुर्यात् होमं इमं सदा ।
पुंश्रीभूसूक्तकैस्सम्यक् घृतेन जुहुयात् गुरुः ॥३३॥

पूर्णाहुतिः

प्रायशिचित्तादिकं हुत्वा इद्माधानादिपूर्वकम् ।
पूर्णाहुतिं ततः कृत्वा तदा गुर्वादि रुत्विजैः ॥३४॥
मन्त्रतन्त्रादिकुशलस्सात्त्विकोऽथ गुरुश्शुचिः ।

अभिषेकः

ततः कुण्डं समानीय कलशैस्सह सादरम् ॥३५॥
पुंसूक्तेनैव मूलेन मनुना संस्मरन् हरिम् ।
श्रीभूसूक्तद्वयेनैव मन्त्ररत्नेन मन्त्रवित् ॥३६॥
तारकब्रह्ममन्त्रेण मन्त्रराजेन संस्मरन् ।
विष्णुना च षडर्णेन वासुदेवाख्यविद्यया ॥३७॥
नृत्यैर्गीतर्महावाद्यैः तं शिष्यं अभिषेचयेत् ।
सशिष्यश्शुक्लवस्त्रादीन् अलंकारं यथोचितम् ॥३८॥

शिष्यप्रार्थना

धृत्वा शालां प्रविश्याथ होमकुण्डसमीपगः ।
गुरुं नत्वा सदा सम्यक् प्रार्थयेत् भक्तिमार्गतः ॥३९॥
विष्णुसायुज्यसिद्ध्यर्थं नित्यकर्मादिसे .ये ।
विष्णवर्चना सुदीक्षां च पंचसंस्कारमार्गतः ॥४०॥
दत्वानुज्ञां रक्ष रक्ष विष्णुप्रीत्यै च मां ततः ।
होमकुण्डसमीपे तु स्थित्वा पद्मासने गुरुः ॥४१॥
तथा च प्राङ्मुखो भूत्वा गुरोर्दक्षिणभागके ।
शिष्यश्चो .ङ्मुखो भूत्वा वसेदिति निया. तम् ॥४२॥

तप्तचक्रांकनम्

चक्रं शंखं तदा सम्यक् पूजयेन्मन्त्रवि. गुरुः ।
प्रक्षाळ्य चक्रं शंखं तु गव्यैः पंचा. तैश्च सः ॥४३॥
षोडशैरुपचारैश्च नैवेद्यं तं समर्पयेत् ।
पश्चात् तत् होमकुण्डाग्ने चक्रं संखं गुरुश्शुचिः ॥४४॥
तप्तं कृत्वा हरिं ध्यायन् तत् शिष्यस्यैव दक्षिणे ।
भुजमूले गुरून् ध्यात्वा गुरु[illegible] ॥४५॥
यज्ञोपवीतवत्या . चक्रमन्त्रेण तं स्मरन् ।
तत् चक्रं बिम्बवत् ध्यायेत् संखं वामभुजे तथा ॥४६॥
पश्चात् प्रक्षाळ्य चक्रं च शंखं तन्मन्त्रमु. . न् ।

ऊर्ध्वपुण्ड्रादि पंचसंस्कारः

पूर्वोक्तविधिनासम्यक् ऊर्ध्वपुण्ड्रं च धारयेत् ॥४७॥
श्रीमद्विष्णोर्दास्यनाम दद्यात् शिष्याय तद्गुरुः ।
मूलमन्त्रं द्वयं सम्यक् चरमश्लोकमुत्तमम् ॥४८॥
तन्मन्त्रार्थं वदेत् सम्यक् तच्छिष्याय गुरुस्सदा ।
न्यासध्यानादिसहितं मुद्रालक्षणमुत्तमम् ॥४९॥
ततो दद्यात् विष्णुबिम्बं साळग्राममकृत्रिमम् ।
श्रियं भूमिं च नीळां च सुदर्शनमनुत्तमम् ॥५०॥
अनंतं गरुडं चैव विष्वक्सेनं चतुर्मुख ।
नृहरिं पादुकायुगं पद्मपीठं सुनिर्मलम् ॥५१॥
नित्यान् मुक्तान् विष्णुभक्तान् दद्यात् पूजार्थमादरात् ।
तच्छिष्याय गुरुस्साक्षात् विष्णवर्चासिद्धये सदा ॥५२॥
विष्णवर्चा लक्षणं सम्यक् पंचरात्रविधानतः ।
वदेत्तदा मन्त्रतन्त्र भेदं सांगं सुसात्विकम् ॥५३॥
मूलमन्त्रेण विधिना मन्त्ररत्नेन वा तथा ।
तत्तत् विहितमन्त्रेण कुर्यादिति चतुर्मुख ॥५४॥
द्विजानां मुक्तिसिद्ध्यर्थं सर्वेषां च चतुर्मुख ।
तापः पुण्ड्रस्तथा नाम मन्त्रो यागश्च पंचमः ॥५५॥
अमी पंचसंस्काराः परमैकान्तिहेतवः ।
केशवाद्यादि बिम्बानां मत्स्यादीनां तथैव च ॥५६॥

प्राणप्रतिष्ठासिद्ध्यर्थं पूजासिद्ध्यर्थमादरात् ।
नृसिंहरामकृष्णादीन् केशवदीन् मनूंस्तथा ॥५७॥
दिव्ये सैद्धे मानुषे च स्वयंव्यक्तस्थलादिषु ।
सद्विष्णोस्सत्प्रतिष्ठार्थं पूजार्थं तद्गुरुस्सदा ॥५८॥
दद्यात् सद्विष्णोर्मन्त्रं च न्यासध्यानादिसंयुतम् ।
एतद्दीक्षादिकं सम्यक् प्रपन्नश्च विशेषतः ॥५९॥
मोक्षार्थी सर्वदा कुर्यात् विष्णुसायुज्यहेतवे ।
सद्विप्रस्सर्वदा कुर्यात् सर्वबन्धविमुक्तये ॥६०॥
सच्छिष्यस्तत्गुरुं सम्यक् मन्त्रदीक्षाद्यनन्तरम् ।
अलुब्धो भूरि[illegible] यथाशक्ति प्रपूजयेत् ॥६१॥
सहस्रशतनिष्कं वा दद्याद्वै दक्षिणां गुरोः ।
तदर्धं ब्रह्मणे दद्यात् तदर्थं [illegible] क्रमात् ॥६२॥
सर्वेभ्यो भूरिदानं च वैष्णवेभ्यो विशेषतः ।
दद्याच्छक्त्यनुसारेण अन्नदानं सुभक्तितः ॥६३॥
तांबूलं च तथा दद्यात् गन्धमाल्यादिभिस्सह ।
इति संक्षेपतः प्रोक्तं सर्वेषां मुक्तिसिद्धये ।
सत्यं सत्यं पुनस्सत्यं इदमेव चतुर्मुख ॥६४॥

इति श्री[illegible] पराशरसंहितायां विशिष्टपरमधर्मशास्त्रे
षष्टोऽध्यायः

अथ सप्तमोऽध्यायः

श्रीभगवानुवाच-

अथ वक्ष्ये विधानेन पुंसूक्तस्य चतुर्मुख ।
न्यासध्यानादिकं सम्यक् विष्णुपूजादिसिद्धये ॥१॥

पुरुषसूक्तस्य ऋष्यादिलक्षणम्

अस्यश्री पुरुषसूक्तस्य ऋषिर्ब्रह्मेति कथ्यते ।
अनुष्टुप् छन्दः इत्युक्तः पुरुषोदेवता सदा ॥२॥
परब्रह्मपदं चोक्त्वा रूपे नारायणेति च ।
प्रणवादि ततो ब्रह्मन् वदेत् ध्यायन् हरिं तथा ॥३॥
सहस्रशीर्षापुरुष इति बीजं ततः परम् ।
साध्यास्यन्ति परं चोक्त्वा वेदर्चेति क्रमात् द्विजः ॥४॥
ह्रींबीजमिति देहादेक्लीं शक्तिरितिक्रमात् ।
अंकीलकं रं कवचं लभ त्रमिति चोच्चरेत् ॥५॥

ऋग्भिर्न्यासः

श्यामोवर्ण इति प्रोक्तं अ चान्यासं इमं वदेत् ।
प्रणवेन क न्यासं षट्पदैस्सह विन्यसेत् ॥६॥
तान्त्रिकेन षडंगं तु न्यासं कुर्याच्च षट्स्वरैः ।
व्याप्यं तद्व्यापकं कुर्यात् तारबीजेन स द्विजः ॥७॥
प्रथमां विन्यसेत् वामे द्वितीयां दक्षिणेकरे ।
तृतीयां वामपादे तु चतुर्थं दक्षिणे तथा ॥८॥

पंचमं वामजानौतु षष्टिं दक्षिणतस्तथा ।
सप्तमीं वामकटयां तु अष्टमीं दक्षिणे तथा॥९॥
नवमीं नाभिमध्ये तु दशमीं हृदये तथा ।
एकादशीं वामबाहौ [illegible]शीं दक्षिणे तथा ॥१०॥
त्रयो[illegible]शीं कण्ठदेशे आस्यदेशे चतुर्दशीम् ।
अक्ष्णोः पंचद[illegible] षो[illegible]शीं मूर्ध्नि विन्य[illegible]त् ॥११॥
एवं न्यासविधिं कृत्वा पं[illegible] समाचरेत् ।
प्रा[illegible]चत्ते जपे चैव [illegible] तथा ॥१२॥

पुंसूक्त जपः

सर्वालंकारसंयुक्त सर्वायुधधरं विभुम् ।
विष्णुं तद्वासुदेवं तं नारायणमना[illegible]यम् ॥१३॥
ऋतं सत्यं परं ब्रह्म पुरुषं कृष्णपिंगळम् ।
ऊर्ध्वरेतं [illegible] विश्वरूपाय वै नमः ।
इति ध्यानं तथा कृत्वा पुंसूक्तजपमाचरेत् ॥१४॥
[illegible] अयुतं जपमाचरे[illegible] ।
सर्वपापविनाशार्थं विष्णुसायुज्यसि[illegible]ये ॥१५॥
महापापयुतो विप्रः पुं[illegible] ।
धर्मकामार्थमोक्षार्थं एतदेव जपेत् द्विजः ॥१६॥
तन्मन्त्रफलसिद्[illegible] य[illegible] जपेत् द्विजः ।
कर्पूरच[illegible]नेनैव सहस्रं तर्पयेत्तथा ॥१७॥

तिलैर्वा पायसेनैव अपामार्गैरुदुम्बरैः ।
तथा गोघृत सम्मिश्रं होमं कुर्यात् सहस्त्रकम् ।।१८।।

पुरुषसूक्तजपफलम्

रोगाद्युपद्रवोपेतो दक्षिणाद्यैस्तथा द्विजः ।
मोक्षेत्रृक्षेप्यनुज्ञातेसुपुत्रप्रापणेपि च ।।१९।।
सर्वकामफलावाप्तौ आरोग्ये मृत्युनाशने ।
चातुरंगविधानेन जपमेतत् समाचरेत् ।।२०।।
मोक्षार्थी विष्णुपूजायां एकवारं जपेत् सदा ।
योऽनूचानो द्विजोमर्त्यो हतवानर्थलोभतः ।।२१।।
स जपेत् पौरुषं सूक्तं जलस्थश्चिन्तयेत् हरिम् ।
पुंसूक्तन्यासमन्त्रेण विष्णुरूपी भवेत् द्विजः ।।२२।।
किमुताल्पफलान् भोगान् पुंसूक्तस्य फलस्य च ।
पुंसूक्तस्य च माहात्म्यं वक्तुं श्रोतुं सुदुर्लभम् ।।२३।।
देवतानां ऋषीणां च सत्यमेव चतुर्मुख ।।२४।।

इति श्रीपांचरात्रे पराशरसंहितायां विशिष्टपरमधर्मशास्त्रे
सप्तमोऽध्यायः

अथ अष्टमोऽध्यायः

श्रीभगवानुवाच-

श्रीसूक्तस्य तथा वक्ष्ये न्यासध्यानादिकंक्रमात् ।

श्रीविष्णोरर्चनार्थाय द्विजानां मुक्तिसिद्धये ॥१॥

श्रीसूक्तस्य ऋष्यादिलक्षणम्

श्रीसूक्तस्य च मन्त्रस्य ऋषिर्ब्रह्मा तथैव च ।
छन्दोऽनुष्टुप् देवता च विष्णुपत्नीपदं ततः ॥२॥
महालक्ष्मीं देवतेति वदेत् बीजमिदं ततः ।
शक्ति श्रीमते चोक्त्वाथ ऐं किलकमतः परम् ॥३॥
कवचं मूलमन्त्रं च रक्तो वर्ण इति स्मृतः ।
श्रीमन्नारायणायेति प्रीत्यर्थेति पदं ततः ॥४॥
विनियोगपदं चोक्त्वा मन्त्रन्यासं समाचरेत् ।
ओं ह्रीमिति द्विजश्चोक्त्वा षट्स्वरैस्सहमन्त्रवित् ॥५॥
करन्यासं षडंगं च कुर्याल्लक्ष्मीपतिं स्मरन् ।
व्याप्यं तत्व्यापकं चैव ह्रीं श्रीमिति च विन्यसेत् ॥६॥

ध्यानम्

ध्यात्वासुरभिमुद्रां च पद्ममुद्रां तथैव च ।
पद्मप्रिये पद्मिनि पद्महस्ते पद्मालये पद्मदळायताक्षी ।
विश्वप्रिये विष्णुमनोनुकूले त्वत्पादपद्मं मयि सन्निधत्स्व ॥७॥

श्रीसूक्तजपः

विष्णुपत्नीं विशेषेण ध्यात्वा हृत्पंकजे तथा ॥८॥
प्रथमं मन्त्रसिद्ध्यर्थं श्रीसूक्तं अथुतं जपेत् ।

विष्णुसायुज्यसिद्ध्यर्थं विष्णुश्रीपूजनाय च ॥९॥
धर्मकामादि मोक्षार्थं सहस्रं तर्पयेत्ततः ।
चन्दनागरुकर्पूर कस्तूरीकुंकुमान्वितम् ॥१०॥

श्रीसूक्त होमः

सहस्रपद्मं जहुयात् मधुना गोघृतेन च ।
महतीं श्रीमवाप्नोति इहैव द्विजसत्तम ॥११॥
तिलहोमं गोधृतेन राज्यार्थी कारयेत् तदा ।
सर्वसिद्धावपामार्गे घृतेन च हुनेत्तथा ॥१२॥
हेमपुष्पैर्बिल्वपत्रैः वकुळैस्तुळसीदळै ।
लक्ष्म्यालिंगितं विष्णुं वै पूजयेत् सुसहस्त्रकम् ॥१३॥
तथा श्रीविष्णुभक्तान् वै पूजयेत् होमसंख्यया ।
श्रीसूक्तस्य जपादेव प्राप्नोत्यैश्वर्यसंपदः ।
विष्णुसायुज्यमाप्नोति सत्यं सत्यं चतुर्मुख ॥१४॥

इति श्रीपांचरात्रे पराशरसंहितायां विशिष्टपरमधर्मशास्त्रे अष्टमोऽध्यायः

अथ नवमोऽध्यायः

श्रीभगवानुवाच—

अथ वक्ष्ये विधानेन भूसूक्तस्य तथा क्रमात् ।
श्रीभूनीळासमेतस्य प्रतिष्ठाद्यादि सिद्धये ॥१॥

भूसूक्तस्य ऋष्यादयः

विष्णुसायुज्यसिद्ध्यर्थं प्रपन्नानां च सर्वदा ।
श्रीमत्भूसूक्तमन्त्रस्य ऋषिर्विष्णुस्तथैव च ॥२॥
गायत्री छन्द इत्युक्ता विष्णुपत्नी मही क्रमात् ।
देवता च तथा चोक्त्वा लं बीजमिति चोच्चरेत् ॥३॥
ह्रीं शक्तिः कीलकं ह्रच्च ततः श्रीं कवचं भवेत् ।
ऐं अस्त्रमिति चोक्त्वाथ श्यामो वर्ण इति स्मृतः ॥४॥
ओमैमिति बीजस्सम्यक् करन्यासं षडंगकम् ।
षट्स्वरस्तु तथा कृत्वा व्याप्यं तत् व्यापकं ततः ॥५॥
ओमैमिति तथा कृत्वा भूनाथं संस्मरेत् हृदि ।
धेनुमुद्रां प्रदश्यैव मुद्रां श्रीवत्सकं तथा ॥६॥
विष्णुपत्नीं महीं देवीं माधवीं माधवप्रियाम् ।
लक्ष्मीप्रियसखीं देवीं नमाम्यच्युतवल्लभाम् ॥७॥
श्रीभूनाथं हरिं ध्यात्वा शुक्ले तत्पंकजेपि च ।
प्रथमं मन्त्रसिद्ध्यर्थं जपदयुतसंख्यया ॥८॥
पुष्पचन्दनकस्तूरी सहितं तद्दशांशकम् ।
कर्पूरकुंकुमैर्युक्तं गोक्षीरेणैव तर्पयेत् ॥९॥
तिलव्रीहीस्तथा लाजान् गोघृतेन यजेत्ततः ।
सुगन्धकुसुमैस्सम्यक् अर्चयेत्तत् तत्क्रमेण च ॥१०॥
भोजयेत् वैष्णवान् तद्ववन्मुख्यान् षड्रससंयुतम् ।

भूमिसूक्तजपादेव देवराज्यं लभेत वा ॥११॥
विष्णुसायुज्यसिद्ध्यर्थं धर्मकामार्थसिद्धये ।
एतत् क्रमेण विप्रेन्द्र एतत् सद्वैष्णवोत्तमः ॥१२॥
श्रीभूनीळाप्रतिष्ठादीन् कुर्यात् मोक्षार्थचिन्तकः ।
जपहीनप्रतिष्ठा च सर्वनाशकरी भवेत् ॥१३॥

इति श्रीपांचरात्रे पराशरसंहितायां विशिष्टपरमधर्मशास्त्रे नवमोऽध्यायः

अथ दशमोऽध्यायः

श्रीभगवानुवाच-
नीळासूक्तं तथा वक्ष्ये न्यासध्यानादि संयुतम् ।
श्रीभूनीळाप्रतिष्ठार्थं विष्णुपूजादिसिद्धये ॥१॥

नीळासूक्तस्य ऋष्यादयः

नीळासूक्तस्य मन्त्रस्य ऋषिर्ब्रह्मेति कथ्यते ।
त्रिष्टुप्छन्द इति प्रोक्तो देवता च हरिप्रिया ॥२॥
नीळा साध्वी विष्णुपत्नी तुलसीवासरूपिका ।
ई बीजं शक्तिः क्लीम् चोक्त्वा ह्रीं कीलकमितीरितम् ॥३॥
ईमैमिति षड्स्वरैश्च करन्यासं षडंगकम् ।
कुर्यात् व्याप्यं व्यापकं तु विभुं विष्णुं स्मरन् सदा ॥४॥

श्रीभूनीळासमेतं वै जपार्चादिषु संस्मरेत् ।
इमित्येकाक्षरं सम्यक् नीळाबीजं भवेत् सदा ॥५॥
यदीगं् श्रुणोत्यलकगं श्रुणोति ।
नहि प्रवेदसुकृतस्य तस्यपन्थामिति ।
विष्णुसायुज्यसिद्ध्यर्थं वेदेप्येतद्सुनिश्चितम् ।
इषेत्वेत्यनुवाकं वै नीळा सूक्तं भवेत् सदा ॥६॥
लक्ष्मीबीजं श्रीं ह्रीमिति भवेदत्र न संशयः ।
भूबीजं श्रीमित्युक्त्वा सर्व वेदेषु चादरात् ॥७॥
ह्रीश्च ते लक्ष्मीश्च पत्न्यौ इति सम्यक्विधिर्भवेत् ।
हिरण्यवर्णां इत्युक्त्वा श्रीसूक्तं सर्वदा भवेत् ॥८॥

नीळाध्यानम्

द्विजानां मुक्तिदं च स्यात् एतत् सूक्तं चतुष्टयम् ।
तस्मात् जपेत् सदा ब्रह्मन् नीळासूक्तं विधानतः ॥९॥
तुळसीं विष्णुपत्नीं वै भद्रां कमलासखीम् ।
नमामि सततं देवीं विष्णुवक्षस्थले स्थिताम् ॥१०॥
इति ध्यात्वा हृदि सदा श्रीभूनीळापतिं हरिम् ।
नीळासूक्तं भवेत् भक्त्या तत् बीजं अयुतं जपेत् ॥११॥
माक्षिकं चन्दनोपेतं कर्पूरं शुद्धवारिणा ।
तर्पणं तद्दशांशं च सुगन्धकुसुमैस्सह ॥१२॥

तुळसीदळैः पूजयेत् वै हेमपुष्पैश्च पंचकैः ।
तत्संख्यया पायसेन गोघृतेन तिलैर्हुजेत् ॥१३॥
भोजयेत् षड्रसोपेतं विष्णुभक्तान् सदा द्विजः ।
प्रपन्नः परमैकान्ती कुर्यादेतत् चतुर्मुख ॥१४॥
विष्णुसायुज्यसिद्ध्यर्थं धर्मकामार्थ सिद्धये ।
अष्टैश्वर्यादि सिद्ध्यर्थं सन्तानानां च सिद्धये ॥१५॥
श्रीभूनीळापतिं देवं वासुदेवं परात्परम् ।
प्रतिष्ठाप्य विधानेन अर्चयेद्यावदायुषम् ॥१६॥
अन्यथा यः करोत्येवं तस्यायुश्श्रीश्च नश्यति ।
सदा रोगानि संप्राप्य स याति नरकं ध्रुवम् ॥१७॥
तस्मात् सर्वप्रयत्नेन जपेन्मन्त्रं सदा गुरुः ।
विष्ण्वर्चका ऋत्विजश्च प्रतिष्ठाद्यादिकर्मसु ॥१८॥
गृहार्चकस्तथा सम्यक् ग्रामार्चातत्परस्ततः ।
जपेत् सूक्तादिकं तस्मात् मोक्षार्थी च चतुर्मुख ॥१९॥

इति श्रीपांचरात्रे पराशरसंहितायां विशिष्टपरमधर्मशास्त्रे
दशमोऽध्यायः

अथ एकादशोऽध्यायः

श्रीभगवानुवाच-

अथ श्रीमूलमन्त्रस्य श्रीमदष्टाक्षरस्य च ।
न्यासध्यानादिकं सर्वं वक्ष्ये सम्यग्विधानतः ॥१॥
विष्णुसायुज्यसिद्ध्यर्थं सर्वेषां वैष्णवानाम् ।
विष्णुप्रतिष्ठासिद्ध्यर्थं विष्णुपूजादिसिद्धये ॥२॥

मूलमन्त्रस्य अंगन्यासादि

ओं नमः पदमुच्चार्य ततो नारायणाय च ।
उद्धरेत् मूलमंत्रं वै भुक्तिमुक्तिप्रदायकम् ॥३॥
अष्टाक्षरस्य मन्त्रस्य नरनारायणेति च ।
ऋषिश्चोक्त्वा ततो देवश्रीमन्नारायणस्तदा ॥४॥
अं बीजं शक्तिरायेति ह्रीं कीलकं अतः परम् ।
श्रीं कवचं ऐं मित्यस्त्रं श्यामो वर्ण इति स्मरेत् ॥५॥
मूलमन्त्रं द्विरुच्चार्य पदषट्कक्रमेण वै ।
ओं श्रीं ह्रीमिति संयुक्तं करन्यासं स मन्त्रवित् ॥६॥
नमःस्वाहा वषट्चेति हुं वौ षडिति च क्रमात् ।
अंगुष्ठादिक निष्ठान्तं कर सम्मार्जनं न्यसेत् ॥७॥
ज्ञानाय हृदयायेति हृदि ज्ञानाख्य मुद्रया ।
ऐश्वर्यायेति शिरसि विन्यसेत् ज्ञानमुद्रया ॥८॥

शक्त्यै शिखायै तद्वच्च शिखास्थाने तथा क्रमात् ।
बलाय कवचायेति तथा बाह्वोर्न्यसेत् बुधः ॥९॥
तेजसे नेत्राभ्यामिति नेत्रयोर्ब्रह्ममुद्रया ।
वीर्यायास्त्राये इति च दशदिक्षु स मन्त्रवित् ॥१०॥
मूलमन्त्रकरन्यासं बीजमन्त्र पदैस्सह ।
हृदयादि क्रमात् कृत्वा षडंगन्यासमुत्तमम् ॥११॥
मूलमन्त्रं समुच्चार्य व्याप्यं तत् व्यापकं न्यसेत् ।
पंचांगं स्यात्यतीनां तु न्यासमूलादिना सह ॥१२॥
चक्रशंख गदा पद्म मुद्रास्सम्यक् प्रदर्शयेत् ।
श्रीभूनीळाधिपं देवं हृदि नारायणं स्मरेत् ॥१३॥
चक्रशंख गदापद्मधरं नीलोत्पलप्रभम् ।
पुण्डरीकाक्षममलं किरीटादि विभूषितम् ॥१४॥
श्रीभूमिसहितं देवं पंकजासनसंस्थितम् ।
नारायणं देवं नारायणमुपास्महे ॥१५॥
सदा विष्णुप्रतिष्ठायां अर्चनादिषु कर्मसु ।
एतन्न्यासादिकं कुर्यात् सर्वदा कमलासन ॥१६॥
प्रपन्नः परमैकान्ती विष्णुसायुज्यसिद्धये ।

द्वयमन्त्रलक्षणम्

द्वयस्य प्रणवस्यैव अकारस्य चतुर्मुख ॥१७॥
मूलमन्त्रस्य ऋष्यादि न्यासं ध्यानं च कल्पयेत् ।

द्वयमन्[illegible]पदानि संयोज्यैव षडंगकम् ॥१८॥
अष्टाक्षरस्य यत्सर्वं भवेत् द्वयजपार्चने ।
अकारस्य च मूलस्य प्रणवस्य द्वयस्य च ॥१९॥
मन्त्रबेदं देवभेदं नास्ति सत्यं चतुर्मुख ।
पुरश्चरण[illegible]मादीन् मूलमन्त्रस्य चाचरेत् ॥२०॥
द्वयस्य प्रणवस्यैव अकारस्य च तत् भवेत् ।
पुं सूक्तविनियोगादि मूलमन्त्रस्य कल्पयेत् ।
नित्यं नैमित्तिकं कार्यं मोक्षार्थी च चतुर्मुख ॥२१॥

इति श्रीपांचरात्रे पराशरसंहितायां विशिष्टपरमधर्मशास्त्रे एकादशोऽध्यायः

अथ [illegible]दशोऽध्यायः

श्रीभगवानुवाच-

अथ वक्ष्ये विधानेन सर्वेषां मुक्तिस[illegible]ये ।
अकारादि क्षकारान्तं अक्षरार्थादिदैवतम् ॥१॥

अक्षराणां ऋ[illegible]दि

ऋष्या[illegible]न्याससममलं [illegible]ये ।
सर्वं [illegible] ब्रह्मन् इति वेदेषु निश्चितम् ॥२॥
क्रमाद्वक्ष्ये च तत्सर्वं सर्वं विष्णुमयं जगत् ।
[illegible] मुक्तिस[illegible]ये ॥३॥

उपासनार्थं भक्तानां श्रीविष्णुस्थापनाय च ।
सर्वाक्षयर्थं श्रीविष्णुं ज्ञात्वा वेदादिकं पठेत् ॥४॥
आचारं च ततः कुर्यात् श्रीविष्णोस्थापनादिकम् ।
[illegible]क्षे विशेषेण द्विजानां ज्ञानसिद्धये ॥५॥
ज्ञानान्मोक्षो भवेत्तस्य ह्यक्षराद्याधिदैवतम् ।
अकारस्य ऋषिर्ब्रह्मा गायत्री छन्द उच्यते ॥६॥
देवो नारायणश्श्रीमान् सत्यकामः परायणः ।
अं बीजं शक्ति रीं चैव ह्रीं कीलकमिति स्मृतम् ॥७॥
श्रीं कवचं ऐमित्यस्त्रं श्यामो वर्ण इति स्मृतः ।
षड्स्वस्तु करन्यासं षडंगन्यासं आचरेत् ॥८॥
शंखचक्रगदापद्मधरं नीलोत्पलप्रभम् ।
पुण्डरीकाक्षममलं किरीटादि विभूषितम् ॥९॥
श्रीभूमिसहितं देवं पंकजासनसंस्थितम् ।
[illegible] देवं नारायणमुपास्महे ॥१०॥
पुरश्चरणकं सर्वं पुंसूक्तोक्तवदाचरेत् ।
आकारस्य ऋषिर्ब्रह्मा गायत्री छन्द उच्यते ॥११॥
देवता विष्णुपत्नी वै महालक्ष्मीति कथ्यते ।
अं बीजं शक्ति रीं चैव कीलकं श्रीं तथैव च ॥१२॥
श्रीं कवचं ऐमित्यस्त्रं रक्तो वर्ण इति स्मृतः
षड्स्वरैस्तु करन्यासं भवेत् श्रीसूक्तवत् क्रमात् ॥१३॥

इकारे करयोश्चैव ईकारस्य तथैव च ।
उकारस्य ऋकारस्य लृकारस्य ततः क्रमात् ॥१४॥
ऐकारस्य तथा ब्रह्मन् औकारस्यैवमुत्तमम् ।
श्रीलक्ष्मीदेवता प्रोक्ता ऋषिन्यासादिकं तथा ॥१५॥
अकारादि त्रयस्सम्यक् श्रीभूनीळेति कीर्तिताः ।
ऐकारान्तमुकारादि देव्यष्टमहिषी स्मृता ॥१६॥
तत्तदक्षरमन्त्रे तु ज्ञात्वैतत् ध्यानमाचरेत् ॥१७॥
औकारौकारयोश्चैव अंकारस्य चतुर्मुख ।
अःकारस्य तथा सम्यक् भवेत् सत्यं अकारवत् ॥१८॥
देवो विष्णुस्तथा प्रोक्तः ऋषिर्न्यासादिकं क्रमात् ।
न्यासध्यानादिकं सर्वं अकारस्य यथा चरेत् ॥१९॥
लक्ष्मीविशिष्टमोंकारमौकारं च तथैव च ।
अकारादि हकारान्तं उक्तमेवं चतुर्मुख ॥२०॥
ककारादि क्षकारान्तं वक्ष्ये तद्वद्विशेषतः ।
ककारस्य ऋषिर्ब्रह्मा गायत्री छन्द उच्यते ॥२१॥
देवता केशवः प्रोक्तः ळं बीजं शक्तिरीं ततः ।
न्यासध्यानादिकं सर्वं षडंगं च अकारवत् ॥२२॥
खकारस्य ऋषिर्ब्रह्मा गायत्री छन्द उच्यते ।
देवो नारायणः प्रोक्तः कं बीजं शक्ति रीं ततः ॥२३॥
गकारस्य ऋषिर्ब्रह्मा छन्दोनुष्टुप् तथैवच ।
देवता माधवः प्रोक्तो गं बीजं शक्ति रीं ततः ॥२४॥

घकारस्य ऋषिर्धाता छन्दोनुष्टुप्तथैव च ।
गोविन्दो देवता प्रोक्तो घं बीजं शिक्ति रीं ततः ॥२५॥
ङकारस्य ऋषिर्ब्रह्मा त्रिष्टुप् चन्द उदाहृतः ।
श्रीविष्णुर्देवता प्रोक्तो ङं बीजो शक्ति रीं ततः ॥२६॥
चकारस्य ऋषिर्व्यासो गायत्री छन्द उच्यते ।
पुरश्चरणकेचैव देवता मधुसूदनः ॥२७॥
चं बीजं शक्ति रीं चैव ज्ञात्वा गुरुमुखात् चरेत् ॥२८॥
छकारस्य ऋषिर्ब्रह्मा चानुष्टुप् छन्द उच्यते ।
त्रिविक्रमो देवता च छं बीजं शक्ति रीं ततः ॥२९॥
जकारस्य ऋषिर्धाता पंक्तिश्छन्द उदाहृतः ।
वामनो देवता सम्यक् जं बीजं शक्ति रीं ततः ॥३०॥
झकारस्य ऋषिर्धाता गायत्री छन्द उच्यते ।
श्रीधरो देवता प्रोक्तो झं बीजं शक्ति रीं ततः ॥३१॥
ञकारस्य ऋषिर्गार्ग्यो गायत्री छन्द उच्यते ।
हृषीकेशो देवता च ञं बीजो शक्ति रीं ततः ॥३२॥
टकारस्य ऋषिर्ब्रह्मा त्रिष्टुप् छन्द उदाहृतः ।
देवता पद्मनाभो वै टं बीजं शक्ति रीं ततः ॥३३॥
ठकारस्य ऋषिर्धाता गायत्री छन्द उच्यते ।
दामोदरो देवता तु ठं बीजं शक्ति रीं ततः ॥३४॥
डकारस्य ऋषिर्धाता गायत्री छन्द उच्यते ।
संकर्षणो देवता च टं बीजं शक्ति रीं ततः ॥३५॥

ढकारस्य ऋषिर्ब्रह्मा जगती छन्द उच्यते ।
देवता वासुदेवो वै ढं बीजं शक्ति रीं ततः ॥३६॥
णकारस्य ऋषिर्धाता गायत्री छन्द उच्यते ।
प्रद्युम्नो देवता चैव णं बीजं शक्ति रीं ततः ॥३७॥
तकारस्य ऋषिर्धाता पंक्तिश्छन्द उदाहृतः ।
अनिरुद्धो देवता वै तं बीजं शक्ति रीं ततः ॥३८॥
थकारस्य ऋषिर्गार्ग्यो गायत्री छन्द उच्यते ।
पुरुषोत्तमो देवता च थं बीजं शक्ति रीं ततः ॥३९॥
दकारस्य ऋषिर्व्यासो गायत्री छन्द उच्यते ।
अधोक्षजो देवता च दंबीजं शक्ति रीं ततः ॥४०॥
धकारस्य ऋषिर्व्यासो जगती छन्द उच्यते ।
नारसिंहो देवता वै धं बीजं शक्ति रीं ततः ॥४१॥
नकारस्य ऋषिर्ब्रह्मा त्रिष्टुप्छन्दो उदाहृतः ।
अच्युतो देवता प्रोक्तो नं बीजं शक्ति रीं ततः ॥४२॥
पकारस्य ऋषिर्व्यासो गायत्री छन्द उच्यते ।
जनार्दनो देवता वै पं बीजं शक्ति रीं ततः ॥४३॥
फकारस्य ऋषिर्गार्ग्यो गायत्री छन्द उच्यते ।
उपेन्द्रो देवता प्रोक्तः फं बीजं शक्ति रीं ततः ॥४४॥
बकारस्य ऋषिर्ब्रह्मा गायत्री छन्द उच्यते ।
श्रीहरिर्देवता प्रोक्तो बं बीजं शक्ति रीं ततः ॥४५॥
भकारस्य ऋषिर्व्यासो गायत्री छन्द उच्यते ।

श्रीकृष्णोदेवता प्रोक्तो भं बीजं शक्ति रीं ततः ॥४६॥
मकारस्य ऋषिर्व्यासो गायत्री छन्द उच्यते ।
नारायणो देवता च मं बीजं शक्ति रीं ततः ॥४७॥
यकारस्य ऋषिर्धाता त्रिष्टुप् छन्द उदाहृतः ।
सुदर्शनो देवता वै यं बीजं शक्ति रीं ततः ॥४८॥
रकारस्य ऋषिर्ब्रह्मा गायत्री छन्द उच्यते ।
नारयणो देवता वै रं बीजं शक्ति रीं ततः ॥४९॥
लकारस्य ऋषिर्धाता जगती छन्द उच्यते ।
विष्णुपत्नी देवता वै लंबीजं शक्ति रीं ततः ॥५०॥
वकारस्य ऋषिर्ब्रह्मा गायत्री छन्द उच्यते ।
नारायणो देवता वै वं बीजं शक्ति रीं ततः ॥५१॥
शकारस्य ऋषिर्व्यासो जगती छन्द उच्यते ।
रंगनाथो देवता वै शं बीजं शक्ति रीं ततः ॥५२॥
षकारस्य ऋषिर्व्यासो गायत्री छन्द उच्यते ।
देवता वै जगन्नाथः षं बीजं शक्ति रीं ततः ॥५३॥
सकारस्य ऋषिर्ब्रह्मा गायत्री छन्द उच्यते ।
सूर्यनारायणो देवः संबीजं शक्ति रीं ततः ॥५४॥
हकारस्य ऋषिर्व्यासो गायत्री छन्द उच्यते ।
हंसरूपी हरिर्देवो हं बीजं शक्ति रीं ततः ॥५५॥
ळकारस्य ऋषिर्गार्ग्यो जगती छन्द उच्यते ।
देवता जलदेवो वै ळं बीजं शक्ति रीं ततः ॥५६॥

क्षकारस्य ऋषिर्ब्रह्मा गायत्री छन्द उच्यते ।
नृसिंहो देवता प्रोक्तः क्षं बीजं शक्ति रीं ततः ॥५७॥

अक्षराणां देवतादि ॥नफलम्

अ॰॥रादि क्षका॥तं ज्ञात्वा तद्विधिना सदा ।
वेदशास्त्रपुराणादि मन्त्रादीन् अभ्यसेत् सुचिः ॥५८॥
प्रपन्नः परमैकान्ती मोक्षार्थी च वि॰षतः ।
का॰॥र्थी विधिवत् सम्यक् ॥जाद्यः ॰र्वकर्मसु ॥५९॥
विष्णुसायुज्यसिद्ध्यर्थं धर्मकामार्थसि॰ये ।
ज्ञात्वाप्यक्षरदेवादीन् गुरुणा भ॥॰र्पतः ॥६०॥
एतदक्षरदेवादीन् अज्ञात्वा यो द्विजोत्तमः ।
वेद॥॥कं सर्वं मन्त्रादीन् अभ्यसेत् सदा ॥६१॥
स एव राक्षस॥॥ ॰र्वकर्मसु सर्वदा ।
स एव जाति चण्डाळस्स याति नरकं ध्रुवम् ॥६२॥
त॰॥त् सर्वात्मना ब्रह्मन् सर्वदा ॰र्वकर्मसु ।
अन्तर्बहि॥॥ वे॥॥ पाठके ॥६३॥
अकारादि क्षकारन्तं देवतादीन् स्मरेत् शुचिः ।
सत्यं सत्यं पुनस्सत्यं इदमेव ॰तुर्मुख ॥६४॥

इति श्रीपांचरात्रे पराशरसंहितायां विशिष्टपरमधर्मशास्त्रे द्वादशोऽध्यायः

अथ त्रयोदशोऽध्यायः

केशवादि चतुर्विंशतिमूर्तीनां मन्त्रादिलक्षणम्

श्रीभगवानुवाच-

केशवादि चतुर्विंशमूर्तीनां मन्त्रलक्षणम् ।
न्यासध्यानादि सहितं वक्ष्ये सम्यक् विधानतः ॥१॥
केशवाद्यादि मूर्तीनां प्रतिष्ठानां च सिद्धये ।
सर्वेषां विष्णुसायुज्यसिद्धये च चतुर्मुख ॥२॥
तत्तद्बिम्बप्रतिष्ठायां तप्तद्बिम्बार्चनादिषु ।
तत्तन्मन्त्रं वदेत् ध्यायेत् विष्णुप्रीत्यै सदादरात् ॥३॥
अमन्त्रमर्चकं दृष्ट्वा तथा भीतो जनार्दनः ।
सर्वं दृष्ट्वा नरो भीत्या क[illegible]येत् च यथा मुहुः ॥४॥
तत्तद्विग्रहमन्त्रादिरहितोऽनर्चकस्स्मृतः ।
अनर्चकाद्विजानीत तीर्थपानं सुरासमम् ॥५॥
प्रसादो मांसतुल्यंस्तु चन्दनं रुधिरं भवेत् ।
मन्त्रसंकरपूजायां आचार्यः पूजकस्सदा ॥६॥
गणकस्स च दण्ड्यस्यात् राजाराष्ट्रं विनश्यति ।
तस्मात् सर्वप्रयत्नेन तत्त[illegible]बिम्बादिपूजने ॥७॥
तत्तन्मन्त्रं सदा ज्ञात्वा तत्कुर्यात् पूजनादिकम् ।
[illegible]हार्चनायां ग्रामे च [illegible]स्थलादिषु ॥८॥

तत्तत् भेदादिमन्त्रादीन् ज्ञात्वा नित्यार्चनां चरेत् ।
भूपानां काम्यसंकल्पे मन्त्रभेदं च कारयेत् ॥९॥
फश्चात् तद्बिम्बशुद्ध्यर्थं संप्रोक्षणमथा चरेत् ।
पश्चात् तद्बिम्बमन्त्रेण नित्यनैमित्तिकं चरेत् ॥१०॥
वेदमन्त्रादिकं सम्यक् तदंगेन नियोजयेत् ।
अंगी विग्रहमन्त्रस्स्यात् अन्यान्यंगानि सर्वदा ॥११॥
वेदमन्त्रादिकं सम्यक् प्रतिष्ठा चक्रिकर्मसु ।
अंगिमन्त्रविहीना अर्चको ब्रह्महा भवेत् ॥१२॥
स वै देवलको नाम सर्वकर्मबहिष्कृतः ।

केशवमन्त्रः

तस्माद्वक्ष्ये केशवादि मूर्तीनां मन्त्रलक्षणम् ॥१३॥
आदौ केशवमन्त्रस्य ऋषिर्ब्रह्मा तथैव च ।
गायत्री छन्द इत्युक्तं केशवो देवता भवेत् ॥१४॥
अं बीजं तु नमस्शक्तिः कीलकं ह्रीमिति स्मृतम् ।
श्रीं कवचं ऐमित्यस्त्रं श्यामो वर्ण इति स्मृतः ॥१५॥
श्रीकेशवस्य प्रीत्यर्थे विनियोगः प्रकाशितः ।
श्रीभूनीळादि बीजैश्च षडक्षरैर्न्यासवित् क्रमात् ॥१६॥
प्रणवेन करन्यासं षडंगं कारयेत् शुचिः ।
व्याप्यं तत् व्यापकं चैव कुर्यात्तन्मान्त्रिकेण च ॥१७॥
शंखचक्रगदापद्मधरं श्रीभूपतिं हरिम् ।
नमामि केशवं देवं सर्वालंकारसंयुतम् ॥१८॥

ओंकारं पूर्वमुच्चार्य केशवाय नमः पदम् ।
भवेत् केशवमन्त्रस्स्यात् भुक्तिमुक्ति प्रदायकः ॥१९॥
नारायणमनोस्तद्वत् पुरश्चरणकं क्रमात् ।
केशवाद्यादिमन्त्राणां अन्यदा वरणादिकम् ॥२०॥

नारायण मन्त्रः

नारायणमन्त्रं वक्ष्ये क्रमादे[illegible] चतुर्मुख ।
प्रणवं पूर्वमुच्चार्य नमो नारायणाय च ॥२१॥
उद्धरेन्मुक्तिदश्चास्य नारायणमनुं शुचिः ।
नारायणस्य मन्त्रस्य नरनारायणौ ऋषी ॥२२॥
छन्दोत्स्य देवी गायत्री देवो नारायणो विभुः ।
अंबीजमित्याय शक्तिः कीलकं ह्रीं चतुर्मुख ॥२३॥
श्रीं कवचं ऐमित्यस्त्रं श्यामो वर्ण इति स्मृतः ।
श्रीभूनीळादिबीजैश्च ष[illegible]न्त्रवित् क्रमात् ॥२४॥
प्रणवेन करन्यासं षडंगं कारयेत् शुचिः ।
व्याप्यं तत् व्यापकं चैव [illegible] कारयेत् ॥२५॥
चक्रशंखगदाप[illegible]म श्रीभूपतिं विभुम् ।
सर्वालंका[illegible]युक्तं नारायणं अहं भजे ॥२६॥
केशवाद्या[illegible] मूर्तीनां रूपभेदं मतान्तरे ।
वर्तते तदपि ग्राह्यं मन्त्रमेव च[illegible]र्मुख ॥२७॥

माधवमन्त्रः

क्रमान्माधवमन्त्रस्तु श्रुणु वक्ष्ये यथाविधि ।
प्रणवं पूर्वमुच्चार्य माधवाय नमोन्तकम् ॥२८॥
उद्धरेन्माधवमनुं भुक्तिमुक्तिप्रदायकम् ।
श्रीमन्माधवमन्त्रस्य ब्रह्माऋषिरुदाहृतः ॥२९॥
गायत्रीछन्द इत्युक्तो माधवो देवता भवेत् ।
ओं बीजं च नमश्शक्तितः कीलकं ह्री[illegible]ति स्मृतम् ॥३०॥
श्रीं कवचं ऐमित्यस्त्रं श्यामो वर्ण इति स्मृतः ।
श्रीभूनीळादि बीजैश्च षड्स्वरैर्मन्त्रवित् क्रमात् ॥३१॥
प्रणवेन करन्यासं षडंगं कारयेत् शुचिः ।
व्याप्यं तत् व्यापकं सम्यक् तन्मन्त्रेणैव कारयेत् ॥३२॥
चक्रशंखगदापद्मधारिणं भूपतिं स्मरेत् ।
किरीटादि विभूषांगं श्रीमाधवं अहं हरिम् ॥३३॥

गोविन्दमन्त्रः

क्रमात् गोविन्दमन्त्रन्तु श्रुणु वक्ष्ये समाहितः ।
ओं गोविन्दायेति पदे स्वाहा[illegible] मनुमुद्धरेत् ॥३४॥
गो[illegible]ख्यं शोभनं स्यात् भु[illegible]म् ।
श्रीमद्गोविन्दमन्त्रस्य ब्रह्मा ऋ[illegible]ः ॥३५॥
छन्दश्च देवी गायत्री गोवि[illegible]ो देवता भवेत् ।
स्वाहा [illegible]क्तिस्ततो बीजं ह्रीं कीलकमिति[illegible]तम् ॥३६॥

श्रीं कवचं ऐमित्यक्षरं श्यामो वर्ण इति स्मृतः ।
श्रीभूनीळादिभीजैश्च षड्स्वरैर्मन्त्रवित् क्रमात् ॥३७॥
प्रणवेन करन्यासं षडंगं कारयेत् शुचिः ।
व्याप्यं तत् व्यापकं चैव तन्मन्त्रेणैव कारयेत् ॥३८॥
चक्रशंखगदापद्मधारिणं वनमाळिनम् ।
सर्वाभरणभूषांगं गोविन्दं तं नमाम्यहम् ॥३९॥

विष्णुमन्त्रः

विष्णुमन्त्रं क्रमाद्वक्ष्ये विष्णवर्चाद्यादि सिद्धये ।
ओं नमः पदमुच्चार्य विष्णवेति पदंततः ॥४०॥
उद्धरेद्विष्णुमन्त्रस्स्यात् भक्तिमुक्तिप्रदायकः ।
अस्य श्री विष्णुमन्त्रस्य ऋषिर्ब्रह्मा भवेत् सदा ॥४१॥
छन्दस्च देवी गायत्री देवता विष्णुरेव हि ।
बीजं ओं वत्ततश्शक्तिः कीलकं ह्रीं तथा भवत् ॥४२॥
श्रीं कवचं ऐमित्यस्त्रं श्यामो वर्ण इति स्मरेत् ।
श्रीभूनीळादिभिश्च षड्स्वरैर्मिन्त्रवित् क्रमात् ॥४३॥
प्रणवेन करन्यासं षडंगंकारयेत् बुधः ।
व्याप्यं तत् व्यापकं सम्यक् तन्मन्त्रेणैव कारयेत् ॥४४॥
चक्रशंकगदापद्मधारिणं श्रीधरं विभुम् ।
नमामि विष्णुं तं देवं सर्वाभरणबूषितम् ॥४५॥

मधुसूदनमन्त्रः

क्रमाद्वक्ष्ये विशेषेण तन्मन्त्रं मधुसूदनम् ।
तारादि वन्हिजायांतं श्रीमधुसूदनाय च ॥४६॥
तद्भुक्तिमुक्तिदं सत्यं ब्रह्मा ःरपि चोदितम् ।
मधुसूदनमन्त्रस्य ब्रह्मा [illegible]हृतः ॥४७॥
छन्दश्च देवी गायत्री देवस्स्यान्मधुसूदनः ।
स्वाहा शक्ति स्तथों बीजं श्रीं कीलकमिति स्मृतम् ॥४८॥
श्रीं कवचं ऐमित्य त्रं श्यामो वर्ण उदाहृतः ।
सर्वालंकारसंयुक्तं वनमालाविभूषितम् ॥४९॥
श्रीभूसमेतं देवेशं नमामि मधुसूदनम् ।

त्रिविक्रममन्त्रः

त्रिविक्रममनुं सम्यक् क्रमाद्वक्ष्ये चतुर्मुख ॥५०॥
त्रिविक्रमस्य मन्त्रस्य ब्रह्माऋषिरुदा तः ।
छन्दश्च देवी गायत्री देवतास्य त्रिविक्रमः ॥५१॥
स्वाहा शक्तिस्तथों बीजं ह्रीं कीलकामितिस्मृ[illegible] ।
श्रीं कवचं ऐमि[illegible]न्त्रं श्यामो वर्ण इति स्मृतः ॥५२॥
श्रीभूनीळा बीजैश्च ष स्वरैर्मन्त्रवित् क्रमात् ।
प्रणवेन करन्यासं षडंगन्यासमुच्चरेत् ॥५३॥
चक्रशंखगदापद्मधारिणं भूपतिं विभुम् ।
सर्वाभरणभूषांगं नमामि श्रित्रिविक्रमम् ॥५४॥

तारादि वह्निजायान्तं त्रिविक्रमयुतं विभुम् ।
भुक्तिमुक्तिप्रदं मन्त्रं त्रिविक्रममथोच्चरेत् ।।५५।।

वामन मन्त्रः

क्रमाद्वामनमन्त्रं वै श्रुणु वक्ष्ये चतुर्मुख ।
प्रणवं पूर्वमुद्धृत्य वामनाय नमोन्तकम् ।।५६।।
उद्धरेत् वामनमनुं भुक्तिमुक्ति प्रदायकम् ।
श्रीमद्वामनमन्त्रस्य ब्रह्मा ऋषिरुदाहृतः ।।५७।।
छन्दश्च देवी गायत्री देवता वामनो भवेत् ।
स्वाहा शक्तिस्तथोंबीजं ह्रीं कीलकं अतः परम् ।।५८।।
श्रीं कवचं ऐमित्यस्त्रं श्यामोवर्ण उदाहृतः ।
श्रीभूनीळादि बीजैश्च षड्स्वरैर्मन्त्रवित् क्रमात् ।।५९।।
प्रणवेनकरन्यासं षडंगं कारयेत् शुचिः ।
व्याप्यं तत् व्यापकं सम्यक् तन्मन्त्रेणैव कारयेत् ।।६०।।
चक्रशंखगदापद्मधारिणं भूरमापतिम् ।
नमामि वामनं देवं सर्वालंकारभूषितम् ।।६१।।

श्रीधरमन्त्रः

वक्ष्ये श्रीधरमन्त्रस्य क्रमादेव चतुर्मुख ।
प्रणवं पूर्वमुच्चार्य श्रीधरायनमोन्तकम् ।।६२।।
स्यात् श्रीधरमनुं सम्यक् उद्धरेत् भक्तिमुक्तिदम् ।
श्रीमत् श्रीधरमन्त्रस्य ब्रह्मा ऋषिरुदाहृतः ।।६३।।

छन्दस्च देवी गायत्री देवता श्रीधरस्स्मृतः ।
ओं बीजं च नमस्शक्तिः कीलकं ह्रीमिति स्मृतम् ॥६४॥
श्रीभूमिनीळा बीजैश्च षडस्वरैर्मन्त्रवित् क्रमात् ।
प्रणवेन करन्यासं षडंगं कार ेत् शुचिः ॥६५॥
व्याप्यं तत् व्या ं सम्यक् तन्मन्त्रैणैव का येत् ।
चक्रशंखगदापद्मधारिणं भूरमापतिम् ॥६६॥
नमामि श्रीधरं देवं सर्वालङ्कारसंयुतम् ।

ृषीकेशमन्त्रः

ृषीके नुं वक्ष्ये क्रमादेव चतुर्मुख ॥६७॥
तारादि वन्हिजायान्तं हृषीकेशाय संयुतम् ।
हृषीकेश मनुं प्रोक्तं उद्धरेत् मुक्तिमुक्तिदम् ॥६८॥
हृषीकेशस्य मन्त्रस्य ऋषिर्व्यासस्तथैव च ।
छन्दश देवी गायत्री हृषीके स्तु देवता ॥६९॥
र्थो बीजं ह्रीं कीलकमिति स्मृतम् ।
श्रीं कवचं ऐमित्यस्त्रं श्यामो वर्ण इति स्मृतः ॥७०॥
श्रीभूनीळादिबीजैश्चषड्स्वरैर्मन्त्रवित् क्रमात् ।
प्रणवेन करन्या ं षडंगं कारयेत् बुधः ॥७१॥
व्याप्यं तत् व्यापकं सम्यक् तन्मन्त्रेणैव कारयेत् ।
शंखचक्रधनुर्बाणधं श्रीभूपतिं विभुम् ॥७२॥

सर्वाभरणशोभांगं हृषीकेशं नमाम्यहम् ।

पद्मनाभ मन्त्रः

पद्मनाभमनुं वक्ष्ये क्रमादेव चतुर्मुख ।।७३।।
ओं नमःपदमुच्चार्य पद्मनाभाय संयुतम् ।
पद्मनाभमनुं मुख्यं उद्धरेत् भुक्तिमुक्तिदम् ।।७४।।
श्रीपद्मनाभमन्त्रस्य ब्रह्मा ऋषिरुदाहृतः ।
छन्दश्च देवी गायत्री पद्मनाभश्च देवता ।।७५।।
ओं बीजं शक्तिरायेति ह्रीं कीलकं इति स्मृतम् ।
श्रीं कवचं ऐमित्यस्त्रं श्यामो वर्ण इति स्मरेत् ।।७६।।
श्रीभूनीळादिबीजैश्च षड्स्वरैर्मन्त्रवित् क्रमात् ।
प्रणवेन करन्यासं षडंगं कारयेत् शुचिः ।।७७।।
व्याप्यं तथैव व्यापकं सम्यक् तन्मन्त्रेणैव कारयेत् ।
चक्रशंखगधाखड्गधरं नाभे च पंकजम् ।।७८।।
किरीटादि विभूषांगं पद्मनाभं नमाम्यहम् ।

दामोदरमन्त्रः

दामोदरमनुं वक्ष्ये क्रमादेव चतुर्मुख ।।७९।।
ओं नमः पदमुच्चार्य दामोदराय संयुतम् ।
दामोदरमनुं सम्यक् उद्धरेत् भुक्तिमुक्तिदम् ।।८०।।
दामोदरस्य मन्त्रस्य ऋषिर्व्यासस्तथा भवेत् ।
छन्दश्च देवी गायत्री देवो दामोदरस्तदा ।।८१।।

ओं बीजमित्यायशक्तिः ह्रीं कीलकं इति स्मृतम् ।
श्रीभूनीळादिबीजैश्च षड्स्वरैर्मन्त्रवित् क्रमात् ॥८२॥
प्रणवेन करन्यासं षडंगं कारयेत् बुधः ।
व्याप्यं तत् व्यापकं सम्यक् तन्मन्त्रेणैव कारयेत् ॥८३॥
चक्रशंखधरं देवं लक्ष्म्यालिंगितवक्षसम् ।
गदाशांर्ग खड्गधरं पद्मपीठोपरि[illegible]थितम् ॥८४॥
सर्वाभरणभूषांगं भक्तैस्सेव्यं जगत्प[illegible]म् ।
नमामि सततं भक्त्या दामोद[illegible]म् ॥८५॥

संक[illegible]:

संकर्षणमनुं वक्ष्ये क्रमादेव चतुर्मु[illegible] ।
तारादिवन्हि[illegible]न्तं संकर्षणाय संयुतम् ॥८६॥
संकर्षणमनुं सम्यक् उद्धरेत् सर्वसि[illegible]दम् ।
संकर्षणस्य मन्त्र[illegible] ऋषिर्गर्ग्यस्तथैव च ॥८७॥
गायत्री छन्द[illegible]त्युक्तो देवस्संकर्षणो भवेत् ।
स्वाहा [illegible]क्तस्तथों बीजं ह्रीं [illegible] स्मृतम् ॥८८॥
श्रीं कवचमैमित्य[illegible] नीलोवर्ण इति स्मृतः ।
श्रीभूनीळा[illegible]बीजैश्च ष[illegible]स्वरैर्मन्त्रवित् क्रमात् ॥८९॥
प्रणवेन करन्यासं षडंगं कारयेत् बुधः ।
चक्रशंखग[illegible]शूलधरं काम[illegible]रूपिणम् ॥९०॥

भजेत् संकर्षणं देवं सर्वकामफलप्रदम् ।
व्याप्यं तत् व्यापकं चैव तन्मन्त्रेणैव कारयेत् ॥९१॥

वासुदेव मन्त्रः

वासुदेवमनुं वक्ष्ये क्रमादेव चतुर्मुख ।
तारं नमो भगवते वासुदेवाय चाच्युतम् ॥ ९२॥
वासुदेवमनुं सम्यक् उद्धरेत् भुक्तिमुक्तिदम् ।
श्रीवासुदेवमन्त्रस्य ब्रह्मा ऋषिरुदाहृतः ॥९३॥
छन्दश्च देवी गायत्री वासुदेवस्तु देवता ।
ओं बीजं शक्तिरायेति ह्रीं कीलकमिति स्मृतम् ॥९४॥
श्रीं कवचं ऐमित्यस्त्रं श्यामो वर्ण उदाहृतः ।
श्रीभूनीळादिबीजैश्च षड्स्वरैर्मन्त्रवित् क्रमात् ॥९५॥
प्रणवेन करन्यासं षडंगं कारयेत् बुधः ।
व्याप्यं तत् व्यापकं चैव तन्मन्त्रेणैवकारयेत् ॥९६॥
सर्वालंकारसहितं देवदेवं परात्परम् ।
श्रीभूनीळाधिपं सत्यं वासुदेवं नमाम्यहम् ॥९७॥

प्रद्युम्नमन्त्रः

वक्ष्ये प्रद्युम्नमन्त्रस्य क्रमादेवचतुर्मुख ।
तारादि वन्हिजायान्तं प्रद्युम्नाय पदान्वितम् ॥९८॥
काम्यादि सर्वफलदं प्रद्युम्नं मनुमुद्धरेत् ।

तथा प्रद्युम्नमन्त्रस्य ऋषिर्गर्ग्यस्तथा भवेत् ॥९९॥
गायत्री छन्द इत्युक्तं प्रद्युम्नो देवता भवेत् ।
स्वाहा शक्तिस्तथों बीजं ह्रीं कीलकमितिस्मृतम् ॥१००॥
श्रीं कवचं ऐमित्यस्त्रं श्यामो वर्ण इति स्मृतः ।
श्रीभूनीळादि बीजैश्च षड्स्वरैर्मन्त्रवित् क्रमात् ॥१०१॥
प्रणवेन करन्यासं षडंगं कारयेत् शुचिः ।
व्याप्यं तत् व्यापकं सम्यक् तन्मन्त्रेणैव कारयेत् ॥१०२॥
चक्रशंखासि शूलादिधरं विद्यादिदायकम् ।
सर्वाभरणभूषांगं प्रद्युम्नं अनिशं भजे ॥१०३॥

अनिरुद्धमन्त्रः

अनिरुद्धमनुं वक्ष्ये क्रमादेव चतुर्मुख ।
तारादिवन्हिजायांतं अनिरुद्धाय संयुतम् ॥१०४॥
अनिरुद्धमनुंचैतत् उद्धरेत् सर्वसाधनम् ।
अनिरुद्धाख्यमन्त्रस्य ऋषिर्गर्ग्यस्तथा भवेत् ॥१०५॥
गायत्री छन्द इत्युक्तोप्यनिरुद्धस्तु देवता ।
स्वाहा शक्तिस्तदों बीजं ह्रीं कीलकमिति स्मृतम् ॥१०६॥
श्रीं कवचं ऐमित्यस्त्रं श्यामोवर्ण इति स्मृतः ।
श्रीभूनीळादिबीजैश्च षड्स्वरैर्मन्त्रवित् क्रमात् ॥१०७॥
प्रणवेन करन्यासं षडंगं कारयेत् शुचिः ।
व्याप्यं तत् व्यापकं सम्यक् तन्मन्त्रेणैव कारयेत् ॥१०८॥

शंखचक्रधनुः खड्गधरं सर्वार्थदायकम् ।
सर्वालंकारसंयुक्तं अनिरुद्धं यजेत् सदा ॥१०९॥

पुरुषोत्तममन्त्रः

क्रमाद्वक्ष्ये तदा ब्रह्मन् श्रीमनुं पु षोत्तमम् ।
तारं ततश्च कृष्णाय तदा पुरुषोत्तमाय च ॥११०॥
स्वाहांतं उद्धरेन् मन्त्रं पुरुषो ममं विदुः ।
भुक्तिमुक्तिप्रदं शांतं मन्त्रमेतदनुत्तमम् ॥१११॥
पुरुषोत्तममन्त्रस्य ब्रह्मात्रृषिरुदाहृतः ।
छन्दश्च देवी गायत्री देवता पुरुषोत्तमः ॥११२॥
स्वाहा शक्तिस्तथों बीजं ह्रीं कीलकमितिस्मृतम् ।
श्रीं कवचमैत्रियुत्रं श्यामो वर्ण उदाहृतः ॥११३॥
श्रीभूनीलादिबीजैश्च षड्स्वरैर्मन्त्रवित् क्रमात् ।
प्रणवेन करन्यासं षडंगं कारयेत् शुचिः ॥११४॥
व्याप्यं तत् व्यापकं सम्यक् तनमन्त्रेणैव कारयेत् ।
चक्रशंखधरं देवं भक्तरक्षार्थं आदरात् ॥११५॥
सर्वालंकारसंयुक्तं नमामि पुरुषोत्तमम् ।
सदा तृतीयमन्त्रांते मन्त्रगर्भेषु सात्त्विके ॥११६॥
यद्रूपं वर्तते सम्यक् तद्रूपधरमव्ययम् ।
इन्द्रद्युम्नाय भक्ताय प्रियाय प्रियकारिणे ॥११७॥
अथो यद्धरिस्त्युक्तः श्रुतिलालसरूपिणम् ।

जगन्नाथ मन्त्रः

जगन्नाथेति नामांगं बलरामार्धरूपिणम् ॥११८॥
सुभद्राख्य महालक्ष्मी रूपसार्धांगवेषिणम् ।
स्वोच्छिष्टान्नादितीर्थैश्च देवादीनां च पैतृके ॥११९॥
ऋषीणां च द्विजादीनां सर्वेषां मुक्तिदायकम् ।
भुक्तिमुक्तिप्रदं शांतं स्वमुखांबोजदर्शनात् ॥१२०॥
प्रपन्नार्तिहरं सम्यक् पापीनां च सुमुक्तिदम् ।
तं परात्परं अव्यक्तं नमामि पुरुषोत्तमम् ॥१२१॥
पुरुषोत्तमबिम्बस्य समन्ताद्योजन त्रयम् ।
तं परात्परं अव्यक्तं नमामि पुरुषोत्तमम् ॥१२२॥
गयाप्रयागकाशीभ्यस्सत्यं कोटिगुणाधिकम् ।
सैव पद्मादिवासी च कालिंगाख्ये युगे युगे ॥१२३॥
सदा ब्रह्म गयातीरे समीपे पूर्वभागके ।
सर्वषां मुक्तिदस्साक्षात् प्रसन्नः पुरुषोत्तमः ॥१२४॥
तथैव सिंहगिर्यां च श्रीरंगे वेंकटाचले ।
दिव्ये सैद्धे तथा सम्यक् स्वयंव्यक्तस्थलादिषु ॥१२५॥
पितृणां विष्णुसायुज्य सिद्धये विष्णुभूमिषु ।
क्षौरं श्राद्धादिकं कुर्यात् सर्वेषां मुक्तिसिद्धये ॥१२६॥
विष्णोर्निवेदितान्नं च विष्णुपादोदकं सदा ।
पितृणां मुक्तिसिद्ध्यर्थं देवर्षीणां च सादरम् ॥१२७॥

जगन्नाथ मन्त्रः

जगन्नाथेति नामांगं बलरामार्धरूपिणम् ।।११८।।
सुभद्राख्य महालक्ष्मी रूपसार्धांगवेषिणम् ।
स्वोच्छिष्टान्नादितीर्थैश्च देवादीनां च पैतृके ।।११९।।
ऋषीणां च द्विजादीनां सर्वेषां मुक्तिदायकम् ।
भुक्तिमुक्तिप्रदं शांतं स्वमुखांबोजदर्शनात् ।।१२०।।
प्रपन्नार्तिहरं सम्यक् पापीनां च सुमुक्तिदम् ।
तं परात्परं अव्यक्तं नमामि पुरुषोत्तमम् ।।१२१।।
पुरुषोत्तमबिम्बस्य समन्ताद्योजन त्रयम् ।
तं परात्परं अव्यक्तं नमामि पुरुषोत्तमम् ।।१२२।।
गयाप्रयागकाशीभ्यस्सत्यं कोटिगुणाधिकम् ।
सैव पद्मादिवासी च कालिंगाख्ये युगे युगे ।।१२३।।
सदा ब्रह्म गयातीरे समीपे पूर्वभागके ।
सर्वषां मुक्तिदस्साक्षात् प्रसन्नः पुरुषोत्तमः ।।१२४।।
तथैव सिंहगिर्यां च श्रीरंगे वेंकटाचले ।
दिव्ये सैद्धे तथा सम्यक् स्वयंव्यक्त स्थलादिषु ।।१२५।।
पितॄणां विष्णुसायुज्य सिद्धये विष्णुभूमिषु ।
क्षौरं श्राद्धादिकं कुर्यात् सर्वेषां मुक्तिसिद्धये ।।१२६।।
विष्णोर्निवेदितान्नं च विष्णुपादो कं सदा ।
पितॄणां मुक्तिसिद्ध्यर्थं देवर्षीणां च सादरम् ।।१२७।।

शिवनिवेदितान्नादि निषेधः

देवतान्तरनैवेद्यं शिवस्य च विशेषतः ।
न दद्यात् न स्पृशेत् सर्वे द्विजाद्यस्सर्वकर्मसु ॥१२८॥
शिवपादोदकं यद्वत् नैवेद्यादींश्च न स्पृशेत् ।
गृह्णीयात् वाथ योश्नीयात् अन्नतीर्थं शिवार्पितम् ॥१२९॥
स याति नरकं घोरं रौरवं रोमसंख्यया ।
गृह्णीयात् विष्णुनैवेद्यं तस्मादेव चतुर्मुख ॥१३०॥
विष्णुनैवेद्यमहात्म्यं प्रोक्तं संक्षेपतस्तथा ।
भक्षयेत् विष्णुनैवेद्यं एकादश्यां व्रतादिषु ॥१३१॥
एकादश्यादि शुद्ध्यर्थं विष्णुसायुज्यहेतवे ।
सर्वान् कामान् भजेत् सम्यक् विष्णुनैवेद्य भक्षणात् ॥१३२॥

अधोक्षजमन्त्रः

अधोक्षजमनुं वक्ष्ये क्रमेण कमलासन ।
तारा[illegible]यान्तं अधोक्षज [illegible]युतम् ॥१३३॥
अधोक्षजमनुं सम्यक् उद्धरेत् भुक्तिमुक्तिदम् ।
अधोक्षजस्य मन्त्रस्य ब्रह्मा ऋषिरुदाहुतः ॥१३४॥
छ[illegible] देवी गायत्री नृसिंहो देवता भवेत् ।
ओं [illegible]मित्याय शक्तिः कीलकं ह्रीमिति स्मृतम् ॥१३५॥
श्रीं कवचं ऐ[illegible]त्यस्त्रं श्यामो वर्ण इति स्मृतः ।

श्रीभूनीळादिबीजैश्च षड्[illegible]वित् क्रमात् ॥१३६॥
प्रणवेन करन्यासं षडंगं कारयेत् शुचिः ।
मूलमन्त्रपदै[illegible] चतुर्धा च स मन्त्रवित् ॥१३७॥
व्याप्यं तत् व्यापकं सम्यक् तन्मन्त्रेणैव कारयेत् ।
श्रीनारसिंहप्रीत्यर्थे [illegible]नियोग इति स्मरेत् ॥१३८॥
तत्त[illegible]न्त्रं जपेत् सम्यक् तत्तत् प्रीत्या इतिस्मरेत् ।
केशवाद्यादि म[illegible]णां विधिरेष चतु[illegible] ॥१३९॥
ताक्ष्यार्ननधरं शांतं कटीवासधरं विभुम् ।
सदा किरीटहारादि सर्वाभरण भूषितम् ॥१४०॥
भूवराहनृसिंहाख्य नामरूपादि धारिणम् ।

दशांग चन्दनम्

चन्दनागरुकर्पूर पूतद्वयविमिश्रितम् ॥१४१॥
कस्तूरीकुंकुमैर्युक्तं रत्न हेमादि मिश्रितम् ।
निशीथाम्बु [illegible]तं चन्दनान्तस्थितं हरिम् ॥१४२॥
नित्यं सच्च[illegible]नाद्यैश्च भूषितांगं हरिं विभुम् ।
सदाऽक्षयतृ[illegible] सर्वेषां मुक्ति सिद्धये ॥१४३॥
निजस्वरूपलेपादि दर्शनं विभु[illegible]म् ।
श्वेतवर्ण[illegible]रांगं वृद्धयौवनवेषिणम् ॥१४४॥
पंचा[illegible]तं शतफलं सहस्रं चोत्तमं भवेत् ।
पंचत्वंगा[illegible] संयुक्तं स्नानं तत्परमा[illegible]दनम् ॥१४५॥

पुनस्तथा सदा सम्यक् दानवांतं स्तिथं प्रभुम् ।
पुनरक्षतृतीयायां वै स्वस्वरूपादिदर्शनम् ॥१४६॥
महाहविषड्रसाद्यै भुक्त्वा सिंहाचले स्थितम् ।
अदर्शितपदाद्यन्तं सिंहाद्रीशं नमाम्यहम् ॥१४७॥
भंगं करोति योमोहात् सिंहाद्रीशस्य चन्दनम् ।
अब्धिमध्ये सदा राजा मन्त्रपालपुरोहितः ॥१४८॥
गणको राजभृत्यो वा मन्त्री वा दण्डनायकः ।
स याति नरकं घोरं तस्यायुश्श्रीश्च नश्यति ॥१४९॥
तस्यवंशक्षयंयाति देशं राज्यं च नश्यति ।
मोहात् चन्दनभंगे वै पुनर्दत्वा तु चन्दनम् ॥१५०॥
महाहविर्दशगुणं कुर्यात् राजा च सर्वदा ।

सिंहाद्रीशपूजनम्

मयोक्तविधिना सम्यक् बालाधैरुत्सवादिभिः ॥१५१॥
तस्मात् सर्वप्रयत्नेन सिंहाद्रीशं प्रपूजयेत् ।
अग्रे सिंहाद्रिनाथस्य योवसेत् स विनश्यति ॥१५२॥
विष्णुसायुज्यसिद्ध्यर्थं सिंहाद्रीशं सदास्मरेत् ।
अर्चकानां फलं सम्यक् वक्तुं शक्यं न मादृशैः ॥१५३॥
जगन्नाथं नृसिंहंच भक्त्या सम्यक् प्रपूजयेत् ।

अच्युतमन्त्रः

क्रमाच्युतमन्त्रस्य वक्ष्ये श्रुणु चतुर्मुख ॥१५४॥

प्रणवं पूर्वमुच्चार्य अच्युताय नमोन्तकम् ।
उद्धरेत् अच्युतमनुं भुक्तिमुक्तिप्रदायकम् ॥१५५॥
श्रीमदच्युतमन्त्रस्य ब्रह्मा ऋषिरुदाहृतः ।
छन्दश्च देवी गायत्री देवताप्यच्युतो भवेत् ॥१५६॥
ओं बीजं तु नमश्शक्तिः कीलकं ह्रीमितिस्मृतम् ।
श्रीं कवचं ऐमित्यस्त्रं श्यामो वर्ण इति स्मृतः ॥१५७॥
श्रीभूनीळादि बीजैश्च षड्स्वरैर्मन्त्रवित् क्रमात् ।
प्रणवेन करन्यासं षडंगं कारयेत् शुचिः ॥१५८॥
व्याप्यं तत् व्यापकं सम्यक् तन्मन्त्रेणैव कारयेत् ।
शंखचक्रगदापद्मधारिणं भूरमापतिम् ॥१५९॥
सर्वाभरणसंयुक्तं अच्युतं तं [illegible] ।

जनार्दनमन्त्रः

जनार्दनमनुं वक्ष्ये क्रमादेव चतुर्मुख ॥१६०॥
प्रणवादि नमोन्तं वै चतुर्थ्यन्तजनार्दनम् ।
जनार्दनमनुं सम्यक् उद्धरेत् भुक्तिमुक्तिदम् ॥१६१॥
श्रीजनार्दनमन्त्रस्य ब्रह्मा ऋषिरुदाहृतः ।
छन्दश्च देवी गायत्री देवता च जनार्दनः ॥१६२॥
ओं बीजं च नमश्शक्तिः कीलकं ह्रीमिति स्मृतम् ।
श्रीं कवचं ऐमित्यस्त्रं श्यामो वर्ण इति स्मृतः ॥१६३॥

श्रीभूनीळादि बीजैश्च षड्स्वरैर्मन्त्रवित् क्रमात् ।
प्रणवेन करन्यासं षडंगं कारयेत् शुचिः ।।१६४।।
व्याप्यं तत् व्यापकं चैव तन्मन्त्रेणैव कारयेत् ।
शंखचक्रगदापद्मधारिणं श्रीपतिं हरिम् ।।१६५।।
सर्वालंकारसंयुक्तं तं नमामि जनार्दनम् ।
जनार्दनं गयायां च गयायां ब्रह्मसंज्ञकम् ।।१६६।।
शुद्धपुष्करिणीतीरे सर्वेषां मुक्तिसिद्धये ।
ध्यायेत् जपेत् अर्चयेत् च पैतृकं च जनर्दने ।।१६७।।
जनार्दनाख्य गिर्यां च गौतमीपूर्वभागके ।
कंकणग्राममध्ये च तत्समीपदिगीशके ।।१६८।।

उपेन्द्रमन्त्रः

उपेन्द्रमन्त्रं वक्ष्येऽथ क्रमादेव चतुर्मुख ।
उपेन्द्रस्य च मन्त्रस्य ऋषिर्गर्ग्यस्तथैव च ।।१६९।।
गायत्री छन्द इत्युक्तं उपेन्द्रो देवता भवेत् ।
प्रणवादिनमोन्त्तं च उपेन्द्राय पदं वदेत् ।।१७०।।
ओं बीजं च नमः शक्तिः ह्रीं कीलकमिति स्मृतम् ।
श्रीं कवचं ऐमित्यस्त्रं श्यामो वर्ण इति स्मृतः ।।१७१।।
श्रीभूनीळादि बीजैश्च षड्स्वरैर्मन्त्रवित् क्रमात् ।
प्रणवेन करन्यासं षडंगं कारयेत् बुधः ।।१७२।।
व्याप्यं तत् व्यापकं सम्यक् तन्मन्त्रेणैव कारयेत् ।
चक्रशंखगदाखड्गधारिणं श्रीधरं विभुम् ।।१७३।।

सर्वाभरणभूषांगं उपेन्द्रं देवं आश्रये ।
प्रणवादि नमोन्तं च उपेन्द्रायेति संयुतम् ॥१७४॥
सर्वार्थदायकं सम्यक् उपेन्द्रमनुमुद्धरेत् ।

हरिमन्त्रः

हरिमन्त्रं क्रमाद्वक्ष्ये श्रुणुष्व कमलासन ॥१७५॥
ओं हरिं हुंपडित्युक्त्वा हरिमन्त्रंसमु[illegible]रेत् ।
भुक्तिमुक्तिप्रदं शांतं स[illegible]निव[illegible]णम् ॥१७६॥
तथा श्रीहरिमन्त्रस्य ब्रह्मा [illegible]हृतः ।
छन्दश्च देवी गायत्री श्री[illegible]ता भवेत् ॥१७७॥
प्रणवं पूर्वमुद्धृत्य हरये नम इत्यतः ।
नमश्शक्तिस्तथों बीजं श्रीं कीलक[illegible]ति स्मृतम् ॥१७८॥
श्रीं कवचं ऐमित्यस्त्रं श्यामो वर्ण इति स्मृतः ।
श्रीभूनीळादि बीजैश्च [illegible] क्रमात् ॥१७९॥
प्रणवेन करन्यासं षडंगं कारयेत् शुचिः ।
व्याप्यं तत् व्यापकं चैव [illegible] का[illegible]येत् ॥१८०॥
चक्र[illegible]णं भूपतिं विभुम् ।
सर्वाभरणभूषांगं [illegible] हरिमव्ययम् ॥१८१॥

श्रीकृष्णमन्त्रः

वक्ष्ये श्रीकृ[illegible] श्रुणुष्व कनलासन ।
ओं क्लीं [illegible]ष्णाय नमः [illegible]ष्णमन्त्रं [illegible]त् ॥१८२॥

भुक्तिमुक्तिप्रदं शांतं सर्वाभीष्टफलप्रदम् ।
अस्य श्रीकृष्णमन्त्रस्य ब्रह्मा ऋषिरुदाहृतः ॥१८३॥
छन्दश्च देवी गायत्री श्रीकृष्णो देवता भवेत् ।
ओं बीजं नमश्शक्तिः क्लीं कीलकमिति स्मृतम् ॥१८४॥
श्रीं कवचं ऐमित्यस्त्रं श्यामो वर्ण इतिस्मृतः ।
श्रीभूनीळादि बीजैश्च षड्स्वरैर्मन्त्रवित् भवेत् ॥१८५॥
प्रणवेन करन्यासं षडंगं कारयेत् शुचिः ।
व्याप्यं तत् व्यापकं चैव तन्मन्त्रेणैव कारयेत् ॥१८६॥
चक्रशंखगदापद्मधारिणं वनमालिनम् ।
सर्वालंकारसंयुक्तं श्रीकृष्णं तं नमाम्यहम् ॥१८७॥
केशवाद्यादि मन्त्राणां पुरश्चरणकादिकम् ।
पुंसूक्तवत्तदा ब्रह्मन् अथवा मूल मन्त्रवत् ॥१८८॥
द्विजानां वै प्रपन्नानां परमैकान्तिनां तथा ।
विष्णुसायुज्यसिद्ध्यर्थं विष्णवर्चास्थापनाय च ॥१८९॥
प्रोक्ताश्च विष्णुमन्त्राश्च सर्वेषां मुक्तिसिद्धये ।

इति श्रीपांचरात्रे पराशरसंहितायां विशिष्टपरमधर्मशास्त्रे
त्रयोदशोऽध्यायः

अथ चतुर्दशोऽध्यायः

श्रीभगवानुवाच-

मन्त्रादि देव प्रीत्यर्थं न्यासध्यानादि चोऽच्यते ।
चतुर्विंशति तत्वानां देवतानिर्णयं तथा ॥१॥
विष्णुप्रतिष्ठासिद्ध्यर्थं देहबिम्बात्मशुद्धये ।
सन्निवेशादिसिद्ध्यर्थं सर्वेषां मुक्तिसिद्धये ॥३॥
ऋषिर्गुरुत्वात् शिरसैव धार्यः छन्दोक्षरत्वात् रसनाग्रधार्यः ।
अन्तयागादि सिद्ध्यर्थं देवतां हृदि धारयेत् ॥४॥
सृ[illegible] नाभित्वात् द्विजानां [illegible]न्यसेत् ॥५॥
गुह्यस्य शक्तियुक्तत्वात् गुह्ये शक्तिं तथा न्यसेत् ।
कीलकं संधियुक्तत्वात् कीलकं सन्धिषु न्यसेत् ॥६॥
कवचं वर्मयुक्तत्वात् देवे तत्कवचं न्यसेत् ।
अस्त्रं संरक्षणार्थाय दश दिक्षु न्यसेत् बुधः ॥७॥
मन्त्रादेवतायांस्तु तत्तत् वर्णं स्मरेत् सदा ।
विनियोगं हरिप्रीत्या इति कुर्यात् स मन्त्रवित् ॥८॥
ध्यानादि षड्गुणार्थाय मन्त्रनाथस्य चादरात् ।
मोक्षसारूप्यसिद्ध्यर्थं विष्णुपादं च कारयेत् ॥९॥
प्रतिष्ठार्चनसिद्ध्यर्थं नित्यकर्मादिसिद्धये ।
मूलादि सर्वमन्त्राणां पुरश्चरणमाचरेत् ॥१०॥

पूजातर्पणहोमादिकं च चतुर्मुख ।

जप चतुरंगम्

जप मात्रं पदातीस्स्यात् तर्पणं हय एव च ॥११॥
होमवर्ग इभः ख्यातो रथः पुष्पांजलीयकम् ।
अन्नदानं तु [illegible]दि नृपो मन्त्रवत् अब्जज ॥१२॥
दरिद्राणां उपायं च वक्ष्ये श्रुणु चतुर्मुख ।
एकान्ते ष[illegible]गुणं जप्त्वा द्व्यंगे तु त्रिगुणं जपेत् ॥१३॥
त्र्यंगे तु द्विगुणं जप्त्वा चतुरंगे तथैव च ।
एतज्जपादिकं कृत्वा प्रति[illegible]दिकं आचरेत् ॥१४॥
स्थापकस्य तथा योगात् पूजाया[illegible]चातिशोभनात् ।
अभिरूप्याच्च बिम्बस्य सदा [illegible]म् ॥१५॥
जपहीनप्रतिष्ठादेः सर्वेषां नरकं भवेत् ।
रोगा[illegible] पीडनं सम्यक् [illegible]म् ॥१६॥
तस्मात् विष्णवर्चनार्थाय जप[illegible] भव ।
आचार्यत्वार्थं अमलं जपेत् ह्यजपादि[illegible] ॥१७॥
लभेत विष्णुसायुज्यं मन्त्ररत्नजपात् सदा ।

चतुर्विंशति [illegible]त्वन्यासः

भवेदाकाशतत्वस्य केशवो देवता सदा ॥१८॥
नारायणस्तथा वायोः अग्नेर्माधव एव हि ।
गोविन्दो जल[illegible] विष्णुर्भूमेश्च देवता ॥१९॥

मधुसूदनस्तु शब्दस्य स्पर्शे चापि त्रिविक्रमः ।
रूपस्य वामनो देवः श्रीधरस्तु रसस्यच ॥२०॥
हृषीकेशस्तु गन्धस्य पद्मनाभस्तु वाक्पतिः ।
पाण्योर्दामोदरो देवः सर्वदा कमलासन ॥२१॥
संकर्षणः पादयोश्च पाय्वीशो वासुदेवकः ।
प्रद्युम्नश्च उपस्थेश श्रोत्रेशो ह्यनिरुद्धकः ॥२२॥
पुरुषोत्तमस्त्वगीशश्च लोचनेशो ह्यधोक्षजः ।
जिह्वेशो नारसिंहश्च देवो घ्राणस्यचाच्युतः ॥२३॥
जनार्दनो मानसस्य बुद्धेश्चोपेन्द्र इष्यते ।
अहंकारस्य च हरिः कृष्णश्चित्तस्य देवता ॥२४॥
तत्वन्यासे विशेषेण ध्यायेत् तत्वादिदेवताः ।
प्रतिष्ठार्चादिकालेषु नित्यकर्मजपादिषु ॥२५॥
ततो ज्ञाने विशेषेण स्मरेत् तत्वाधिदेवताः ।
देवतान्तरबुद्ध्यादि[illegible]र्थं हेयहेतवे ॥२६॥
चतुर्विंशतितत्वानि एतानि श्रुति[illegible]तम् ।
पंचविंशतिरात्मेति जीव नाम मयेरितम् ॥२७॥
पतिं आत्मेश्वरं विश्व[illegible]व सततं स्मरेत् ।
अन्तर्बहिश्च जीवस्य वर्तते स [illegible]रेस्सदा ॥२८॥
षड्विंशोः पुरुष इति ज्ञात्वा देवं गुरुं व्रजेत् ।
चतुर्विंशतितत्वाख्य स्थूलरूप[illegible]दं स्मरेत् ॥२९॥
न्यासं कुर्यात् वर्ण[illegible] मात्रकाः ।
षट्चक्रानधिपान् सम्यक् स्मरेत् विष्णुपरायणः ॥३०॥

संकर्षणं तदाधारे लिंगे प्रद्युम्न रूपिणम् ।
नाभिचक्रे वैनतेयं हृदि नारायणं प्रभुम् ॥३१॥
तालमूले तथा विष्णुं वासुदेवं ललाटके ।
षड्सुस्थानेषु पूज्यं ते भावयन् संयुतेन्द्रियः ।
सततं पूजयेत् देवं सुहृदा मनसा तु यः ॥३२॥
स याति वैष्णवं स्थानं पुनरावृत्तिवर्जितम् ।
तं तु मध्यान्तमित्थं वै तन्मां मानाभिरिष्यते ॥३३॥
तत्र चक्रं द्वादशारं महामासाक्षराणि च ।
श्री विष्णुमूर्तयस्तेषु द्वादशद्वादशस्वपी ॥३४॥
अहं तत्र स्थितं चक्रं भावयामि स्वमायया ।
आरेषु भ्रमते जीवः क्रमेण कमलासन ॥३५॥
पंचोपनिषदा ध्यानं पश्चात् कुर्यात् विचक्षणः ।
पुंसूक्तन्यासं अमलं मूलमन्त्रस्य वाब्जज ॥३६॥
अर्चाविग्रहमन्त्रस्य न्यासं कुर्यात् स मन्त्रवित् ।
अन्तर्यागं जपं कृत्वाअनादीन् कारयेत् सुधीः ॥३७॥
यथा देवे तथा बिम्बे न्यासकर्मसमाचरेत् ।
शोषणाद्यादिकं कृत्वा पश्चादेतत् समाचरेत् ॥३८॥
पंचरात्रोक्त विधिना शुद्धवैष्णवमार्गतः ।
वैखानसेन वा कुर्यात् विष्णवर्चास्थापनादिकम् ॥३९॥
इति संक्षेपतः प्रोक्तं विधिना कमलासन ।

इति श्रीपांचरात्रे पराशरसंहितायां विशिष्टपरमधर्मशास्त्रे

चतुर्दशोऽध्यायः

अथ पञ्चदशोऽध्यायः

श्रीभगवानुवाच-

हंसमत्स्यादिमन्त्राणां विधिं वक्ष्ये चतुर्मुख ।
तत्तत् बिम्बप्रतिष्ठार्थं अर्चाविद्यार्थमादरात् ॥१॥
विष्णुसा[illegible]र्थं प्रपन्ना[illegible] विशेषतः ।
प्रणवं पूर्वमुच्च[illegible] नमश्श[illegible] मनन्तरम् ॥२॥
ततः परमहंसाय इति मन्त्रं समुच्चरेत् ।
तथा च हंसमन्त्रस्य ब्रह्मा ऋषिरुदा[illegible]तः ॥३॥
छन्दश्च देवी गायत्री भगवान् [illegible] ।

हंसमन्त्रः

हंसरूपी [illegible]रेदेव ओं बीजं शक्तिरीं ततः ॥४॥
श्रीं कील[illegible] ह्रीं कवचं [illegible]मेत्यस्त्रं मिहोच्यते ।
श्वेतो वर्ण इति ख्यात ऋषिन्यासमि[illegible] भवेत् ॥५॥
प्रण[illegible]वेन करन्यासं कुर्यात् वै ष[illegible]तः ।
[illegible]रुच्चार्य षडंगं तु ततो मन्त्रं वदेत् क्रमात् ॥६॥
व्याप्यं तत् व्यापकं चैव मूल[illegible]न्त्रेण कारयेत् ।
चक्रा[illegible] देवं [illegible]संयुतम् ॥७॥
श्रीभूमि सहितं देवं हंसरूपं हरिं भजे ।
षण्मन्त्रा[illegible] तथा वक्ष्ये हंसमन्त्रस्य तत्क्रमात् ॥८॥

प्रणवं बीजमित्युक्तं पि-मन्त्रं नवाक्षरम् ।
ऋतं सत्यं इहेत्युक्तं मनुसाज्ञ ततः परम् ॥९॥

हंसगायत्री

हंसश्शुचि षटिति पदमन्त्रो भवेत् सदा ।
परब्रह्माय विद्महे वासुदेवाय धीमहि ॥
तंनो हंसः प्रचोदयात् ॥१०॥
एतदेव हि गायत्री हंसनामाख्यमुत्तमम् ।
पूर्वोक्तमेव ब्रह्मास्त्रं अस्त्रमन्त्रं भवेत्ततः ॥११॥
मत्स्यमंत्रं ततो वक्ष्ये क्रमादेव चतुर्मुख ।
दशावतारभेदं च मुख्या हंसादयस्तथा ॥१२॥
मयोक्तमेव मत्स्यस्यात् व्यूहाद्याश्शुद्धसात्विकाः ।
आवेश मूर्तिरेवस्यात् रामः पर-ुधारकः ॥१३॥
सदा मोहनमूर्तिस्स्यात् [illegible]मूर्ति[illegible]चतुर्मुख ।
दशावतारमध्ये वै मूर्तिमेत[illegible]यं त्यजेत् ॥१४॥
प्रपन्नो वैष्णवस्सम्यक् ब्राह्म[illegible]शुद्धसात्विकः ।

दशावतारः

तस्मात् वक्ष्ये वेद-ार्गं अवतारादिकं क्रमात् ॥१५॥
हंसो मत्स्यो [illegible]ग्रीवः कूर्मः किटिर्नृकेसरी ।
[illegible]कुब्जस्त्रिविक्रमो रामो रामश्चेति द[illegible]न् ॥१६॥

रघुरामो लक्ष्मणश्च बालकृष्णो भवेत् सदा ।
तस्मादेव क्रमात् वक्ष्ये हंसमन्त्रादिकं ततः ॥१७॥

मत्स्यमन्त्रः

प्रणवं पूर्वमुच्चार्य ततो भगवतेति च ।
मत्स्यरूपाय संयुक्तं नमः पदमनन्तरम् ॥१८॥
उद्धार्य मत्स्यमन्त्रं वै भुक्तिमुक्तिप्रदं सदा ।
ऋषिर्ब्रह्मा भवेत् सम्यक् मत्स्यमन्त्रस्य सर्वदा ॥१९॥
छन्दश्च देवी गायत्री देवो मीनवपुर्हरिः ।
प्रणवं बीजमित्युक्तं नमश्शक्तिरितीरितम् ॥२०॥
श्रीं कीलकं ह्रीं कवचं ऐं[illegible]मिति चोच्चरेत् ।
श्वेतो वर्ण इति ध्यात्वा अस्त्रं दिक्षु वन्यसेद्दश ॥२१॥
न्यसेत् पदचतुष्केण तदर्थेन क्रमात् शुचिः ।
कृत्वा षडंगं [illegible] प्रणवेन करं न्यसेत् ॥२२॥
व्याप्यं तत् व्यापकं संयक् कुर्यात् मन्त्रेण मन्त्रवित् ।
मत्स्यानन[illegible]रं देवं चक्र[illegible]ंखधरं विभुम् ॥२३॥
सर्वाभ[illegible] श्रीभूनीळाधिपं भजे ।
लक्षमेकं जपेत् भक्त्या प्रा[illegible] वि[illegible]षतः ॥२४॥
[illegible] ततः कुर्यात् [illegible] ।
वर्तते गोततीतीरे [illegible] ग्रामसन्निधौ ॥२५॥
[illegible]ंखतीर्थतटेरम्ये क्षेत्रं [illegible]क्तिप्रदं सदा ।
भजेत्तत्र च सद्भक्त्या [illegible] च ॥२६॥

तत्र संपूज्य विधिवत् मत्स्यमूर्तिं हरिं तथा ।
वसिष्ठश्च ऋषित्वं वै ब्रह्मा ब्रह्मत्वं प्राप्तवान् ॥२७॥
तत्पूज्य चक्रवर्तित्वं नळाद्याः समवाप्नुवन् ।
कुल्यादौमत्स्यमूर्तिर्वै वेदादीन् प्रतिनिर्गतः ॥२८॥
विष्णुभक्तैस्तुस्तत्रैव पुनस्थापनकं भवेत् ।
शत्रुक्षयार्थिभिस्सत्यं राज्यायुः कांक्षिभिस्सदा ॥२९॥
पूर्वोक्तमूर्तिर्वै वेदे देशे कालिंगकाख्यके ।
पद्मगिर्यां गुहायां वै पद्मपुर्यां विशेषतः ॥३०॥
सर्वेषां देवदेवो सो भुक्तिमुक्ति प्रदस्सदा ।
वेद[illegible]सो याज्ञवल्क्यो ऋषित्वादिकं आप्नुवन् ॥३१॥
सर्वज्ञत्वं ज्ञानसिद्धं ब्रह्मा देवत्वं आप्नुवन् ॥३२॥
कल्पादौ तु स वै ब्रह्मा हंसरूपधरं हरिम् ।
सा[illegible] द्राविडे देशे चक्रादीन् प्रतिनिर्गतः ॥३३॥
पुनस्तत्रैव तद्भक्तैः आयुश्श्रीराज्यकांक्षीभिः ।
तस्मात् तत्र जपंकुर्यात् अर्चामोक्षादिसिद्धये ॥३४॥
मत्[illegible]स्य वक्ष्येऽथ षण्म[illegible]णि क्रमात् ततः ।
मयोक्तं पिण्डमन्त्रस्स्यात् हंसमन्त्रस्तथा भवेत् ॥३५॥
बीजं सं[illegible]पदं मन्त्रं [illegible] ।
जपकाले तु तत् ज्ञात्वा पश्चात् मन्त्रं जपेत् द्विजः ॥३६॥

हयग्रीवमन्त्रः

[illegible]यग्रीवमनुं वक्ष्ये क्रमाद्वै स[illegible] ।
सांतं हांतं बिन्दु[illegible]क्तं प्रणवा[illegible]तम् ॥३७॥
भवेत् [illegible]नुः विद्यैश्वर्यादिद[illegible]म् ।
[illegible]यग्रीवस्य म[illegible] ब्रह्मा ऋषिरुदाह[illegible]ः ॥३८॥
छन्द[illegible] देवी गायत्री देवता भगवान हरिः ।
[illegible] देवता वै हं बीजमिति चो[illegible] ॥३९॥
ओं शक्तिः कीलकं ह्रीं कवचं श्रीं [illegible] ।
ऐं अस्त्रमिति चोक्त्वाथ श्वेतो वर्ण इतिस्मृतः ॥४०॥
[illegible]स्वरैस्तु षडंगं तु करन्यासं तथा न्यसेत् ।
[illegible]ण न्यसेन्मन्त्री व्याप्यं तत् व्यापकं क्रमात् ॥४१॥

[illegible]

वन्दे पूरित च[illegible] मण्डलगतं श्वेतारविन्दासनं
मन्दाकिन्य[illegible]ताब्जकुन्दकुसुम क्षीरेन्दुभासं हरिम् ।
मुद्रा[illegible]स्तकशंखचक्राविलसत् श्रीमत्[illegible]जामण्डलं
निर्यान्निर्मलभारतीपरिमळं विश्वेशमश्वाननम् ॥४३॥
एवं ध्यात्वा जपेत् मन्त्रं ल[illegible]मकं [illegible] मन्त्रावत् ।
[illegible]मादिकं तथाकुर्या[illegible] श्रीसूक्तस्यवदुत्तर[illegible] ॥४४॥
बीजमन्त्रमि[illegible]घ स्यात् [illegible]यग्रीवस्य सर्वदा ।
पिण्डमन्त्रा[illegible]कं वक्ष्ये तन्मन्त्रफलसि[illegible]य ॥४५॥

प्राणस्तु बीजमन्त्रस्स्यात् मन्त्रदेवस्य संसदा ।
मूर्त्यादि सर्वमन्त्राणां क्रमादेव चतुर्मुख ॥४६॥
कुक्षिस्तु पिण्डमन्त्रस्स्यात् संज्ञा वै तच्छिरो भवेत् ।
कराद्याः पादमन्त्रस्स्यात् गायत्री देह एव च ॥४७॥
अस्त्रं पुष्ठिरिति ब्रह्मन् मन्त्रदेहस्य सर्वदा ।
तस्मात् मन्त्रांगहीनेतु फलं नास्ति मनोस्तथा ॥४८॥
संपूर्णफलमादौ तु मध्येनन्तेन चैव हि ।
तन्मन्त्राणि च त[illegible] वक्ष्ये म[illegible]च ॥४९॥
प्राणाप्रतिष्ठासिद्[illegible] देहज्ञानात्मशुद्धये ।
षण्मन्त्राणां तु तन्मध्ये मन्त्रमेकं जपेत् सदा ॥५०॥
अन्यत्तत्वं च मन्त्राणि दशवारं जपेत् शुचिः ।
अन्यथा यो जपेन् मन्त्रं तस्य मन्त्र फलं नहि ॥५१॥
पिण्डमन्त्रं ततो वक्ष्ये हयग्रीवस्य सा[illegible]रम् ।
तारं मायां मान्मथं च नीळा बीजं तथोद्धरेत् ॥५२॥
[illegible]यग्रीवाय संयुक्तं वन्हिजायां तमुद्धरेत् ।
पिण्डमन्त्रमिमं चाहुः सर्वविद्याप्रसा[illegible]कम् ॥५३॥
सं[illegible]मन्त्रं ततो वक्ष्ये हयग्रीवाख्यकस्य च ।
[illegible]गयजुस्सामरूपाय वेदा[illegible] ॥५४॥
प्रणवो[illegible] महाश्वशिरसे नमः ।
संज्ञामन्त्र चैष एव ज्ञानाविद्याप्र[illegible]यकः ॥५५॥

वक्ष्येऽथ पदमन्त्रं वै हयग्रीवस्य तत्क्रमात् ।
उद्गीथप्रणवोद्गीथ सर्ववागीश्वरेश्वर ॥५६॥
सर्ववेदमयाचिन्त्य सर्वं बोधय बोधय ।
वेदमन्त्रमिमं सम्यक् वेद वेदान्तदायकम् ॥५७॥
वेदान्तांगाय विद्महे हयग्रीवाय धीमही ।
तन्नो हयग्रीवः प्रचोदयात् ॥५८॥
हयग्रीवस्य गायत्री एतत् सर्वार्थदायिनी ।
तारं मायां मन्मथं च नीलां चिन्तामणिं तथा ॥५९॥
पाशांकुश महामायां हयाननपदं ततः ।
वेदवेदान्तशास्त्रादीन् सर्वविद्या विदापय ॥६०॥
अमृतं वरुणं वायुं हुंफट् स्वाहेति चोच्चरेत् ।
हयशीर्षास्त्रमेतद्वै स्मरणज्ञानदायकम् ॥६१॥
तदीयां च महामायां नीलांतं भूसुरान्तथम् ।
पाशांकुशे श्री... रमामपि ॥६२॥
वेदशास्त्रा... कं सर्वं सर्व ...त्वं प्र...पय ।
हयानन स वेदांग ज्ञाना... मयाशु वै ॥६३॥
... वै सद्यो विद्या... यकम् ।
पुरश्चरणहोमादि भवेत् पुंसूक्तवत्तदा ॥६४॥
श्रीकाम च ... भवेत् ।
सर्वरत्नसमाकीर्णगोपुराद्या... शाभिते ॥६५॥

मण्टपे चालये हैमे सर्वालंकारसंयुते ।
क्रमाद्युपर्युपरि च दिव्यलोकादिमण्टपे ।।६६।।
शेषधर्मादि पीठे वै श्वेताब्जकर्णिकोपरि ।
उपर्युपरिसंस्कृत्य वन्हिमार्येन्दुमण्डले ।।६७।।
संस्थितं तु हयग्रीवंसुश्वेतं चन्द्रवर्णकम् ।
श्रीभूनीळादिसहितं चक्रशंखधरं विभुम् ।।६८।।
व्याख्यामुद्राकरं शांतं श्रीमत्पुस्तकधारिणम् ।
सर्वालंकारसंयुक्तं वस्त्रस्त्रग्रत्नकादिभिः ।।६९।।
चन्दनागरुकर्पूर पूतिद्वयसुलेपनम् ।
ध्यायेत् हृत्कर्णिकामध्ये अग्रे देवं सुपूजितम् ।।७०।।
धारयेत् तस्य निर्माल्यं स्वदेहे चन्दनादिकम् ।
जपकाले विशेषेण पूर्वेद्युर्धारितं सदा ।।७१।।
न्यासं कृत्वाथ पूर्वोक्तं हयग्रीवस्य मन्त्र[illegible] ।
हयग्रीवस्य परितो न्यसेत् आवरणादिकम् ।।७२।।
तत्तत् विग्रहरूपेण कीर्तिप्रज्ञादिकाः क्रमात् ।

प्रथमाद्यावरणेषु लक्ष्म्यादि स्थापनम्

लक्ष्मीसरस्वती चाज्ञा महाधीश्च धृतिः क्रमात् ।।७३।।
कीर्तिः प्रज्ञा महा प्रज्ञा प्रथमावरणे न्यसेत् ।
हयग्रीवाष्टकं सम्यक् द्वितीयावरणे न्यसेत् ।।७४।।
चक्रं शंखं गदा पद्मं शार्ङ्गं बा[illegible] हलम् ।

तत्तत् विग्रहरूपेण तृतीयावरणेन्यसेत् ॥७५॥
वैनतेयं हनूमन्तं ध्यायेदग्रे सुमन्त्रवित् ।
कुमुदः कुमुदाक्षश्च पुण्डरीकोऽथ वामनः ॥७६॥
शंकुकर्णस्सर्वनेत्रस्सुमुखस्सुप्रतिष्ठितः ।
चतुर्थावरणेसम्यक् न्यसेत् द्वारादिषु क्रमात् ॥७७॥
चण्डप्रचण्डौ प्राग्द्वारे याम्ये भद्रसुभद्रकौ ।
वारुण्यां जयविजयौ सोम्ये धातृविधातृकौ ॥७८॥
एतद्बिम्बादिकं ज्ञात्वा पंचमावरणे न्यसेत् ।
ऋग्वेदं शिल्पशास्त्रं च यजुर्वेदं चिकित्सकम् ॥७९॥
सामवेदं ज्योतिषं च धनुस्शास्त्रं अथर्वणम् ।
उत्तरे सर्ववेदांश्च सर्वोपनिषदादिकम् ॥८०॥
वेदान्त न्यायमीमांसा ऐशान्ये सर्वशास्त्रकान् ।
प्रथमादि न्यसेत् ब्रह्मन् षष्ठावरणके बुधः ॥८१॥
इन्द्रो वन्हिः पितृपतिर्नैरृतो वरुणो मरुत् ।
कुबेर ईशः पतयः पूर्वादि क्रमाशोन्यसेत् ॥८२॥
सप्तमावरणे सम्यक् तत्तत् शक्त्यादिभिस्सह ।
ब्रह्माणं च हरं तद्वत् यमं विष्णुं क्रमान्न्यसेत् ॥८३॥
प्रागादिषु चतुर्दिक्षु मूर्तिसूक्ष्म्यादिसंज्ञकान् ।
अष्टमावरणे मन्त्री शक्त्यायुधसहैव च ॥८४॥
अचक्राय विचक्राय पंचचक्राय संयुतम् ।
ज्वालाचक्राय चेत्युक्त्वा महाचक्राय ते नमः ॥८५॥

सुचक्रायेति चेत्युक्त्वा पूर्वादि क्रमशो न्यसेत् ।
तथा त्रैलोक्य चक्राय असुरान्तक चक्रधृत् ॥८६॥
तथा चाधारचक्राय कालचक्राय ततः क्रमात् ।
नवमावरणे सम्यक् चक्रावरणमुत्तमम् ॥८७॥
वारुणं वायुमग्निं च प्राकारत्रयकं न्यसेत् ।
धृत्वा मुद्रा हयग्रीवं चक्रं व्याख्यान पुस्तकाः ॥८८॥
धेनुकौस्तुभमुद्रेच धृत्वाथ जपमाचरेत् ।
एतत् ध्यानादि संयोगात् सर्वविद्यादिकं लभेत् ॥८९॥
आयुश्श्रीराज्यलाभं च रोगशत्रुक्षयादिकम् ।
अष्टैश्वर्यादिकं सम्यक् देहान्ते मोक्षमुत्तमम् ॥९०॥
लभेतत्र नसंदेहः सत्यं सत्यं चतुर्मुख ।
इति संक्षेपतः प्रोक्तं सर्वेषां ज्ञानसिद्धये ॥९१॥
हयग्रीवस्यमन्त्रं वै स्वदेहे संस्मरेत् सदा ।
पूजयेत् देवपीठे वा धारयेत् यन्त्रमुत्तमम् ॥९२॥
धर्ममोक्षप्रदं शांतं ज्ञानैश्वर्यादि दायकम् ।
मध्ये वृत्तं समालिख्य तन्मध्ये प्रणवं लिखेत् ॥९३॥
एकाक्षरं हयग्रीवं श्रीभूनीलादि बीजकाः ।
वारुणं वृत्तसंयुक्तं पाशांकुशसमन्वितम् ॥९४॥
ज्ञानैश्वर्यादिं वाचो मम दापय युग्मकम् ।
तारबीजेन संवेष्ट्य बहिष्षट्कोणं आलिखेत् ॥९५॥

कोणेषु तद्विष्णुमनुं संधौ रामषडर्णकम् ।
भूबीजेन सुसंवेष्ट्य बहिरष्टदळं लिखेत् ॥९६॥
अष्टाक्षरं तद्दशेषु नारायणमनुत्तमम् ।
लिखेत् संधौ नारसिंहं श्रीबीजेनैव वेष्टयेत्॥९७॥
तत् बहिर्द्वादशदळं दळेषु द्वादशाक्षरम् ।
वासुदेवाख्यमतुलं सीतारामं तु संधिषु ॥९८॥
नीळाबीजेन संवेष्ट्य तद्बहिष्टे दशंदळम् ।
तत् दळेषु स्वरान् लिख्य महामायां तु संधिषु ॥९९॥
मान्मथैन सुसंवेष्ठ्य बहिर्द्वादशकं दळम् ।
तद्दळेषु लिखेन्मन्त्री क्रमादेव चतुर्मुख ॥१००॥
हयग्रीवस्य गायत्रीं गायत्रीसंधिषु क्रमात् ।
चिन्तामण्या सुसंवेष्ट्य बिन्दुसंयुतमुत्तमम् ॥१०१॥
द्वात्रिंशद्दळं लिख्य तद्बहिस्साधकोत्तमः ।
मन्त्रराजं नृसिम्हं वै चक्रराजं तु संधिषु ॥१०२॥
नीळाबीजेन संवेष्ठ्य तद्बहिर्विलिरवेत् शुचिः ।
अष्टचक्रसमोपेतं पार्थिवं मण्डलं ततः ॥१०३॥
यन्त्रांगानि च तन्मध्ये पार्थिवे मण्डले लिखेत् ।
यन्त्रादिफलसिद्ध्यर्थं वक्ष्ये यन्त्राणि लक्षणम् ॥१०४॥
द्वात्रिंशांगुलमानेन पूजायन्त्रं प्रकल्पयेत् ।
अष्टांगुलप्रमाणेन धारणे यन्त्रमुद्धरेत् ॥१०५॥

सौवर्णे निर्मलेशुद्धे याक्ज्जीवं फलं भजेत् ।
रौप्ये विंशतिवर्षाणि तदर्धं भूर्जपत्रके ॥१०६॥
तदर्धं ताम्रपत्रे तु अन्यत् द्रव्ये तदर्धकम् ।
अन्तर्मुखं सुषुप्तिस्स्यात् वर्णं जाग्रत् बहिर्मुखम् ॥१०७॥
सर्वतो मुखतो वर्णं स्वप्नो यन्त्रं प्रवर्तितम् ।

यन्त्रादि लेखने श्रेष्ठ नक्षत्राणि

ऋक्षेष्वर्धमुखेष्वैव सौम्ययन्त्रादिकं लिखेत् ॥१०८॥
तीर्यङ्मुखेषु ऋक्षेषु विद्वेषं यन्त्रमुद्धरेत् ।
ऋक्षेष्वधोमुखेष्वैव क्रूरयन्त्रादिकं लिखेत् ॥१०९॥
तच्चापनेतुं विद्वेषं स्वप्नयन्त्रं समुद्धरेत् ।
जाग्रद्वश्ये तदैश्वर्ये आकर्षे शांतिकं लिखेत् ॥११०॥
विद्वेषस्तम्भने क्रूरे मन्त्रस्यात् सर्वदा द्विज ।

यन्त्रस्य दशांगानि

यन्त्रांगानि ततो वक्ष्ये यन्त्रसिद्ध्यर्थं मुत्तमम् ॥१११॥
बीजं प्राणं च शक्तिश्च दृष्टिर्वश्यादिकं तथा ।
गायत्रीमन्त्रयन्त्रश्च प्राणस्थापनमेव च ॥११२॥
भूतादि मालबीजानि मन्त्रस्यांगानि वै दश ।
एतत् ज्ञात्वा विधानेन तद्यन्त्रं च समुद्धरेत् ॥११३॥
स्वाभीष्टफलसिद्ध्यर्थं ज्ञानमोक्षादिसिद्धये ।
हयग्रीवस्य यन्त्रं वै सर्वेषां भुक्तिमुक्तिदम् ॥११४॥

कूर्मम-न्त्रः

कू-र्मन्त्रं ततो वक्ष्ये क्रमादेव च तुर्मुख ।
ओं नमो भगवते कूर्मरूपिणे स्वाहा ॥११५॥
तारं नमः पदं चोक्त्वा । तथा भगवते इति ।
तत्कूर्मरूपिणे चोक्त्वा [illegible]न्तं उद्धरेत् ॥११६॥
कूर्ममन्त्रमिदं चैतत् भोगमोक्षप्रदायकम् ।
मार्कण्डेय [illegible]म्यक् कूर्ममन्त्रस्य सर्वदा ॥११७॥
गायत्री छन्द इत्युक्तं श्रीकूर्म देवता हरिः ।
तार्तीयं बीजमित्याहुः स्वाहा शक्ति[illegible]मात् ॥११८॥
ह्रीं कीलकं श्रीमित्यस्त्रं कवचं ठामिति स्मरेत् ।
ऐमस्त्रमिति चोक[illegible] थ श्वेतोवर्ण इति स्मृतः ॥११९॥
तन्मन्त्रमध्ये चोऽक्त्वाथ तन्मंत्रपदमन्त्रकम् ।
न्यासं कुर्यात् षडंगं तु क[illegible]सं तु षड्स्वरैः ॥१२०॥
व्याप्यं तत् व्यापकं चैव मू[illegible]ण कार[illegible]त् ।
चक्रशंखधरं देवं कूर्मरूपं हरिं विभुम् ॥१२१॥
सर्वाभरणभूषांगं श्रीकूर्ममनिशं भजे ।
पुरश्चरण[illegible]मादीन् पुंसूक्तोक्तव[illegible]चरेत् ॥१२२॥
कूर्म[illegible] वक्ष्येऽथ [illegible]पमन्त्राणि क्रमात्तथा।
तारं तद्बीजमन्त्रस्य पिण्डमन्त्रमि[illegible] भवेत् ॥१२३॥
ऋतं सत्यं तु संज्ञा स्यात् प[illegible]मन्त्रं त थो च्यते ।
अन्तरन्तः कूर्मभूतं इति मन्त्रं भवेत्तथा ॥१२४॥

कूर्मगायत्री

लोकाध्यक्षाय विद्महे धराध्यक्षाय धीमहि ।
तन्नःकूर्मः प्रचोदयात् ॥१२५॥
त्येतत् कूर्मगायत्री भूराज्यादि प्रदायिका ।
ब्रह्मास्त्रं कूर्ममन्त्रस्य अस्त्रमित्युच्यते सदा ॥१२६॥
कूर्ममन्त्रेण विप्रेन्द्र श्रीकूर्मं पूजयेत् हरिम् ।
कूर्मदेशे कलिंगाख्ये भुक्ति मुक्तिप्रदं सदा ॥१२७॥
कूर्मक्षेत्रस्य चैशान्ये योजनद्वयमात्रके ।
हयग्रीवो वर्ततेऽत्र धर्ममोक्षप्रदे शुभे ॥१२८॥
कल्पादौ स हयग्रीवः किष्किन्धां प्रति निर्गतः ।
पुनस्तत् पूर्वदेशे तु तद्भक्तैस्थापनं कृतम् ॥१२९॥
आयु[illegible]क्षादि कांक्षिभिस्साद[illegible] सदा ।
तत्तत् विग्रहपूजायां त्यक्त्वा तं मन्त्रमुत्तमम् ॥१३०॥
पूजयेत् [illegible] राजा अर्चको वा द्विजोत्तमः ।
तस्य वंशक्षयं याति तस्यायुश्रीस्च नश्यते ॥१३१॥
तस्य निष्फलितं कर्म स याति नरकं ध्रुवम् ।
स वै दे[illegible] नाम सर्वकर्म बहि[illegible]तः ॥१३२॥

वराह मन्त्रः

वराहमन्त्रं वक्ष्येऽथ क्रमादेव चतुर्मुख ।
प्रणवं पूर्वमु[illegible]र्य नमो भगवते ततः ॥१३३॥

ततो वराहरूपाय भूर्भुवस्सुवरित्यपि ।
पतये भूपतित्वं च मोदो हीति पदान्वितम् ॥१३४॥
ददापयेति च स्वाहा क्रमादेव समुद्धरेत् ।
भूवराहमिदं मन्त्रं राज्यश्रीमुक्तिदायकम् ॥१३५॥
वसिष्ठो ऋषिरित्युक्तो गायत्री छन्द उच्यते ।
देवता भूवराहश्च ओं बीजमिति चोच्चरेत् ॥१३६॥
स्वाहा शक्तिःकीलकं ह्रीं कवचं श्रीमितीरितम् ।
ऐमस्त्रमिति चोक्त्वाथ श्वेतो वर्ण इति स्मरेत् ॥१३७॥
ओं नमो भगवते वराहरूपयैति पदम् ।
हृदये विन्यसेन्मन्त्री ह्यन्यत्वे च पदं क्रमात् ॥१३८॥
न्यसेदेव षडंगंतु करन्यासं तु षड्स्वरैः ।
व्याप्यं तत् व्यापकं कुर्यात् तन्मन्त्रेणैव मन्त्रवित् ॥१३९॥
भुजाग्रे भूधरं देवं चक्र ांखधरं विभुम् ।
किरीटादिविभूषांगं भूवराहमहं भजे ॥१४०॥
पुरश्चरणहोमादि पुंसूक्तोक्तवदाचरेत् ।
षण्मन्त्राणि क्रमाद्वक्ष्ये वराहस्य चतुर्मुख ॥१४१॥
सांतं पंचस्वरयुतं बिन्दुनादसमन्वितम् ।
वराहबीजमित्युक्तं लक्ष्मीधनसुवाक्प्रदम् ॥१४२॥
तारांते च तथाप्रोक्तं वराहरूपाय स्वाहा ।
एतत् वै पिण्डमन्त्रं स्यात् सर्वकामफलप्रदम् ॥१४३॥

भूवराहमहोत्साह सर्वशत्रुविनाशक ।
शत्रुसंहर मांरक्ष श्रियं दापय देहिमे ।।१४४।।
भूवराहन्तदेवस्यात् पदमन्त्रमनुत्तमम् ।

भूवराह गायत्री

भूवराहाय विद्महे हिरण्यगर्भाय धीमहि
तन्नः क्रोडः प्रचोदयात् ।।१४५
भूवराहस्य चक्रं स्यात् ब्रह्मास्त्रं सर्वदा भवेत् ।
सदा वैतरणीतीरे चोत्तरे मुक्तिदायके ।।१४६।।
वर्तते भूवराहो सो भुक्तिमुक्तिप्रदायक ।
जपेल्लक्षं तु तत्रैव भुवराहस्य मन्त्रकम् ।।१४७।।
पूजयेत् तद्वराहं वै धर्ममोक्षादि सिद्धये ।
भूवराहस्य मन्त्रेण राजश्रीर्वर्धयेत् सदा ।।१४८।।
अन्यमन्त्रेण कुर्यात् चेत् पूजकश्च विनश्यति ।
कृष्णवेणीनदीतीरे तदा श्रीवेंकटाचले ।।१४९।।
श्रीमुष्णोचैव सिंहाद्रौ भूवराहस्स एव हि ।
वर्तते भक्तरक्षार्थं तत्तत् देशे च सर्वदा ।।१५०।।
अर्चयेत् भूवराहं तं सोश्नुते वांचितं फलम् ।

नारसिंहमन्त्रः

क्रमाद्वक्ष्ये नारसिंहं मन्त्रराजमनुत्तमम् ।।१५१।।

भुक्तिमुक्तिप्रदं नृणां सर्वाभीष्ठफलप्रदम् ।
उद्धार्योग्रं पदं सम्यक् ततो वीरमिति क्रमात् ॥१५२॥
महाविष्णुंइतीत्युक्त्वा ज्वलंतं सर्वतोमुखम् ।
नृसिंहं भीषणं चोक्त्वा ततो भद्रं चतुर्मुख ॥१५३॥
मृत्युमृत्युमितीत्युक्त्वा नमाम्यहं इति क्रमात् ।
ऋषिर्ब्रह्मास्यमन्त्रस्य छन्दोनुष्टुप् तथैवच ॥१५४॥
नृसिंहो देवता चैव रं बीजमिति चोच्यते ।
नमश्शक्तिः कीलकं श्रीं कवचं श्रीमतो भवेत् ॥१५५॥
ऐमित्यस्त्रं तथा चोक्त्वा श्वेतो वर्ण इति स्मृतः ।
पादैरर्धैः षडंगं तु करन्यासं तु विन्यसेत् ॥१५६॥
मन्त्रराजेन कुर्वीत व्याप्यं तत् व्यापकं क्रमात् ।
उग्रं भीमं महाविष्णुं ज्वलन्तं सर्वतोमुखम् ॥१५७॥
नृसिंहं भीषणं भद्रं मृत्युमृत्युं नमाम्यहम् ।
अस्यन्यासादिकं सर्वं काम्ये कुर्याद्विजातयः ॥१५८॥

नृसिंहध्यानम्

सत्यज्ञानसुखस्वरूपं अमलं क्षीराब्धिमध्यस्थितम्
योगारूढमतिप्रसन्नवदनं भूषासहस्त्रोज्वलम् ।
त्र्यक्षं चक्रपिनाकसाभयकरं बिभ्राणमर्कच्छविं
छत्रीभूतफणीन्द्रमिन्दुधवळं लक्ष्मीनृसिंहं भजे ॥१५९॥

पुरच्चरणहोमादि पुंसूक्तोक्तवदाचरेत् ।
षण्मन्त्राणि ततो वक्ष्ये मन्त्रराजस्य तत्क्रमात् ॥१६०॥
ब्रह्मशान्तं वन्हियुतं प्रणवान्तं सबिन्दुकम् ।
नारसिंहमिदं भीजं जयमोक्षप्रदं सदा ॥१६१॥
ओंबीजं जयेति पतं नृसिंहेति पदं ततः ।
नृसिंहपिण्डमन्त्रस्स्यात् सर्वारोग्य जयप्रदः ॥१६२॥
संज्ञामन्त्रः मन्त्रराज इति वेदे प्रपंचितम् ।
(अनुष्टुप्प्रथमा भवति नारसिंहं मन्त्रराजमनुष्टुभम् ।
योजानाति सोमृतत्वं च गच्छतीति श्रुतिः ।)

(प्रक्षिप्तम्)

षण्मन्त्रः

षण्मन्त्राणि वक्ष्येथ वेदमन्त्रेण सादरम् ।
ध्रुवोसि, मानस्तोके , त्रीणिपदा, ज्वालामाला, विश्वतश्चक्षुः,
मृगोनभीमः भीषास्मात् , भद्रं कर्णेभिः , त्र्यंबकं , नमो
ब्रह्मणे, आर्द्रज्वलत्येकादश ।

नृसिंहगायत्री

वज्रनखाय विद्महे तीक्ष्णदंष्ट्राय धीमहि ।
तन्नो नृसिंहः प्रचोदयात् ॥१६३॥

प्रणवं च महामाया वाय्वग्नि विषसंयुतम् ।
रामं नृसिंहं वाराहं चक्रबिंबं विषं पुनः ॥१६४॥
ज्वलज्वलपदं चोक्त्वा दहदहेति च क्रमात् ।
अद्यैव सर्वशक्तान्या इत्युक्त्वा संपुटं च तत् ॥१६५॥
कृत्वा च हूं पदं तस्य म[illegible]मिदं विदुः ।
ओं- रां-सं-रं-शं-रां-क्षां-हूं-यं- श्रीं-
ज्वलज्वल-अद्यैव सर्व शत्रून् हुंफट् ॥१६६॥
मन्त्रमेतत्-भयकरं सर्वशत्रुनिवारणम् ।
मन्त्रराज[illegible] माहात्म्यं वक्तुं श्रोतुं सुदुर्लभम् ॥१६७॥
इति संक्षेपतः प्रोक्तं मन्त्रं च सुलभं तथा ।
बीजांकं फागपंचकं प्रा[illegible]लि[illegible]त् शेषस्य भोगे पुनः॥१६८॥
द्वात्रिंशत् प[illegible]संयुतं प्र[illegible]लि[illegible]क्षराणि क्रमात् ।
बीजे नाम पदानि [illegible] होमेन संपा[illegible]तम् ॥१६९॥
रोगापत्मृति दुःख[illegible]मनं यन्त्रं रिपुध्वंसनम् ।
नृसिंहयन्त्रमेतच्च भुक्तिमुक्तिप्र[illegible]यकम् ॥१७०॥
स्मरन् शत्रुक्षयकरं सर्वाप[illegible]वनाशनम् ।

[illegible]सिंहमन्त्रजपयोग्यस्थलानि

लक्षमेकं जपेत् भक्त्या नारसिंहस्थलादि[illegible] ॥१७१॥
[illegible]स्थले सम्यक् नीलाचल[illegible]मध्यमे ।
श्रीताण[illegible]वधरग्रामे [illegible]सं[illegible]द्रौ वे[illegible] पर्वते ॥१७२॥

अन्तर्वेद्यं विशेषेण वेदाद्रौ श्रुतिपर्वते ।
मंगळाद्रौविशेषेण पाण्डवाद्रौ सुमुक्तिदे ॥१७३॥
तथैव जयवाट्यायां वराहाद्रौ च सर्वदा ।
कुण्डिनपुरमध्यस्थ श्वेतपर्वतमस्तके ॥१७४॥
अनन्तपर्वते रम्ये उन्मुखग्राममध्यमे ।
महाद्रौ तुविशेषेण धर्षपूर्यां सुमुक्तिदे ॥१७५॥
श्वेतपर्वतमध्येतु वृषाद्रौ गटिपर्वते ।
दक्षीणा मधुरायां च धन्विपुर्यां सुमुक्तिदे ॥१७६॥
मुक्तिपर्वतमध्येतु कुरुकापर्वते सदा ।
श्रीरंगे कुंभघोणेच शोणाद्रौ चक्रपर्वते ॥१७७॥
श्वेतपर्वतमध्येतु वृषाद्रौ गजपर्वते ।
कांच्यां स्थानत्रयेसम्यक् श्वेताद्रौघटिकाचले ॥१७८॥
चन्द्राद्रौ तु विशेषेण अनन्ताद्रौ तु मुक्तिदे ।
एते नृसिंहस्थानानि तन्मन्त्रार्चा सुसात्विकाः ॥१७९॥
मन्त्रसिद्धिकरास्सम्यक् सर्वेषां मुक्तिभुक्तिदा ।
एवं नृसिंहस्थानेषु अन्यमन्त्रेण योऽर्चयेत् ॥१८०॥
तस्यवंशक्षयं याति तस्यायुःश्रीश्च नश्यति ।
त[illegible]नृसिंहमन्त्रेण नृहरिं पूजयेत् सदा ॥१८१॥

वामनमन्त्रः

क्रमाद्वामनमन्त्रं वै श्रुणुवक्ष्ये चतुर्मुख ।
तारं मायां समु[illegible]त्य [illegible]ाय नमोन्तकम् ॥१८२॥

श्रीमद्वामनमन्त्रस्यात् राज्यधर्मादिमोक्षदः ।
ऋषिर्ब्रह्मास्य मन्त्रस्य गायत्री छन्द उच्यते ॥१८३॥
हरिर्देवो वामनो वै प्रणवो बीजमुच्यते ।
नमश्शक्तिः कीलकं ह्रीं कवचं श्रीमितिक्रमात् ॥१८४॥
ऐमस्त्रंच तत्कुर्यात् श्यामो वर्ण इति स्मृतः ।
न्यासं पादचतुष्केन तदर्धेन षडंगकम् ॥१८५॥
षड्स्वरैस्तु करन्यासं कुर्यात् आत्मीय विद्यया ।
व्याप्यं तत् व्यापकं चैव त[illegible]क[illegible]येत् ॥१८६॥
चक्रशंखंछत्रवंशधारिणं वामनं हरिम् ।
लक्ष्म्या सह विभूषांगं विप्ररूपधरं भजे ॥१८७॥
ओं ह्रीं वा[illegible] नमः
पुरश्चरणहोमादीन् पुंसूक्तोक्तवदाचरेत् ।
लक्षमेकं जपेत् भक्त्या तन्मन्त्रफलसि[illegible]ये ॥१८८॥
वामनो वर्तते सम्यक् श्रीरंगे गौतमोत[illegible] ।
श्रीमद्बुद्धगिरौ रम्ये सदा मुक्तिप्रदे शुभे ॥१८९॥
सदावामनमन्त्रस्य षणमन्त्राणां च मध्यमे ।
पंचमन्त्राणि सततं हयग्रीवस्य मन्त्रवित् ॥१९०॥
अष्टाक्षरं वामनं स्यात् वामने भेदमेव च ।

त्रिविक्रममन्त्रः

[illegible]मनुं वक्ष्ये क्रमादे[illegible] चतुर्मु[illegible] ॥१९१॥

तारं नमो भगवते त्रिविक्रमाय संयुतम् ।
स्वाहांतं उद्धरेत् मन्त्रं भुक्तिदं स्यात् त्रिविक्रमम् ॥१९२॥
मन्त्रमन्त्ये सर्वमुक्त्वा तन्मन्त्रपदपंचकैः ।
कृत्वाषडंगं तारेण करन्यासं समाचरेत् ॥
व्याप्यंतत् व्यापकं सम्यक् तन्मन्त्रेणैवकारयेत् ।
चक्रशंखधरं देवं ऊर्ध्वपादैकवेषकम् ॥१९४॥
एवं ध्यात्वा जपेल्लक्षं मन्त्रं त्रैविक्रमं शुचिः ।
त्रिविक्रमो वर्तते वै कांच्यां मुक्तिप्रदस्थले ॥१९५॥
आंद्रदेशे महारण्ये लवणार्कपुरे तथा ।
सदा गोदावरीतीरे आम्रपुर्यां सुमुक्तिदे ॥१९६॥
जपेत्तं पूजयेन्नित्यं श्रीमुक्त्यार्थं त्रिविक्रमम् ।
चतुर्दशाक्षरं चैतत् पिण्डमन्त्रं भवेत् सदा ॥१९७॥
अन्यत्बीजानि मन्त्राणि हयग्रीवस्य मन्त्रवित् ।
पुरश्चरणहोमं च पुंसूक्तोक्तवदाचरेत् ॥१९८॥

श्रीराममन्त्रः

श्रीराममन्त्रं वक्ष्येऽथ क्रमादेव चतुर्मुख ।
रामभद्रपदं चोक्त्वा महेष्वासपदं ततः ॥१९९॥
रघुवीरपदं सम्यक् नृपोत्तम पदं ततः ।
दशास्यान्तकसंयुक्तं मां रक्षपदमुद्धरेत् ॥२००॥
देहिदापय चेत्युक्त्वा मे श्रियं तत्क्रमात्ततः ।
तारकब्रह्ममन्त्रं स्यादेतन्मोक्षादिदायकम् ॥२०१॥

ऋषिर्ब्रह्मास्य मन्त्रस्य अनुष्टुप् छन्द उच्यते ।
श्रीरामो देवता सम्यक् प्रणवं बीजमुच्चरेत् ॥२०२॥
श्रियं शक्तिः कीलकं ह्रीं कवचं श्रीमितिक्रमात् ।
ऐमस्त्रमिति चोक्त्वाऽथ श्यामो वर्ण इतिस्मृतः ॥२०३॥
न्यसेत् पादचतुष्केण अर्धेनैव षडंगकम् ।
ज्ञानाद्यैश्च करन्यासं तार्तीयेन श्रिया सह ॥२०४॥
व्याप्यं तत् व्यापकं चैव तन्मन्त्रेणैव कारयेत् ।

श्रीरामध्यानम्

वामेभूमिसुता पुरस्तु हनुमान् पश्चात् सुमित्रासुतः
शत्रुघ्नो भरतश्च पार्श्वदशयोर्वाय्वादिकोणेषु च ।
सुग्रीवश्च विभीषणश्च युवराट् तारासुतो जाम्बवान्
मध्ये नील सरोजकोमलरुचिं रामं भजे श्यामळम् ॥२०५॥
ध्यात्वा श्रीराममममलं सर्वाभरणभूषितम् ।
लक्षमेकं जपेत् भक्त्या धर्ममोक्षार्थसिद्धये ॥२०६॥
पुरश्चरण होमादि पुंसूक्तोक्तवदाचरेत् ।
एतत् श्रीराममन्त्रस्य तारं बीजमनुर्भवेत् ॥२०७॥
तारं श्रीराघवेत्युक्त्वा रामायेति नमोन्तकम् ।
इदं तत्पिण्डमन्त्रं स्यात् राममन्त्रस्य सर्वदा ॥२०८॥
अनुष्टुभं तु संज्ञा स्यात् क्रमादेव चतुर्मुख ।
ततो राजाधिराजायपदमन्त्रमिति स्मृतम् ॥२०९॥

श्रीरामगायत्री

धनुर्धराय विद्महे रामभद्राय धीमहि ।
तन्नो रामः प्रचोदयात् ॥२१०॥
एषा वै रामगायत्री युक्तिज्ञानार्थदायकाः ।
पूर्वोक्तमेव ब्रह्मास्त्रं हंसमन्त्रस्यतद्भवेत् ॥२११॥
षण्मन्त्राणि सदा ज्ञात्वा नृसिंहानुष्टुभस्य च ।
अक्षरं पदपादं वै राममन्त्रेण कारयेत् ॥२१२॥
रामस्तु सामगानेन प्रीतो भवति तत्क्षणात् ।
सामार्धसामगानेन सर्वार्थं चिंतितं भवेत् ॥२१३॥
सामगानविहीनेतु षण्मन्त्राणि क्रमेण तु ।
बीजाद्यस्त्रान्तममलं ज्ञात्वा तज्जपमाचरेत् ॥२१४॥
सामगानात् कोटिगुणं फलं सत्यमवाप्नुयात् ।
तस्मात् सर्वप्रयत्नेन षण्मन्त्राण्यभ्यसेत् द्विजः ॥२१५॥
सत्यं सत्यं पुनस्सत्यं इदमेव चतुर्मुख ।

राममन्त्रम्

राममन्त्रं ततो वक्ष्ये तन्मन्त्रफलसिद्धये ॥२१६॥
सौवर्णे राजते ताम्रे यन्त्रेस्निग्धेसुशोभने ।
मध्ये त्रिकोणमालिख्य तन्मध्ये प्रणवं लिखेत् ॥२१७॥
श्रिया तद्रामबीजं च महामायां च मायया ।
मोक्षसाध्यादिकं लिख्य तार्तीयेनैव वेष्टयेत् ॥२१८॥

बहिष्षट्कोणमालिख्य तत्कोणेषु क्रमात्बुधः ।
रामं षडक्षरं लिख्य सद्यो विष्णु षडक्षरम् ॥२१९॥
माया बीजेन संवेष्ट्य बहिरष्टदळं लिखेत् ।
श्रीरामाष्टाक्षरं लिख्य सन्धो मूलमनुं लिखेत् ॥२२०॥
श्रीबीजेन सुसंवेष्ट्य तत्बहिर्द्वादशं दळम् ।
सीतारामतद्दळेषु वा सुदेवं तु संधिषु ॥२२१॥
भूबीजेन संवेष्ट्य तत्बहिष्षोडशं दळम् ।
तद्दळेषु स्वरान् लिख्य तत्सन्धौ हनुमन्मनुम् ॥२२२॥
रामबीजेन संवेष्ट्य बहिरष्टादशं दळम् ।
अष्टादशाक्षरं कृष्णं सन्धौ चक्र नृसिंहकम् ॥२२३॥
मान्मथेन सुसंवेष्ट्य द्विर्द्विविंशदळं बहिः ।
दळेषु रामगायत्रीं गायत्रीं संधिषुक्रमात् ॥२२४॥
द्वात्रिंशद्दळमालिख्य तद्दळेषु क्रमात् बुधः ।
श्रीरामानुष्टुभं लिख्य तत्सन्धौनारसिंहकम् ॥२२५॥
श्रीबीजेन सुसंवेष्ट्य बहिः पार्थिवमण्डलम् ।
यन्त्रांगानि ततो लिख्य प्राणस्थापनमाचरेत् ॥२२६॥
तद्यन्त्रं पूजयेत् भक्त्या काम्यार्थी धारयेत् ततः ।
भचेन्मोक्षं विशेषेण प्रतीनां च विशेषतः ॥२२७॥
महापार्तकीनां सम्यक् भवेन्मोक्षः सु[illegible]म् ।
शात्रक्षयार्थी राज्यार्थी येन [illegible] धार्यते ॥२२८॥

सर्वरोगविनाशार्थं सन्तानाद्यादिसिद्धये ।
श्रीरामतारकं ब्रह्मन्मन्त्रस्स च चतुर्मुख ॥२२९॥
सत्यं सत्यं पुनस्सत्यं नास्ति लोके चतुर्मुख ।
श्रीरामस्यांगमन्त्राणि वक्ष्ये तन्मन्त्रसिद्धये ॥२३०॥
श्रीमत्यै सीतायै स्वाहा सीतामन्त्रो भवेत् सदा ।
लक्ष्मणाय नमो मन्त्रः तद्भवेल्लक्षमणस्य च ॥२३१॥
भरताय नमोन्तं वै भरतस्य मनुर्भवेत् ।
शत्रुघ्नाय नमश्चैतत् शत्रुघ्नस्य मनुर्भवेत् ॥२३२॥
मं मर्खटायनमश्च हनुमन्मन्त्रउत्तमः ।
सुं सुग्रीवाय नमस्च सुग्रीवस्यमनुर्भवेत् ॥२३३॥
विं विभीषणाय नमो विभीषण मनुर्भवेत्।
मं मर्कटाय नमश्च अंगदस्य मनुर्भवेत् ॥२३४॥
जं जांबवते नमश्च जांबवन्मनुरेव सः ।
त्रिर्जपेदंगमन्त्राणि राममन्त्रस्य साधकः ॥२३५॥
रामसंग्रहमन्त्राणि सर्वेषां सर्वसिद्धये ।
मुमुक्षूणां प्रपन्नानां विष्णुसायुज्य सिद्धये ॥२३६॥

बलराममन्त्रः

बलराममनुं वक्ष्ये क्रमादेव चतुर्मुख ।
प्रणवं बलरामाय नमोन्तं पदमुद्धरेत् ॥२३७॥

सर्वसंपत्प्रदं नृणां मोक्षधर्मादि दायकम् ।
बलरामाख्यमन्त्रस्य ऋषिर्ब्रह्मा भवेत् सदा ॥२३८॥
छन्दस्च देवी गायत्री बलरामश्च देवता ।
ओं बीजं च नमश्शक्तिः कीलकं ह्रीमिति क्रमात् ॥२३९॥
श्रीं कवचं ऐमित्यस्त्रं श्वेतो वर्ण इतिस्मरेत् ।
पद्मयन्त्रेण मन्त्रस्य द्विरुच्चार्य षडंगकम् ॥२४०॥
करन्यासं ततः कुर्यात् ताराबीजेन संयुतम् ।
व्याप्यं तत् व्यापकं चैव तन्मन्त्रेणैव कारयेत् ॥२४१॥
बलराममहं वन्दे मुसलिं हलधारिणम् ।
सर्वाभरणभूषांगं अनन्तं श्रीपतिं सदा ॥२४२॥
लक्षमेकं जपेत् भक्त्या श्रीरामस्य स्थलादिषु ।
अयोध्यायां च नीलाद्रौ पुष्पभूभृति मुक्तिदे ॥२४३॥
काश्यां गयायां चन्द्राद्रौ धान्विपुर्यां विशेषतः ।
रामेश्वरे विशेषेण अन्यरामस्थलादिषु ॥२४४॥
शुचिभक्त्या जपं कुर्यात् रामचन्द्रस्य सन्निधौ ।
तथा जपेत् रामनाम काश्यादौ रुद्रवत् सदा ॥२४५॥
मोक्षधर्मादिसिद्ध्यर्थं देवत्वादिसुसिद्धये ।
ब्रह्महत्यादि नाशार्थं संभजेत् राममेव हि ॥२४६॥
स्मरेत् ध्यायेत् जपेत् सर्वबन्धविमुक्तये ।
रामस्य लक्ष्मणस्यैव बलरामस्य सर्वदा ॥२४७॥

कृष्णस्य भेदो नास्त्यैव येन मोहो भवेत् सदा ।
तत्र द्विग्रहपूजार्थं मन्त्रभेदी भवत् सदा ।।२४८।।
तत्तत् बिम्बप्रतिष्ठार्थं चिन्तितार्थादिसिद्धये ।
तत्तत् विग्रहपूजायां तत्तन्मन्त्रेण पूजयेत् ।।२४९।।
अन्यथा यःकरोत्येव तस्यायुः श्रीश्च नश्यति ।।

कृष्णमन्त्रः

कृष्णमन्त्रं क्रमाद्वक्ष्ये तस्मादेव चतुर्मुख ।।२५०।।
स्वरांतमिन्द्रसंयुक्तं महामाया विभूषितम् ।
बिन्दुनादसमायुक्तं कृष्णमन्त्रमिदं भवेत् ।।२५१।।
मोक्षधर्मप्रदं नृणां सर्वाभीष्टप्रदायकम् ।
सदा श्रीकृष्ण मन्त्रस्य ब्रह्मा ऋषिरुदाहृतः ।।२५२।।
छन्दश्च देवी गायत्री देवता भगवान् ततः ।
श्रीकृष्णः परमात्मेति ईं शक्तिरिति संस्मरेत् ।।२५३।।
मायाकीलकमित्युक्तं श्रींकवचं ऐमित्यस्त्रम् ।
श्यामो वर्ण इति ध्यायेत् मान्त्रीकः च चतुर्मुख ।।२५४।।
तद्बीजेन करन्यासं षडंगं षड्स्वरैर्न्यसेत् ।
व्याप्यं तत् व्यापकं चैव तन्मन्त्रेणैव कारयेत् ।।२५५।।
कोदण्डमैक्षवमनेकशरं च पौष्यं
चक्रोब्ज पाशसृणिकांचनवंशनाळम् ।
बिभ्राणमष्टाविनिधबाहुभिरर्कवर्णं
ध्यायेत् हरिं म-नगोपविलासवेषम् ।।२५६।।

एवं ध्यात्वा जपेन्मन्त्रं लक्षमेकं सदा सुचिः ।
क्षत्रविट्शूद्रजात्याद्या मोक्षधर्मादिसिद्धये ॥२५७॥
पुरश्चरणहोमादीनाचारं जातिभेदतः ॥२५८॥
सहस्त्रनामवत् कुर्यात् सर्वदा कमलासन ।
षण्मन्त्रादीन् ततो वक्ष्ये कृष्णमन्त्रस्य सादरम् ॥२५९॥
कृष्णमन्त्रफलोक्तानां सिद्धये सर्वदा ततः ।
सहस्त्रनामवत्कुर्यात् सर्वदा कमलासन ॥२६०॥
षण्मन्त्रादीन् ततो वक्ष्ये कृष्णमन्त्रस्य सादरम् ।
कृष्णमन्त्रफलोक्तानां सिद्धये सर्वदा ततः ॥२६१॥
पूर्वोक्तबीजमन्त्रस्यात् कृष्णमन्त्रेषु सर्वदा ।
सान्तं षान्तं स्व[illegible]न्तं चरान्तं यान्तसमिन्वितम् ॥२६२॥
महामायासमायुक्तं बिन्दुनादसमन्वितम् ।
सम्मोहनाख्य गोपाल पिण्डमन्त्रमिदं विदुः ॥२६३॥
देवकीपुत्र गोविन्द वासुदेवजगत्पते ।
देहि मे तनयं कृष्ण त्वामहं शरणंगतः ॥२६४॥
संज्ञामन्त्रमिदं प्रोक्तं गोपालस्य विधानतः ।
मान्मथं पूर्वमुद्धृत्य कृष्णायपद संयुतम् ॥२६५॥
गोविन्दाय पदं चोक्त्वा गोपीजन पदं ततः ।
वल्लभाय पदं चोक्त्वा स्वाहान्तं मन्त्रमुद्धरेत् ॥२६६॥

श्रीकृष्णस्य पदं मन्त्रमिति चोक्तं मयानघ ।
गोविन्दाय विद्महे वासुदेवाय धीमहि ।
तन्नः कृष्णः प्रचोदयात् ।
एतद्वै कृष्णगायत्री सर्वसिद्धिप्रदायिका ॥२६७॥
अत्रिस्त्रिमूर्तिसहितोथशिवोत्तमश्च
वन्हिर्भृगुस्त्वमरनायकसंप्रयुक्तः ।
सुप्यस्त्विमन्त्वरिपदं च ततः प्रयोज्य
मायात्मनेति च पदं तमसः परंस्यात् ॥२६८॥
प्रस्वापनं तदिदमाहुरशेषवैरि
सेनासमूहपरिमोहनकारमुख्यम् ॥२६९॥
मोहनास्त्रमिदं प्रोक्तं कृष्णमन्त्रस्य सर्वदा ।
सम्मोहनाख्य बीजं च वाय्वग्नि विषसंयुतम् ॥२७०॥
मोहनास्त्रेण संयोज्य पाशांकुशसमन्वितम् ।
सम्मोहनास्त्रममलं भवेत् सर्वफलप्रदम् ॥२७१॥
बीजमन्त्रं जपेद्वापि पदपिण्डजपादिषु ।
अन्यत्तत् पंचमन्त्राणि त्रिवारं वै जपेत् सदा ॥२७२॥
गोपालमन्त्रसिद्ध्यर्थं प्रतिष्ठाद्यादि कर्मसु ।
विष्णुसायुज्यसिद्ध्यर्थं विष्णुपूजादिसिद्धये ॥२७३॥

श्रीकृष्ण यन्त्रः

श्रीकृष्णयन्त्रं वक्ष्येऽथ तन्मन्त्रफलसिद्धये ।
सौवर्णे रजते ताम्रे शुद्धद्रव्ये सुयन्त्रके ॥२७४॥

अग्निमण्डलमालिख्य तन्मध्ये नामसंयुतम् ।
कृष्णबीजं महामायां सम्मोहन मनुं क्रमात् ॥२७५॥
श्रीबीजं पंचबाणांश्च लिखेत्तन्मन्त्रविद्गुरुः ।
प्रणवेन सुसंवेष्ट्य बहिष्षट्कोणमालिखेत् ॥ २७६॥
षडक्षरं कृष्णमन्त्रं सन्धौ विष्णुषडक्षरम् ।
मान्मथेन सुसंवेष्ट्य बहिरष्टदळं लिखेत् ॥२७७॥
अष्टाक्षरं कृष्णमन्त्रं तद्दळेषु लिखेत् बुधः ।
मूलमन्त्रं तु तत्संधौ श्रीबीजेनैव वेष्टयेत् ॥२७८॥
बर्हिदशदळं लिख्य तन्त्रं कृष्णदशाक्षरम् ।
संधौ राममनुं लिख्यः रामबीजेन वेष्टयेत् ॥२७९॥
तद्बहिर्द्वादशदळं गोपाल द्वादशाक्षरम् ।
वासुदेवं तु तत्सन्धौ किटिबीजेन वेष्टयेत् ॥२८०॥
तद्बहिष्षोडशदळं तद्दळेषु स्वरान् लिखेत् ।
हयग्रीवं तु तत्सन्धौ लक्ष्मीबीजेन वेष्टयेत् ॥२८१॥
बहिरष्टदशदळं तत् दळेषु लिखेत् बुधः ।
अष्टादशाक्षरं कृष्णं सन्धौ वाराहमुत्तमम् ॥२८२॥
मान्मथेन सुसंवेष्ट्य बहिः पार्थिवमण्डलम् ।
यन्त्रांगानि तदालिख्य प्राणस्थापनमाचरेत् ॥२८३॥
बीजं प्राणश्च शा[illegible] दृष्टिवास्त्यादिकस्सदा ।
गायत्रीयन्त्रमन्त्रे च प्राणस्थापनमेव च ॥२८४॥
भूतदिक्पालमूलानि यन्त्रस्यांगानि वै दश ।
अन्तर्मुखं सुषुप्तं स्यात् जाग्रद्वर्णं बहिर्मुखम् ॥२८५॥

सर्वतोमुखमेकं स्यात् यन्त्ररूपमिदं भवेत् ।
विद्वेषे स्वप्न उच्चाटे जाग्रवत्यादि सेव्यके ॥२८६॥
स्तम्भने क्रूरकर्मादौ सर्वयन्त्रं समुद्धरेत् ।
एतद्गोपालयन्त्रं तु पूजयेत् धारयेत् सदा ॥२८७॥
विष्णुसायुज्यसिद्ध्यर्थं [illegible]सिद्धये ।
आयुरारोग्यपत्न्यादि पुत्रराज्यादि वृद्धये ॥२८८॥
सर्वशत्रुक्षयार्थं च सर्वाभी[illegible]दि सिद्धये ।
परसेनाजयार्थं च स्वसेनारक्षणाय च ॥२८९॥
समस्तचिन्तितार्थाय महापातकनाशने ।
धारयेत् पूजयेत् यन्त्रं एतदेव चतुर्मुख ॥२९०॥
सत्यं सत्यं पुनस्सत्यं एतदेव सुनिश्चितम् ।
दशावतारमन्त्रश्च मुख्य चेतो सदा तथा ॥२९१॥
मुमुक्षूणां प्रपन्नानां [illegible]चतुर्मुख ।

[illegible]ष्णस्थानानि

भुक्तिमुक्तिप्रदान्येथ वक्ष्ये कृष्णस्थलानि च ॥२९२॥
नन्दव्रजं च मथुरा दक्षीणा मथुरा तथा ।
[illegible]रवती पुष्पशैलं पाण्डुरंगं सुमुक्तिदम् ॥२९३॥
जया[illegible]ती पाण[illegible]चलः ।
नीलाचलो हरिद्वारं श्रीशैलं कमलापुरी ॥२९४॥
श्रीता[illegible]वपुरं चैव सदा श्री[illegible]काकुळत्रयम् ।
श्रीकांची काळहस्ती च श्रीगिरिर्जंबुकेश्वरम् ॥२९५॥

महाकांची विष्णुपुरं नीलग्रामं सुमुक्तिदम् ।
एतानि कृष्णस्थानानि भुक्तिमुक्तिप्रदानि वै ॥२९६॥
श्रीरंगं कुम्भकोणं च चित्रकूटं कुशस्थलम् ।
तथा भवेत् विशेषेण तथा सोमपुरं सदा ॥२९७॥
मलयाद्रिर्जलपुरं केदारं काशिका भवेत् ।
एतत्स्थलेषु कृष्णं वै मोक्षार्थी पूजयेत् सदा ॥२९८॥
मयोक्तं कृष्णमन्त्रेण प्रपन्नस्य विशेषतः ।
गृहे वा पट्टणे ग्रामे मोक्षार्थी यो नरोत्तमः ॥२९९॥
कृष्णमन्त्रं परित्यज्य कृष्णनित्योत्सवादिषु ।
पूजयेन्नित्यपूजां च काम्यादिकमथापि वा ॥३००॥
अर्चयेदस्यमन्त्रेण स याति नरकं ध्रुवम् ।
तस्य वंशक्षयं याति राजा राष्ट्रं विनश्यति ॥३०१॥
तन्मन्त्रेणैव तद्बिम्बं अर्चयेत् सततं नरः ।
हंसादि कृष्णपर्यन्तं मूर्तिमन्त्रक्रमेण च ॥३०२॥
संग्रहेणोक्तममलं सात्विकाहुति मुक्तिदम् ।
तत्तद्बिम्बप्रतिष्ठार्थं तत्तत्पूजादिसिद्धये ॥३०३॥
प्रपन्नानां मुमुक्षूणां विष्णुसायुज्यसिद्धये ।
हंसादि कृष्णमन्त्राणां देवता वर्तते तथा ॥३०४॥
वक्ष्ये तद्बिम्बपूजार्थं प्रतीष्ठाद्यादिसिद्धये ।
तत्तन्मन्त्रफलोक्तादि सिद्धये च चतुर्मुख ॥३०५॥
अष्टौ तत् हंसमन्त्राश्च मत्स्यमन्त्रश्च षोडश ।

हयग्रीवस्य मन्त्राणां भेदश्च द्वादशक्रमात् ।।३०६।।
कूर्ममन्त्राश्च षड्प्रोक्ताः किटिमन्त्राश्च षोडश ।
तदा नृसिंहमन्त्राश्च चतुषष्टिंश्चतुर्मुख ।।३०७।।
दशवामनमन्त्राश्च षट्त्रिविक्रममेव च ।
षड्त्रिंशद्राममन्त्राश्च बलमन्त्राश्च षोडश ।।३०८।।
कृष्णमन्त्रस्त्रयस्त्रिंशद्गरुडा विंशतिः क्रमात् ।
द्विशतं चक्रमन्त्राश्च पंचचक्रास्य केसराः ।।३०९।।
लक्ष्मीमन्त्रास्तू पंचाशत् भूमन्त्रात्रिंशदेवहि ।
नीळामन्त्रस्त्रयस्त्रिंशत् मन्त्राश्चानन्तका दश ।।३१०।।
शंखचक्रगदामन्त्रास्सदस्त्राणां त्रयस्त्रयः ।
दश सेनेश मन्त्रास्च सत्यमन्त्रास्च षोडश ।।३११।।
द्वे द्वे पुरुषमन्त्रस्च षोडश हनुमतः ।
पंचाशद्वर्णमन्त्रश्च हलचा मिति कथ्यते ।।३१२।।
केशवादिचतुर्विंशत्मन्त्रास्सत्यं चतुर्मुख ।
मन्त्रनामत्रयं चैकं मन्त्रसख्याः प्रकीर्तिताः ।।३१३।।
सह[illegible]र्तीनां मन्त्राः पंच[illegible]ः ।
एते मन्त्राः प्रपन्नानां विष्णुसायुज्यदायकाः ।।३१४।।
सर्वेषामिष्टसिद्ध्यादि दायकास्सात्विकोत्तमाः ।
तत्त[illegible]र्चनादो तु त्पतन्मन्त्रेण कारयेत् ।।३१५।।

इति श्रीपांचरात्रे पराशरसंहितायां विशिष्टपरमधर्मशास्त्रे

पञ्चदशोऽध्यायः

अथ षोडशोऽध्यायः

अथ वक्ष्ये विधानेन मन्त्रं सौदर्शनं क्रमात् ।
सुदर्शनं नृसिंहं च तम्मनुं वै चतुर्मुख ॥१॥
सहस्त्रारेति हुम्फट् च मन्त्रं सौदर्शनं भवेत् ।
सर्वैश्वर्यकरं नृणां [redacted]पुण्यदायकम् ॥२॥

सुदर्शनमन्त्रः

सर्वरोगहरं शान्तं सर्वशत्रुक्षयं सदा ।
अहिर्बुध्न्य ऋषिरस्य गायत्री छन्द उच्यते ॥३॥
सुदर्शनो देवता वै श्रीं बीजं प्रणवं तु वा ।
शक्तिः षडिति चोक्त्वाथ श्रीं कीलकमितिस्मृतम् ॥४॥
श्रीं कवचं ऐमित्यस्त्रं रक्तो वर्ण इति स्मृतः ।
द्विवारं मन्त्रमुच्चार्य पदषट्कैष्षडंगकम् ॥५॥
तन्मन्त्रेण तु करन्यासं कुर्यात् स्थानादि षड्गुणैः ।
व्याप्यंतत् व्यापकं चैव तन्मन्त्रेणैव कारयेत् ॥६॥
शंखं चक्रं च चापं परशुमसिमिषुं शूलपाशांकुशाग्नीन्
बिभ्राणं वज्रखेटं हलमुसलगदा कुण्डमत्युग्रदंष्ट्रम् ।
ज्वालाकेशं त्रिनेत्रं ज्वलदनलनिभं हारकेयूरभूषं
ध्यायेत् षट्कोणसंस्थं सकलजनप्राणसंहारचक्रम् ॥७॥
लक्षमेकम् जपेत् भक्त्या सौदर्शनमनुत्तमम् ।
पश्चात् चक्रप्रतिष्ठां च कार्या मोक्षासिद्धये ॥८॥

ज्येष्ठे मासे शुक्लपक्षे द्वादश्याम् शुक्रवासरे ।
चित्रा नक्षत्रके सौम्येलग्ने कर्कटके शुभे ॥९॥
विष्णोरंशावतार चक्ररूपी जनार्दनः ।
पुरश्चरणहोमादि पुंसूक्तोक्तवदाचरेत् ॥१०॥
सौदर्शनस्यमन्त्रस्य षण्मन्त्राण्युच्चरेत् ततः ।
षांतं सांतं पुनष्षान्तं वन्हि बिन्दुसमन्वितम् ॥११॥
सम्यक् चतुस्वरोपेतं कालाग्निसदृशप्रभम् ।
सौदर्शनमिदं बीजं सृष्टिस्थित्यन्तकारणम् ॥१२॥
पूर्वोक्तं पिण्डमन्त्रंस्यात् सौदर्शनमनुत्तमम् ।
भगवन् सर्वविजयिन्सहस्त्रारायराजित ॥१३॥
शरणं त्वां प्रपन्नोस्मि श्रीकरं श्रीसुदर्शनम् ।
संज्ञा सौदर्शनं मन्त्रं इदं सर्वार्थदायकम् ॥१४॥
ओं ब्रह्म सुदर्शनचक्रराज सर्वदुष्टभयंकर ।
छिन्धि छिन्धि छिन्धि छिन्धि विदारय विदारय ॥१५॥
परमन्त्रान् ग्रासयग्रासय भूतानित्रासय त्रासय ।
परमन्त्रतन्त्रौषधकृत्रिमान् दह दह भस्मीकुरु भस्मीकुरु ।
सर्वशत्रून् हन हन हुम्फट्स्वाहा ॥१६॥
सौदर्शनस्य मन्त्रस्य पदमन्त्रमिदं भवेत् ।
ज्वालाचक्राय विद्महे महाचक्राय धीमहि ।
तन्नः चक्रः प्रचोदयात् ॥१७॥

एषा वै चक्रगायत्री भुक्तिमुक्तिप्रदायिका ।
वाय्वग्निविषसंयुक्तं पाशांकुशसमन्वितम् ॥१८॥

नृसिंहानुष्टुप्चक्रम्

नृसिंहबीजं चक्राख्यबीजं राममनुत्तमम् ।
विषाग्निवायुसंयुक्तं कालचक्रास्त्रमुच्यते ॥१९॥
सर्वरोगक्षयकरं सर्वसंहारकारणम् ।
लिखेदानुष्टुभं चक्रं तद्बीजं फणिपंचके ॥२०॥
पार्थिवं मण्डलं लिख्य यन्त्रांगानि तदा लिखेत् ॥२१॥
बीजांख्यं फणिपंचके प्रविलिखेत् शेषस्य भोगे पुनः ।
द्वात्रिंशत् पदसंयुते प्रविलिखेत् मन्त्राक्षराणि क्रमात् ।
बीजो नाम पदानि सादितमिदं होमेन संपादितं
रोगेविस्मृति दुःखशोकशमनं यंत्रं रिपुध्वंसनम् ॥२२॥
एतद्यन्त्रं परं धीमान् लिखेत् तन्मन्त्रसिद्धये ।
पूजयेत् धारयेत् सम्यक् सर्ववांछादिसिद्धये ॥२३॥
सुदर्शनस्य स्थानानि कुम्भकोणं सदाभवेत् ।
श्रीरंगं मंगळाद्रिं च कुण्डिनीपरमुत्तमम् ॥२४॥
मुक्तिक्षेत्रे नागपुर्यां वेदाद्रौ वृषभाचले ।

सुदर्शन-नृसिंहमन्त्रौ

सुदर्शनं नारसिंहं मन्त्रं वक्ष्ये क्रमात् ततः ॥२५॥

तारमादौ सहस्त्रार ज्वालावर्तिनं उद्धरेत् ।
नृसिंहैकाक्षरं चोक्त्वा हननेति पदं क्रमात् ॥२६॥
हुम्फट्स्वाहा समुद्धृत्य मन्त्रं चक्रनृसिंहकम् ।
भवेदेतन् महामन्त्रं शीघ्रं सर्वफलप्रदम् ॥२७॥
सर्वशत्रुक्षयकरं विष्णुसायुज्यदायकम् ।
पदषट्कैःकरन्यासं षडंगं कारयेत् शुचिः ॥२८॥
व्याप्यं तत् व्यापकं चैव तन्मन्त्रेणैव कारयेत् ॥२९॥
बिभ्राणं शक्तिखड्गं ज्वलनमथसृणीकुंतदन्तो कुठारं
चक्रं शंखाब्जपाशान् हलमुसलगदाखेटशूलांश्च दोर्भिः ।
प्रत्यालीढं तमीडे त्रिनयनलसितं पिंगकेशं सुदंष्ट्रम्
देवं पंचार्ध योगासनलसित चतुश्चक्रभास्वन् नृसिंहम् ॥३०॥
अयुतं जपमात्रेण सर्वसिद्धिं समाप्नुयात् ।
भुक्तिमुक्ती च सुलभे सर्वासिद्धिं समाप्नुयात् ॥३१॥
कृते श्रावणमासे वै दशम्यां शुक्लपक्षके ।
ज्येष्ठनक्षत्रके लग्ने सिंहाख्ये शोभनाह्वये ॥३२॥
सुदर्शननृसिंहस्य अवतारमभूत् तदा ।
सर्वशत्रुक्षयार्थं वै भक्तानां सर्वसिद्धये ॥३३॥
एतज्जयन्तीं यःकुर्यात् तस्यमन्त्रफलं भवेत् ।
अथौदम्बरमूलेतु देवदेवं निवेशयेत् ॥३४॥
त[illegible] वर्तुलेकुण्डे हुनेद्वै खादिरं समित् ।

अथ शत्रुं च संस्मृत्य तर्पणं वापि कारयेत् ॥३५॥
दासवत् कुरुते शत्रून् किं न सद्यस्ततो भवेत् ।
षण्मन्त्रांश्चैव यन्त्रं च सर्वं सौदर्शनं यथा ॥३६॥
यन्त्रमध्ये लिखेन्मन्त्रं साधुचक्र- सिंहकम् ।
एतद्भेदं [illegible] प [illegible] चान्मन्त्रं जपेत् बुधः ॥३७॥
श्रीरंगं वृषभाद्रिं च कनकापुर [illegible] त्तमम् ।
मंगळा[illegible] गजाद्रिं च सदा चक्रस्थलानिवै ॥३८॥

इति श्री[illegible] पराशरसंहितायां विशिष्ठपरमधर्मशास्त्रे
षोडशोऽध्यायः

अथ सप्तदशोऽध्यायः

पंचा[illegible]

क्रमाद्वक्ष्ये [illegible]खमन्त्रं [illegible] ततः परम् ।
प[illegible]ममन्त्रं ततो वक्ष्ये तत् प्रतिष्ठा[illegible] सिद्धये ॥१॥
श्री[illegible]खाय नम[illegible]ते शंखमन्त्राम[illegible] भवेत् ।
सदा मुक्तिप्र[illegible] शांतं दारपु[illegible]म् ॥२॥
[illegible]षिर्व्यासोऽस्य मन्त्रस्य गायत्री छन्द उच्यते ।
[illegible]खरूपी हरिर्दे[illegible] [illegible]मन्त्रता ॥३॥
श्रीं कीलकं वं कवचं लं अस्त्रमिति [illegible]ते ।
श्वेतवर्ण इतिप्रोक्तस्सर्व[illegible] कमलासन ॥४॥
षट्प[illegible]स्तु कर[illegible] द्वि[illegible] मनुं क्रमात् ।

कुर्यात् षडंगन्यासं च ज्ञानादिगुणसंयुतम् ॥५॥
व्याप्यं तत् व्यापकं चैव तन्मन्त्रेणैव कारयेत् ।
चक्रशंखादि बाणासिधारिणं वनमालिनम् ॥७॥
सर्वाभरणसंयुक्तं भजेत् शंखहरिं सदा ।
पुरश्चरणहोमादीन् पुंसूक्तोक्तवदाचरेत् ॥८॥

गदामन्त्रः

गदामन्त्रं क्रमाद्वक्ष्ये तत्प्रतिष्ठादिसिद्धये ।
रोगदाय नम इति गदामन्त्रमिदं भवेत् ॥९॥
विद्वेषणकरं चैतत् सर्वसंहारकारणम् ।
मार्कण्डेय ऋषिस्सम्यक् मन्त्रस्यास्य विशेषतः ॥१०॥
पङ्क्तिश्छन्द इति प्रोक्तं न्यसेत् तन्मन्त्रवित् क्रमात् ।
गदारूपी हरिर्देवो रां बीजं शक्ति रुं ततः ॥११॥
यंकीलकं वं कवचं रं अस्त्रं पीतवर्णकम् ।
पदषड्कैः करन्यासं द्विरुच्चार्य मनुं स्मरन् ॥१२॥
ज्ञानादि षड्गुणोपेतं षडंगं कारयेत् सदा ।
व्याप्यं तत् व्यापकं चैव तन्मन्त्रेणैव कारयेत् ॥१३॥
चक्रशूलधरं देवं खड्गं डमरुधारिणम् ।
सर्वालंकारसंयुक्तं गदारूपहरिं भजे ॥१४॥
पुरश्चरणहोमादि पुंसूक्तोक्तवदाचरेत् ।

पद्म मन्त्रः

पद्ममन्त्रं क्रमाद्वक्ष्ये तत्प्रतिष्ठादिसिद्धये ॥१५॥
ह्रीं पद्मनाभाय इति पद्ममन्त्रं भवेत् सदा ।
सर्वसृष्टिकरं मन्त्रं भुक्तिमुक्त्यादिदायकम् ॥१६॥
मन्त्रस्यास्य [illegible] जगती छन्द उच्यते ।
पद्मरूपी हरिर्देवो ह्रीं बीजं शक्ति रीं ततः ॥१७॥
श्रीं कीलकं ऐं कवचं लं अस्त्रमिति चोच्यते ।
श्वेतो वर्ण इति प्रोक्तस्तं जपेन्मन्त्रवित् क्रमात् ॥१८॥
षड्स्वरैस्तु करन्यासं द्विरुच्चार्य मनुं क्रमात् ।
ज्ञानाद्यैस्तु षडंगं तु कुर्यात् तन्मन्त्रकेन च ॥१९॥
व्याप्यं तत् व्यापकं चैव तन्मन्त्रेणैव कारयेत् ।
शंखचक्रगदापद्मधारिणं विभुमव्ययम् ॥२०॥
किरीटादि विभूषांगं भजेत् पद्महरिं सदा ।
पुरश्चरणहोमादि पुंसूक्तोक्तवदाचरेत् ॥२१॥
जपेत्तन्मन्त्रबिम्बं वै प्रतिष्टार्चादिकर्मसु ।

इति श्रीपांचरात्रे पराशरसंहितायां विशिष्टपरमधर्मशास्त्रे सप्तदशोऽध्यायः

अथ अष्टादशोऽध्यायः

लक्ष्मी मन्त्रः

श्रीभगवानुवाच

श्रीभूनीळादिमन्त्राश्च क्रमाद्वक्ष्ये चतुर्मुख ।
सांतं [illegible]युक्तं महामाया सबिन्दुकम् ॥१॥
लक्ष्मीमन्त्रमिदं प्रोक्तं भुक्तिमुक्तिप्रदायकम् ।
अष्टैश्वर्यकरं सौम्यं सर्ववांछादि वृद्धिदम् ॥२॥
ऋषिर्ब्रह्मास्य मन्त्रस्य गायत्री छन्द उच्यते ।
विष्णुपत्नी देवता वै हं बीजं शक्तिरिं ततः ॥३॥
ह्रीं कीलकं ऐं कवचं लक्ष्मीमन्त्र इतीरितः ।
रक्तो वर्ण इति ख्यातो लक्ष्मी मन्त्रस्य सर्वदा ॥४॥
षट्पदैस्तु करन्यासं षडंगं कारयेत् बुधः ।
व्याप्यं तत् व्यापकं चैव तन्मन्त्रेणैव कारयेत् ॥५॥
एवं ध्यात्वा जपेन्मन्त्रं लक्षमेकं सदा शुचिः ।
पश्चाल्लक्ष्मीप्रतिष्ठादीन् कुर्यान्नित्यार्चनादिकम् ॥६॥
लक्ष्मीमन्त्रेण वै कुर्यात् लक्ष्मीपूजां द्विजोत्तमः ।
पुरश्चरणहोमादीन् श्रीसूक्तोक्तवदाचरेत् ॥७॥
जपहीनप्रतिष्ठा च चण्डाळार्चादिवत् भवेत् ।
स्थापकस्यतपोयोगात् पूजायाश्च [illegible] ॥८॥

अभिरूप्याच्च बिन्बस्य सदा सन्निहितोस्म्यहम् ।
तस्मात् सर्वात्मना ब्रह्मन् जपध्यानपरोभव ॥९॥
षण्मन्त्राणि ततो वक्ष्ये लक्ष्मीमन्त्रस्य सर्वदा ।
पूर्वोक्तं बीजमन्त्रं स्यात् धर्ममोक्षादिसिद्धिदम् ॥१०॥
श्रीसूक्तं पिण्डमन्त्रंस्यात् पद्ममन्त्रमथोच्यते ।
ओं- आं- ह्रीं-क्रों -यरलवशषसहों-क्षं- हं-सं-
ससहस्थित अमुष्यप्राण इह प्राण आयुष्य जीवो-
इहस्थितः । अमुष्य सर्वेन्द्रियाणि-पृथिव्यप्तेजो-
वाय्वाकाशशब्दस्पर्श रूपरस गन्ध श्रोत्र-त्वक्चक्षुर्जिह्वाघ्राण
वाक्पाणिपाद पायूपस्थ मनोबुद्ध्यहंकार चित्तप्रकृति प्राण
इहैव आगत्य आगत्य सुखंचिरं तिष्टन्तु स्वाहा-॥११॥
ओं एहि ब्रह्मागच्छ एहि ब्रह्मागच्छ अत्र
सृष्ठिस्थितिसंहारकारण सर्वाधारसर्वशक्ति सर्वेश्वरेह च कुरु
कुरु सर्वज्ञानप्रतिष्ठाम् ।
कुरु कुरु ओं नमो नारायणाय ।
श्रीमन्नारायणचरणौ शरणं प्रपद्ये ॥१२॥
श्रीमते नारायणाय नमस्वाहा ।
एतदा दर्पणे व्यक्तं देवसंस्थापनादिकं ।
प्रतिष्ठार्चादिसिद्ध्यर्थं देहबिम्बादि शुद्धये ।
देहे बिम्बे च पूजार्थं मन्त्रयुक्तमिदं सदा ॥१३॥

प्राणप्रतिष्टाहीनं यद्देहबिम्बार्चनादिकम् ।
चण्डाळार्चादिवत् सम्यक् भवेदत्र न संशयः ॥१४॥
प्राणप्रतिष्टाहीनेन बिम्बपूजां करोति यः ।
स याति नरकं घोरं तस्य वंशक्षयो भवेत् ॥१५॥
स जीवन्नेव चण्डाळस्सर्वकर्म बहिष्कृतः ।
तस्मात् सर्वात्मना ब्रह्मन्प्रतिष्ठार्चादिकं चरेत् ॥१६॥
महादेव्यैच विद्महे विष्णुपत्नी च धीमहि ।
तन्नो लक्ष्मीः प्रचोदयात् ॥१७॥
सदा च लक्ष्मीगायत्री भुक्तिमुक्तिप्रदायका ।
गोपालस्य च मन्त्रास्त्रं लक्ष्मीमन्त्रस्य तद्भवेत् ॥१८॥
अत्रिस्त्रिमूर्तिसहितोऽथ शिवोत्तमश्च
वन्हिर्भृगुस्त्वमरनायक संप्रयुक्ताः ।
शुष्यन्त्विमं करिपदं च ततः प्रयुज्य
मायात्मनेति च पदं तमसो मनस्यात् ॥१९॥
[illegible]ापकं तदिदमाहुरशेषवैरि
सेनासमूह परिमोहनकारिमुख्य ॥२०॥

लक्ष्मी यन्त्रम्

लक्ष्मी मन्त्रस्य वक्ष्येऽथ यन्त्रं सर्वोत्तमोत्तमम् ।
भुक्तिमुक्तिप्रदं सौम्यं अष्टैश्वर्यादि सिद्धिदम् ॥२१॥
सौवर्णेराजतेताम्रे शुद्धद्रव्येसुनिर्मले ।

मध्ये वृत्तं समालिख्य तन्मध्ये विलिखेत् बुधः ।।२२।।
लक्ष्मीबीजं महामायां श्रीबीजं वै तदम्शकम् ।
नीळाबीजं तु विलिखेत् प्रणवं मान्मथं तथा ।।२३।।
प्राणबीजेन संवेष्ट्य द्विकोणं तद्बहिर्लिखेत् ।
कोणद्वये माधवं च वेष्टनं स्थूलमायया ।।२४।।
त्रिकोणं तद्बहिर्लिख्य त्रयं श्रीमति संलिखेत् ।
कोणेषु च महामायां संधौक्ष्ममिति संलिखेत् ।।२५।।
नीळाबीजेन संवेष्ट्य अष्टकोणं बहिर्लिखेत् ।
कोणेषु लक्ष्मीबीजं च संधौ वाराहबीजकम् ।।२६।।
पंचबाणैस्च संवेष्ट्य श्रीगायत्र्या च वेष्टयेत् ।
तद्बहिर्मन्त्रविद्ब्रह्मन् पार्थिवं मण्डलं लिखेत् ।।२७।।
[illegible]न्त्रां[illegible]नि ततश्चैव वारुणं चावृतं लिखेत् ।
प्राणप्रतिष्ठां कृत्वाथ एतद्यन्त्रमनुत्तमम् ।।२८।।
पूजयेत् धारयेत् धीमान् क्षत्रियाद्यो द्विजोत्तमः ।
अष्टैश्वर्यादिसिद्ध्यर्थं विष्णुसायुज्य हेतवे ।।२९।।
नित्यकर्मादिसिद्ध्यर्थं आयुश्रीराज्यसिद्धये ।
सर्वशत्रुक्षयार्थं च सर्वरोगहराय च ।।३०।।
तापत्रयविनाशाय स्त्रीवांछा पुत्रसिद्धये ।
एतद्यन्त्रवरं ब्रह्मन् सर्वदा पूजयेत् बुधः ।।३१।।

लक्ष्मीस्थलानि

लक्ष्मीस्थलानि वक्ष्येऽथविष्णोर्वक्षस्थलं सदा ।
विष्णुपार्श्वद्वये चैव निघर्षणपुरे सदा ।।३२।।
श्रीशैल नूतनपुरे श्वेताद्रौ नीलपर्वते ।
श्रीधन्वीनूतनपरे श्रीगिर्यां वारुणाचले ।।३३।।
अन्तर्वेद्यां सिंहगिर्यां लक्ष्म्यावासमिदं स्मृतम् ।
ह्रीश्च ते लक्ष्मीश्च पत्न्याविति श्रुत्यादिसिद्धमिदं सदा ।३४।

भूमन्त्रः

भूमन्त्रं च क्रमाद्वक्ष्ये श्रृणुष्व कमलासन ।
वान्तं वन्हिसमायुक्तं महामायासबिन्दुकम् ।।३५।।
भूमन्त्रमिदवेवस्यात् सर्वसिद्धिप्रदायकम् ।
लक्ष्मीबीजवदेतस्य सर्वेषां फलदायकम् ।।३६।।
ऋषिर्ब्रह्मास्य मन्त्रस्य गायत्री छन्द उच्यते ।
देवता विष्णुपत्नी वै शं बीजं शक्तिरीं ततः ।।३७।।
ह्रीं कीलकं ऐं कवचं लक्ष्मी मन्त्र इति क्रमात् ।
श्यामो वर्ण इति प्रोक्तः करन्यासं षडंगकम् ।।३८।।
ज्ञानाद्यैष्षट्पदैःकुर्यात् श्रीबीजेनैव सादरम् ।
व्याप्यं तत् व्यापकं चैव तन्मन्त्रेणैव कारयेत् ।।३९।।

विष्णुपत्नीं महीं देवीं माधवीं माधवप्रियाम् ।
लक्ष्मीप्रियसखीं देवीं नमाम्यच्युतवल्लभाम् ॥४०॥
एवं ध्यात्वा जपेन्मन्त्रं लक्षमेकं समाहितः ।
पौरश्चरणहोमादि पुंसूक्तोक्तवदाचरेत् ॥४१॥
अङ्गन्यासादिकं सर्वं लक्ष्मीमन्त्रवदाचरेत् ।

नीळामन्त्रः

नीळामन्त्रं ततो वक्ष्ये सर्वेषां भुक्तिमुक्तिदम् ।
द्वादशस्वरमुद्धृत्य बिन्दुनादसमन्वितम् ॥४२॥
नीळामन्त्रमिदं प्रोक्तं विद्याश्रीमुक्तिदायकम् ।
ऋषिर्ब्रह्मास्य मन्त्रस्य गायत्री छन्द उच्यते ॥४३॥
विष्णुपत्नी देवता वै अं भीजं शक्ति रीं ततः ।
श्रीं कीलकं ह्रीं कवचं क्ष्मीं अस्त्रमिति चोच्यते ॥४४॥
श्वेतो वर्ण इति ख्यातः क्रमादेव चतुर्मुख ।
षट्स्वरैस्तु करन्यासं कुर्यान्न्यासं षडंगकम् ॥४५॥
व्याप्यं तत् व्यापकं चैव तन्मन्त्रेणैव कारयेत् ।
श्रीमत् श्रीतुळसीरूपां विष्णुपत्नीं हरिप्रियाम् ॥४६॥
सर्वाभरण संयुक्तां नीळदेवीमहं भजे ।
पौरश्चरणहोमादीन् पुंसूक्तोक्तवदाचरेत् ॥४७॥
तत्तद् बिम्बप्रतिष्ठादिपूजा सिद्ध्यर्थं उत्तमम् ।
श्रीभूनीळादिमन्त्राणां उक्तन्यासादिकं क्रमात् ।

सर्वेषां विष्णुसायुज्यसिद्धये सर्वसिद्धये ॥४८॥

इति श्रीपांचरात्रे पराशरसंहितायां विशिष्टपरमधर्मशास्त्रे अष्टादशोऽध्यायः

अथ एकोनविंशोऽध्यायः

अनन्तमन्त्रः

श्रीभगवानुवाच

अथ वक्ष्ये विधानेन तद्बिम्बार्चादिसिद्धये ।
अनन्तमन्त्रं गरुडं तन्मन्त्रस्थापनाय च ॥१॥
विष्वक्सेनस्य मन्त्रं च क्रमाद्वक्ष्ये चतुर्मुख ।
विष्णुस्वरं बिन्दुयुतं अनन्ताय ततः परम् ॥२॥
नागराजाय संयुक्तं नमोन्तं मनुमुद्धरेत् ।
अनन्तमन्त्र एषस्यात् विद्यामुक्तिप्रदायकः ॥३॥
ऋषि[illegible] जगती छन्द उच्यते ।
अनन्तो देवता प्रोक्ता अं बीजं शक्ति रीं ततः ॥४॥
रं कीलकं कं कवचं लं अस्त्रं मा[illegible]तम् ।
श्वेतो वर्ण इति प्रोक्तो द्विरुच्चार्यमनुत्तमम् ॥५॥
पदषट्कैः करन्यासं षडंगं कारयेत् बुधः ।

व्याप्यं तत् व्यापकं चैव तन्मन्त्रेणैव कारयेत् ॥६॥
चक्रशंखधरं देवं सहस्रवदनं विभुम् ।
सर्पाकारेण संयुक्तं अनन्तं सततं भजे ॥७॥
लक्षमेकं जपेत् भक्तया तत् प्रतिष्ठादि सिद्दये ।
पुरश्चरण होमा ीन् पुंसूक्तोक्तव ाचरेत् ।
नृसिं[illegible]त् कुर्यात् चक्रं नृसिंहवत् ॥८॥

गारु मन्त्रः

क्रमात् गारु मन्त्रं च वक्ष्ये सम्यक् विधानतः ।
प्रणवं पक्षिसंयुक्तं वन्हिजाया समन्वितम् ॥९॥
मन्त्रमेतत् गारु स्यात् मोक्षाभीष्टादिसिद्धये ।
सर्वरोगक्षयकरं भवेत् सर्वविषापहम् ॥१०॥
प षट्कैः करन्यासं ः रुच्चार्य मनूत्तमम् ।
कुर्या व च तन्मन्त्री ानाद्यैस्तु षडंगकम् ॥११॥
व्याप्यं तत् व्यापकं चैव तन्मन्त्रेणैव ारयेत् ।
नमः पन्नगनाशाय वैकु क्षावर्तिने ॥१२॥
श्रुतिसिन्धु सुधोत्पाद मन्दारय गरुत्मते ।
लक्षमेकं जपेत् भक्त्या प्रतिष्ठार्चादिकं चरेत् ॥१३॥
पुरश्चणहोमादि पुंसूक्तोक्तवदाचरेत् ।
सुदर्शननृसिंहस्य मन्त्रवद्यन्तमुद्धरेत् ॥१४॥

विष्वक्सेनमन्त्रः

विष्वक्सेनस्य मन्त्रं वै क्रमाद्वक्ष्ये चतुर्मुख ॥१५॥
विमित्यादौ समुद्धृत्य विष्वक्सेनाय संयुतम् ।
वैष्वक्सेनं मुक्तिदंस्यात् नमोन्तंमनुमुद्धरेत् ॥१६॥
ऋषिर्ब्रह्मास्य मन्त्रस्य गायत्री छन्द उच्यते ।
विष्वक्सेनो देवता वै वीं बीजं शक्ति रीं ततः ॥१७॥
रं कीलकं वं कवचं लमस्त्रं सर्वदा भवेत् ।
श्यामो वर्ण इति प्रोक्तो नित्यार्चा दिषु चोच्यते ॥१८॥
षट्स्वरैस्तु करन्यासं द्विरुच्चार्य मनुं क्रमात् ।
ज्ञानाद्यैस्तु षडंगं तु कुर्यादेव चतुर्मुख ॥१९॥
व्याप्यं तत् व्यापकं चैव तन्मन्त्रेणैव कारयेत् ।
शंखचक्रगदासर्वज्ञानमुद्रादिधारिणम् ॥२०॥
किरीटादिविभूषांगं आसीनं पद्मपीठके ।
प्रसार्य दक्षिणं पादं वामपादं सुकुंचितम् ॥२१॥
विष्वक्सेनमहं देवं मुक्तिज्ञानादिसाधकम् ।
लक्षमेकं जपेत् भक्त्या प्रतिष्ठाद्यादि कर्मसु ॥२२॥
पुरश्चरणहोमादि श्रीसूक्तोक्तवदाचरेत् ।
अनंतं गारुडं चैव विष्वक्सेनं प्रतिष्ठयेत् ॥२३॥
भक्त्या सह विना पापं मोक्षधर्म[illegible]द्धये ।
विष्णुव[illegible] पू[illegible] प्रपन्नश्च क्रमात् शुचिः ॥२४॥

स्वगुरुं तद्गुरुं सर्वान् कूटस्थान् सात्विकान् क्रमात् ।
मन्त्रं जप्यं गुरूणां तु तत्तन्नामनमोन्तकम् ॥२५॥
प्रत्यहं द्वारपालादीन् पूजयेत् सात्विकास्सदा ।
विष्णुसायुज्यसिद्ध्यर्थं स्वयंव्यक्तस्थलादिषु ॥२६॥
दिव्ये सैद्धे मानुषे च श्रीभूनीळादिपं हरिम् ।
चक्रशंखगदापद्मधारिणं गरुडादिकम् ॥२७॥
विष्वक्सेनं तथा नित्यान् द्वारपालादिसंयुतान् ।
मुक्तान् साध्व्भुभक्तांश्च स्वगुरुं तद्गुरुं सदा ॥२८॥
देवालये गृहे चैव विष्णुदीक्षादिसंयुतः ।
त्रिकालं एककालं वा सप्तपंचसमाख्यकम् ॥२९॥
प्रजपेत् विप्रवर्याद्यः प्रपन्नो वेदपारगः ।
दिव्ये सैद्धे स्वयंव्यक्ते ग्रामादौ पट्टणादिके ॥३०॥
देवालये विशेषेण विष्णुं सद्विप्रवैष्णवः ।
विष्णुदीक्षादिसहितः पूजयेत् पुरुषोत्तमम् ॥३१॥
अन्यथा यः करोत्येवं स याति नरकं ध्रुवम् ।
तस्य वंशक्षयं याति तस्यायुश्श्री च नश्यति ॥३२॥
सत्क्षत्रियश्च सद्वैश्यो गृहे कृत्वा सुपूजयेत् ।
देवालये क्षत्रियाद्याः कारयेत् विप्रवैष्णवैः ॥३३॥
शूद्राः [illegible] गृहे विष्णुं समर्चयेत् ।
श्रुतिमन्त्रं विना सम्यक् शूद्राद्यः कारयेत् गृहे ॥३४॥

आलये कारयेत् सम्यक् शूद्राद्यो विप्रवैष्णवः ।
विष्णुसायुज्यसिद्ध्यर्थं सर्वाभीष्ठादिसिद्धये ॥३५॥
इत्येतत् संग्रहेणोक्तं मुक्त्यर्थं वै चतुर्मुख ।

इति श्रीपांचरात्रे पराशरसंहितायां विशिष्ठपरमधर्मशास्त्रे एकोनविंशोऽध्यायः

अथ विंशोऽध्यायः

हनुमन्मन्त्रः

श्रीभगवानुवाच

अथ वक्ष्ये विधानेन हनुमन्मन्त्रमुत्तमम् ।
राममन्त्रादि सिद्ध्यर्थं तद्बीम्बार्चादिसिद्धये ॥१॥
मर्कटेश महोत्साह सर्वशत्रुविनाशन ।
शत्रून् संह रमां रक्ष श्रियं दापय देहि मे ॥२॥
हनुमन्मन्त्र एषस्यात् सर्वाभीष्टप्रदायकः ।
सर्वरक्षाकरो नृणां सर्वशत्रुविनाशकः ॥३॥
मार्कण्डेयोस्य मन्त्रस्य अनुष्टुप् छन्द उच्यते ।
देवता चापि हनुमान् हं बीजं शक्ति रां ततः ॥४॥
कीलकं रं कवचं रां अस्त्रमिति चोच्यते ।
हेमवर्ण इति प्रोक्तश्श्यामो वा रक्त एव च ॥५॥

पादैरर्धैस्सप्रणवैष्षडंगं कारयेत् बुधः ।
व्याप्यं तत् व्यापकं चैव तन्मन्त्रेणैव कारयेत् ॥६॥
चक्रशंखधरं देवं शांतं हैमवतीपतिम् ।
सर्वभूषणभूषांगं मर्कटेशं अहं भजे ॥७॥
लक्षमेकं जपेत् भक्त्या प्रतिष्ठार्चादिसिद्धये ।
पौरश्चरणहोमादीन् पुंसू...चरेत् ॥८॥
सुदर्शनस्य यद्यन्त्रं मर्कटेशस्य चोद्धरेत् ।
हनुमद्बीजसंयुक्तं तदानुष्टुभसंयुतम् ॥९॥
एतद्यन्त्रवरं धीमान् पूजयेत् धारयेत् सदा ।
सर्वशत्रुक्षयार्थं च सर्वाभीष्ठादि सिद्धये ॥१०॥

इति श्रीपांचरात्रे पराशरसंहितायां विशिष्टपरमधर्मशास्त्रे विंशोऽध्यायः

अथ एकविंशोऽध्यायः

श्रीभगवानुवाच

अथ वक्ष्ये विशेषेण प्रतिष्ठालक्षणं श्रृणु ।
...त्वकं संग्रहेणैव ...नां वै...मार्गिणाम् ॥१॥
पंचरात्रोक्तकानां च स्वयं ...लादिषु ।
...सर्वेषां विष्णुसायुज्य हेतवे ॥२॥
वासुदेवादि मूर्तीनां ...सादीनां ततः क्रमात् ।

तथैव केशवादीनां श्रीभूनीळादिकस्य च ॥३॥
सहस्त्रनाममूर्तीनां मदुक्तं लक्षणान्वितम् ।
तत्तद्विग्रहपूजार्थं प्रतिष्ठां श्रुतिचोदिताम् ॥४॥
नित्यार्चनादि शुद्ध्यर्थं श्रुणुष्व कमलासन ।
दिव्ये सैद्धे स्वयंव्यक्ते मानुषे चालयादिषु ॥५॥
गृहे बीजादि बिम्बानां एतदेव विधानतः ।
कृत्वा चापःप्रतिष्ठां वै पश्चात् पूजां समाचरेत् ॥६॥
प्रपन्नरचार्चयेन्नित्यं सम्यक् नित्योत्सवादिभिः ।
शिल्पशास्त्रोक्तविधिना क्रिया वेदोक्तमार्गतः ॥७॥

आलयलक्षणम्

मानांगुलप्रमाणेन ततो मन्त्रांगुलेन च ।
देहलब्दांगुलेनापि कर्षणानन्तरंक्रमात् ॥८॥
शुचिश्रीमद्विमानादीन् तोरणान् गोपुरास्ततः ।
कुर्यात् शिलैरिष्टकैर्वा दारुहर्म्यादिकं तु वा ॥९॥
गृहे मृण्मण्डपं कृत्वा कुर्यात्तन्मण्डपोपरि।
शास्त्रोक्तेन ग्रहंसम्यक् दारुकाष्टतृणादिभिः ॥१०॥

शिला शोधनम्

स्त्रीपुन्नपुंसकशिलां संशोद्यैव विचक्षणः ।
पुंसि वै विष्णुबिम्बांश्च स्त्रीबिम्बान् स्त्रीशिलादिभिः ॥११॥

नित्यान् मुक्तान् तथा कुर्यात् नपुंसकशिलादिभीः ।
शिलामूर्तेश्च हृत्पाद भेदं ज्ञात्वा विचक्षणः ॥१२॥
शुभे मुहूर्ते स्थपतिः कुर्यात्तन्मूलविग्रहम् ।
विष्णुं भूमिं श्रीयं नीळां नित्यमुक्तान् गुरूनपि ॥१३॥

दिव्यमंगळविग्रहविधिः

शिलाबिम्बं दारुबिम्बं स्वगृहे नार्चयेत् बुधः ।
देवालये प्रकुर्वीत स्वयंव्यक्तस्थलादिषु ॥१४॥
मुख्यलोहादिबीम्बादीन् स्वगृहेपूजयेत् बुधः ।
देवालये विशेषेण शुद्धैर्लोहैस्सुवर्णकैः ॥१५॥
नित्योत्सवादिसिद्ध्यर्थं ध्रुवबेरस्य लक्षणैः ।
पंच [illegible] कुर्यादुत्सवविग्रहान् ॥१६॥
नित्यमुक्तान् गुरून् सम्यक् उत्सवार्चादिसिद्धये ।
सौवर्णं राजतं ताम्रं कांस्यं वै शिल्पसात्विकैः ॥१७॥
श्रीभूनीळादिसहितान् कुर्यात् बिम्बान् पृथक् पृथक् ।
[illegible]न् नित्यबिम्बान् क्रमेण वै ॥१८॥

[illegible]लक्षणम्

श्रीवत्सं कौस्तुभं लक्ष्मींवर्जं स्यान्नित्यमूर्तिषु ।
श्रीवत्सा[illegible] सुवर्जं स्यात् मुक्तगुर्वादिमूर्तिषु ॥१९॥
पीठप्रभा[illegible] चक्रं नि[illegible] मूर्तिषु ।

कुर्याद्देवस्य पूजार्थं न कुर्यादिति केचन ॥२०॥
नित्यान् मुक्तान् गुरून् सम्यक् विष्णुना सह पूजयेत् ।
विष्णुसायुज्यसिद्ध्यर्थं प्रपन्नश्च सदा द्विजः ॥२१॥

अथ प्रतिष्ठा

यदाकारेण देवेशं पश्यान्ते च तदाकृतिम् ।
कुर्यात्तद्विष्णुभक्तान् वै मुक्तान् गुरुपरम्परान् ॥२२॥
पशून् मृगान् राक्षसादीन् विष्णुभक्तांस्तदार्चयेत् ।
उक्तवत्तान् प्रतिष्ठाप्य सर्वपक्षादिकं तथा ॥२३॥
देशकालादिनियमं अरिमित्रादिशोधनम् ।
विष्णुबिम्बप्रतिष्ठायां नित्यादिस्थापनादिषु ॥२४॥
विष्णुमन्त्रादि दीक्षायां सर्वदा न विचारयेत् ।
प्रत्यहं तु सुलग्ने वै मूहूर्ते शोभनाह्वये ॥२५॥
विमानविग्रहादींश्च कारयेन्मुक्तिसाधकः ।
विष्णुसायुज्यसिद्ध्यर्थं धर्मकामादिसिद्धये ॥२६॥
सर्वरोगविनाशार्थं सर्वशत्रुक्षयाय च ।
आयुः श्रीराज्यलाभार्थं पुत्रपौत्रादिवृद्धये ॥२७॥
पुरेग्रामे पट्टणादौ स्वयंव्यक्तस्थलादिषु ।
बध्वा विष्ण्वालयं सम्यक् शिलाभिश्चेष्टकादिभिः ॥२८॥
दारुकाष्ठतृणैर्वापि भक्त्या शक्त्यनुसारतः ।
श्रीमद्विष्णुं प्रतिष्ठाप्य नित्यमुक्तादिभिस्सह ॥२९॥

पंचरात्रविधानेन वैखानसविधानतः ।
शुद्धसात्विकतन्त्रैश्च मन्त्रैर्द्रव्यादिभिस्सह ॥३०॥
प्रत्यहं पंचसंस्कारयुक्तैर्विप्रवरैस्सह ।
कारयेत् विष्णुपूजां वै सर्वबन्धविमुक्तये ॥३१॥
क्षत्रविट्शूद्र जात्याद्याः प्रतिविप्रादिभिक्षुकाः ।
विप्राद्यास्सततं भक्ताः पूजयेयुर्गृहे हरिम् ॥३२॥

अदेवालयग्रामवासनिषेधः

पट्टणादिषु ग्रामेषु स्वयंव्यक्तस्थलादिषु ।
विष्ण्वालयं विष्णुबिम्बं यत्र नास्ति चतुर्मुख ॥३३॥
प्रपन्नः परमैकान्ती काम्यार्थी मुक्तिसाधकः ।
न वसेत् याममात्रं च न तत्र दिवसं वसेत् ॥३४॥
चण्डाळवाटिका तुल्यं तत् क्षेत्रं सर्वदा त्यजेत् ।
ग्रामादिकं श्मशानं स्यात् विष्णुस्थानविहीनकम् ॥३५॥
श्रीविष्णुस्थानरहितग्रामादिषु च यो वसेत् ।
स जीवन्नेव चण्डाळस्सर्वकर्मबहिष्कृतः ॥३६॥
मासमात्रं प्रमादाद्वा स याति नरकं ध्रुवम् ।

अविष्ण्वालयग्रामवासप्रायश्चित्तम्

वसेत् तत्तद्दिनं यो वै तावच्चान्द्रायणं चरेत् ॥३७॥
गायत्रीं पंचसाहस्रं मूलमन्त्रं च वा द्विजः ।

भवे[illegible]विष्णुनाम दशसाहस्रमुत्तमम् ॥३८॥
तस्मात् सर्वप्रयत्नेन विष्णुस्थापनमाचरेत् ।
तथा शक्त्यनुसारेण स्वयंव्यक्तादिषुक्रमात् ॥३९॥
तन्नित्यमुक्तस्थानानि श्रियं विष्णुं च यो नरः ।
शून्यस्थानं स्थापयेद्वै स वै विष्णुसमो भवेत् ॥४०॥

जीर्णोद्धारफलम्

पूर्वात् कोटिफलं स्याद्वै जीर्णोद्धारस्य सर्वदा ।
जीर्णोद्धारं नूतनं वा विष्णुस्थापनमाचरेत् ॥४१॥
कारयेत् विष्णुबिम्बादीन् मुहूर्ते शोभनाह्वये ।
ऊर्ध्वदृष्टिं अधोदृष्ठिं तिर्यक् दृष्ठिं च वर्जयेत् ॥४२॥
अन्यूनानतिरिक्तांगं शुद्धद्रव्येण कल्पयेत् ।
सर्वावयवसंयुक्तं विग्रहं सुमनोहरम् ॥४३॥
कृत्वा तत् शिल्पशास्त्रेण मन्त्रेणैवाक्षिमोचनम् ।
तस्य दत्वा च वस्त्रादीन् क्रयद्रव्यादिकं तदा ॥४४॥
ताम्बूलगन्धपुष्पादीन् दत्वा भोजनमुत्तमम् ।
शिल्पिहस्ताच्च संगृह्य विष्णुबिम्बादिकं तदा ॥४५॥

पंचामृतस्नानम्

प्रक्षाळ्य पंचगव्यैश्च ततः पंचामृतैः क्रमात् ।
सुगन्ध पुष्पतोयैश्च पुंसूक्तेनाभिषेचयेत् ॥४६॥

अभ्यंगादीन् ततःकृत्वा मुद्गचूर्णाम्लकादिभिः ।
हरिद्रामलकं स्नानं कृत्वा मूलेन मन्त्रवित् ॥४७॥
शुद्धवस्त्रेण संशोध्य शुद्धस्थानेषु निक्षिपेत् ।
ततश्च शोभने लग्ने मुहूर्ते शोभनाह्वये ॥४८॥
पूर्वोक्ताचार ऋत्विग्भिः अर्चकाद्यैर्यथोक्तवत् ।

मण्डपलक्षणम्

कुर्वीत मण्डपादिंश्च कर्ता स्थित्वा सदा शुचिः ॥४९॥
आचार्यादीन् वरेत् तत्र प्रतिष्ठाविधिमाचरेत् ।
षोडशस्तम्बसंयुक्तं मण्डपं कारयेत् ततः ॥५०॥
उत्तरे चालयस्याग्रे समक्षेत्रे सुनिर्मले ।
दैर्घ्यायामादिकं ज्ञात्वा मण्डपातीन् प्रकल्पयेत् ॥५१॥
दीक्षामण्डपकन् कुर्यात् पूर्वोक्त विधिना ततः ।
मध्ये वेदीं प्रकल्प्याथ पूर्वादीषु यथाक्रमम् ॥५२॥
चतुरश्रं वर्तुळं च दनुःकुण्डं त्रिकोणकम् ।

कुण्डलक्षणम्

ईशान्ये योनिकुण्डं च विहारार्थं सुनिर्मलम् ॥५३॥
वास्तु कुण्डं तु तन्मध्ये हस्तमात्रप्रमाणतः ।
त्रिमेखला समायुक्तं विस्तारायामसंयुतम् ॥५४॥
योन्याकारं कल्पयेत् वै कुण्डेषु समस्तवत् ।

मेखलोपरि तत्कुर्यात् योनिं योनौ न कारयेत् ॥५५॥

सद्यः प्रतिष्ठा

दिनत्रयं तु संकल्प्य तत्रादौ चांकुरार्पणम् ।
सद्य एव प्रकुर्वीत दिनेनैकेन वा बुधः ॥५६॥

ऋत्विक् संख्या

आचार्यं वरयेत् कर्ता ब्रह्माणं च सदस्यकम् ।
उपद्रष्ठा ततः सम्यक् षोडशाष्टचतुःक्रमात् ॥५७॥
ऋत्विजः कल्पयेत्पश्ची पूर्वोक्त गुरु ऋत्विजः ।
पूर्वोक्त ऋत्विजाभावे त्वतद्वराविधानतः ॥५८॥
एककुण्डविधानेन तथा वैवाहिकान्तकम् ।
गुरुरेव प्रकुर्वीत प्रतिष्ठाविधिमुत्तमम् ॥५९॥
वेद पारायणैस्तोत्रैः पुराणैश्च उत्सवैः ।
भाषागानैर्महावाद्यैर्नृत्यगीतादिभिस्सह ॥६०॥
गुरोश्च ऋत्विजांचैव कृत्वा कंकणबन्धनम् ।
सुवेष्ट्य नूतनं वस्त्रं बिम्बानां दम्भसंयुतम् ॥६१॥
जलादिवासं कृत्वाथ दर्पणाद्यादिवासनम् ।
स्थूले कुर्यात् विधानेन मूलासं आसनोपरि ॥६२॥

कुम्भस्थापनलक्षणम्

ततो मण्डपमाविश्य गुरुस्तन्मन्त्रवित्तमः।
धान्यबेदीं प्रकल्प्याथ बिम्बस्यास्य प्रमाणतः ॥६३॥
वेदिकोपर्यधश्चैव कुम्भस्थापनमाचरेत् ।
स च कुम्भान् समायुक्तान् अष्ठोत्तरशतं क्रमात् ॥६४॥
संगृह्य कलशान् सौम्यान् तदर्धं पादमेव च ।
पंचकुम्भसमायुक्तं वस्त्रप्रतिमसंयुतम् ॥६५॥
नवरत्नसमायुक्तं कस्तूरीकुंकुमादिभिः ।
तन्तुना वेष्ठितं सम्यक् पंचत्वक् पंचपल्लवैः ॥६६॥
कूश्मोत्कैः कूर्चपुष्पैः नाळिकेरफलादिभिः ।
अक्षताद्यैरलंकृत्य सुगन्धद्रव्यसंयुतम् ॥६७॥
संकल्प्य च विधानेन वेदमन्त्रादिकं जपेत् ।
हरिः पतिरिति मनुं मम नामेति [illegible]कम् ॥६८॥
अप्रतिष्ठामिति मनुं जप्त्वा त[illegible]शिकोत्तमः ।
सर्वारिष्टनिवृत्यर्थं र[illegible]घ्नान् वा ततो जपेत् ॥६९॥
विष्णोर्नुकेति मन्त्रं तु [illegible]णुष्वेत्यादिसंयुतम् ।

जप्तव्यः

रक्षोहणेति मन्त्रं च जपेत् ध्यायेत् हरिं ततः ॥७०॥
मुक्ताहारैरंगुळीयैः कटकैः कुण्डला[illegible]भिः ।

श्वेतपट्टादि वस्त्रैश्च सर्वालंकारसंयुतः ॥७१॥
यथाशक्त्यनुसारेण आचार्याद्यः क्रमात्ततः ।
तथा च देहशुद्ध्यर्थं शोषणादिक्रमात् ततः ॥७२॥
कृत्वा पूर्वोक्त मार्गेण मूलमन्त्रादिमात्रकम् ।
निग्राभ्यास्थ मनुं तद्वत् अग्ने तेजस्विनीरितः ॥७३॥

आवाहनक्रमः

जप्त्वा च पौरुषं सूक्तं श्रीभूनीळादिसूक्तकान् ।
कुम्भेषु च परं ब्रह्म नारायणमनामयम् ॥७४॥
श्रीभूनीळादिनासम्यक् आवाह्यं बिम्बदैवतम् ।
नित्यान्निन्द्रादिकान् मुक्तान् विन्यसेत् कर्मशेषु च ॥७५॥
आवाहनादि मुद्राँश्च धृत्वा प्रणवसंयुतम् ।
प्राणाप्रतिष्ठामन्त्रेण कुम्भे चावाह्य देशिकः ॥७६॥
ततो बिम्बं समानीय त्यक्त्वा तद्वस्त्रं आदरात् ।

पंचास्तरणलक्षणम्

धान्यवेद्यां विधानेन पंचवस्त्राणि चास्तरेत् ॥७७॥
रोमजं चर्मजं चापि मुण्डजं चम्डजं तथा ।
वामजं चेति विख्याताः पंचशय्या प्रकीर्तिताः ॥७८॥
रोमजं चाविकादीनां कृतं यत् रोमजं स्मृतम् ।
व्याग्रादि चर्मणा क्लृप्तं चर्मजं शयनं स्मृतम् ॥७९॥

कार्पासेन कृतं यत्तान् मुण्डजं परिकीर्तितम् ।
पक्षिपिंछा कृतं यत्तत् अंडजं च विधीयते ॥८०॥
कौशेयं क्षौमसंयुक्तं वामजं चेति कीर्तितम् ।
पंचवस्त्राणि चच्चाद्य वेदिकोपर्यदःक्रमात् ॥८१॥
नित्यान् मुक्तान् भिन्नवेषां स्थापयेत्तत् क्रमेण तु ।

बिम्बानां शयनविधिः

नित्यबिम्बप्रतिष्ठायां कुण्डमेकं प्रकल्पयेत् ॥८२॥
स्वाग्न्योपासनकुण्डे वै कुर्याद्देवं सुमन्त्रवित् ।
मुक्तभक्त प्रतिष्ठादीन् स्वगुर्वादिक्रमात्ततः ॥८३॥

होमविधिः

शयने शाययेदेवं यतो द्वारं ततश्शिरः ।
यथा देहे तथा बिम्बे न्यासं कुर्यात् गुरूत्तमः ॥८४॥
अर्घ्यादिगन्धपुष्पाद्यैः दीपान्तं च समर्पयेत् ।
कुर्यात् होमं ततस्सम्यक् इध्मा धानादिपूर्वकम् ॥८५॥

अग्नि भेदः

विष्णुश्रीभूप्रतिष्ठायां वैष्णवाग्निं प्रकल्पयेत् ।
तद्वन्नित्यप्रतिष्ठायां स्मार्ताग्निश्श्रेष्ठ उच्यते ॥८६॥
स्थापने दीक्षिते बिम्बे श्रोताग्निश्च प्रकीर्तितः ।
तथा मुक्तयतीनां च मृगपश्वादीनां ततः ॥८७॥

स्मार्ताग्निं कल्पयेत् मन्त्री स्वसूत्रेणोक्तमार्गतः ।

अग्निरंगानि

होमद्रव्याणि वक्ष्येथ जिह्वाभेदादिकं क्रमात् ।।८८।।
अग्निशिरः प्रोक्तं जंघे वायव्य ऐन्द्रे नैऋते ।
हस्तौ चैशान्यमार्गेयं उदरं कुण्डमुच्यते ।।८९।।
यत्र काष्ठंतु तत् श्रोत्रं यत्र धूमस्तु नासिका ।
यत्राल्पज्वलनं नेत्रं यत्र भस्म च तत् शिरः ।।९०।।

अग्नेर्जिह्वानामानि संख्या च

यत्र प्रज्वलिता वन्हे ज्वाला सद्वक्त्रं उच्यते ।
कर्णे होमं व्याधिकरं नासायाम् दुःखमेव च ।।९१।।
नेत्रे ग्रामविनाशं स्यात् मूर्ध्नि राष्ट्रविनाशनम् ।
करालि लोहिता काळी च मनोजवा तु धूम्रका ।।९२।।
स्फुलिंगिनी विश्वरूपी जिह्वाभेदस्तु तस्य वै ।
काळी तु पूर्वदिग्भागे करालीवन्हिकोणके ।।९३।।
वायव्यां लोहिता चैव मध्यमे तु मनोजवा ।
दक्षिणे धूम्रका चैव नैऋते तु स्फुलिंगिनी ।।९४।।

प्रत्येकं जिह्वायां होमे फलभेदः

काळी जीह्वा तु वश्येस्यात् विद्वेषेतु काराळिका ।
स्तम्भने लोहिता चैव सौम्येषु च मनोजवा ।।९५।।

उच्चाटे धूम्रका चैव क्रूरेस्यात् विस्फुलंगिनी ।
ऐश्वर्यादौ विश्वरूपी जिह्वाभेदाः प्रकीर्तिताः ॥९६॥

होममुद्रालक्षणम्

होममुद्रास्त्रयः प्रोक्ताः मृगी हंसी च सूकरी ।
अंगुष्टतर्जनीमध्य संयोगाच्च मृगीमता ॥९७॥
शांतिके पौष्टिके चैव संन्यासे हंसिनी स्मृता ।
सूकरी चोग्रकार्यादौ सर्वैरंगुळीभिस्स्मृता ॥९८॥
शब्दं गन्धं च वर्णं च शिखाधूमं तथेरितम् ।
शब्दं च नवधा प्रोक्तं वर्णमेकादश स्मृतम् ॥९९॥
गन्धस्सप्तदश प्रोक्तः स्वीरितं द्वादशस्मृतम् ।
मोक्षः प्रदक्षीणावर्तो धूमवान् सर्वसिद्धिदः॥१००॥
निजस्फुलिंगवत् धूम पावको नैव सिद्धिदः ।
स्वकृत इति जुहोति श्रुत्यर्थं सुविचार्य च ॥१०१॥
श्रुंचत्वारि श्रुं गात्रयो अस्य पादा
द्वे शीर्षे सप्तहस्ता सो अस्य ।
त्रिधा बद्धो वृषभोदो रवीति महोदेवो मर्त्यगं आविवेश ।१०२।
सप्तहस्तश्चतुश्शृंगस्सप्तजिह्वाद्विशीर्षकः ।
त्रिपात् प्रसन्नवदनस्सुखासीनश्शुचिस्मृतः ॥१०३॥

स्वाहां तु दक्षिणे पार्श्वे देवीं वामे स्वधां ततः ।
बिभ्रद्दक्षिणहस्ते तु शक्तिमूलांच स्त्रक्स्त्रुवौ ॥१०४॥
तोमरंव्यजनं सर्पिः पात्रं वामादिषु क्रमात् ।

अग्नेः दक्षीणवामयोः हस्तविभागः

दक्षिणेतु चतुर्हस्तं वामे हस्त्रत्रयं भवेत् ॥१०५॥
पद्मनाभं सुवर्णं च षडक्षं षड्जटान्वितम् ।
पीतवाससमुत्तर्यं मौंजी मेखलयान्वितम् ॥१०६॥
शेषारूढं जटाबद्धं गौरवर्णं महौजसम् ।
धूमध्वजं लोहिताक्षं सप्तार्चिस्सर्वकामदम् ॥१०७॥
आत्माविमुखमासीनं एवं ध्यायेत् हुताशनम् ।
अग्निमण्डलमध्यस्थं चक्रशंखधरं विभुम् ॥१०८॥
श्रियासत् सर्वभूषांगं ध्यायेत् यज्ञपतिं हरिम् ।
एवं ध्यात्वा गुरुस्सम्यक् ज्ञात्वैवं गुरुणा तथा ॥१०९॥
कुर्यात् प्रतिष्ठा होमादीन् दीक्षार्चादिषु सादरम् ।
तत् होमं वै ततः कुर्यात् पायसं गोघृताक्तकम् ॥११०॥

अग्नौ तिलादिभिर्होमः

तदा पुरुषसूक्तेन श्रीभूनीळादि सूक्तकैः ।
विष्णुश्रीभूनित्यमुक्तगुरुं तद्बिम्बसंख्यया ॥१११॥
तिलव्रीहीन् घृताक्षांश्च जुहुयान्मन्त्रवित्तमः ।

केशवादिचतुर्विंश मूर्तिमन्त्रैर्मयोक्तकैः ॥११२॥
प्रत्येकं तु सहस्रं वै गुरुस्तत्तत् द्विजैस्सह ।
घृतेन जुहुयान्मन्त्री हंसादिदशमन्त्रकैः ॥११३॥
दशावतारमुख्यैश्च प्रत्येकस्तु सहस्रकम् ।
तत्तद्बिम्बादिमन्त्रैश्च प्रत्येकस्तु सहस्रकम् ॥११४॥
पलाशोदुम्बराश्वत्थैर्जुहुयात् गोघृताक्तकैः ।
विरजामूलमन्त्रैश्च जातिकमन्त्रकैः ॥११५॥
घृताक्ततिलमन्त्रैश्च एकैकं चांगमन्त्रकैस्तथा ।
अष्टोत्तरसहस्रं वा शतं अष्टोत्तरं तु वा ॥११६॥
यथाशक्त्यनुसारेण प्रायश्चित्तादिकं ततः ।
हुत्वाथ देदपाठाद्यैर्निश्शेषं समापयेत् ॥११७॥
ततः प्रभातसमये ऋत्विग्भिर्देशिकस्सह ।
नित्यकर्मादिकं कृत्वा प्रविशेन्मण्डपं ततः ॥११८॥

आचार्यास्य कुम्भेन सह गर्भगृहप्रवेशः

प्रक्षाळ्य पादावाचम्य स्थित्वा तच्चोषणादिकम् ।
कृत्वा शास्त्रोक्त विधिना कृत्वा पूर्णाहुतिं क्रमात् ॥११९॥
कुम्भमुद्धृत्य कलशान् मण्डलादिस्थदेवताः ।
प्रदक्षिणक्रमेणैव प्रविशेत् गर्भमन्दिरम् ॥१२०॥
तत्तत् न्यासादिकै सर्वैः पीठे देवं न्यसेत् क्रमात् ।
पुण्याहं वाचयित्वाथ बिम्बकुण्डादिके द्विजः ॥१२१॥

आनीय विष्णुबिम्बानि कृत्वा चापि प्रदक्षिणम् ।
गर्भगेहे निवेश्याथ अष्ठबन्धादिकं चरेत् ।।१२२।।

अभिषेकः

पंचामृतैः पंचगव्यैः पुंश्रीभूसूक्तकैस्सह ।
अभ्यंगैः पावमानैश्च बिम्बान्येवाभिषिंचयेत् ।।१२३।।
प्रधानकुण्डमादाय अन्यत्तत् कलशादिभिः ।
अबिषिंचेच्च मूलेन शुद्धवस्त्रेण शोधयेत् ।।१२४।।
अलंकृत्य च वस्त्राद्यैः किरीटादि विभूषणैः ।

प्रधानकुम्भप्रोक्षणम्

चन्दनागरु-ऽपूर कस्तूरीमिश्रिताम्बुना ।।१२५।।
पूतिद्वयेन पुष्पाद्यैः मालि[illegible]गन्धिभिः ।
ऊर्ध्वपुण्ड्रा[illegible]श्च अलंकृत्य हरिं स्मरेत् ।।१२६।।
यथा देहे तथा बिम्बे न्यासकर्मसमाचरेत् ।
कृत्वादौ शोषणादींश्च पं[illegible]कैः ।।१२७।।
मोक्षवत् वर्तते मुख्यं तद्देहं चिन्तयेत् हरेः ।
तदा कुर्यात् गुरुस्सम्यक् बिम्बस्य च विशेषतः ।।१२८।।
नयनोन्मीलनं तत्तत् मन्त्रेण छिन्नसूचिना ।
भानुवत् शशिवत् वाम सम्पूर्णकतथायुतः ।।१२९।।
बरिरन्तर्गात्रेके वै मूल[illegible]न्त्रेण छिन्नसूचिना ।

भानुवत् शशिवत् वाम सम्पूर्णक तयायुतः ॥१३०॥
बहिरन्तर्गात्रेके वै मूलमन्त्रेण साधयेत् ।
मातृकावर्णदेवादीन् तत्तत् स्थानेषु विन्यसेत् ॥१३१॥
षट्चक्रदेवान् स्मृत्वा च पंचोपनिषदाख्यकम् ।
न्यासं कृत्वा विधानेन पुंसूक्तन्यासमुच्चरेत् ॥१३२॥
तारन्यासं ततःकृत्वा मूलमन्त्रस्य तत्क्रमात् ।
तत्वन्यासं ततः कृत्वा स्मरन् तत्वादिदेवताः ॥१३३॥
ततस्तद्बिम्बमन्त्रस्य कुर्यान्न्यासादिकं क्रमात् ।
दहरं विपाप्ममिति श्रुत्वा बोधितमुत्तमम् ॥१३४॥
हृत्पुण्डरीके विमले वासुदेवं जगत्पतिम् ।
तद्बिम्बरूपिणं शांतं परात्परं अजं विभुम् ॥१३५॥
श्रीभूनीळादिसहितं सर्वालंकारसंयुतम् ।
ज्ञानादिगुणसंयुक्तं सदानन्दस्वरूपिणम् ॥१३६॥
नित्यमुक्तादिभिःसम्यक् सेवितं देवं अच्युतम् ।
प्रणवेन सदा स्मृत्वा आचार्यो मन्त्रवित् शुचिः ॥१३७॥
एकान्ते निर्जने देशे तद्बिम्बस्थापनस्थले ।
नत्वा स्मृत्वा स्वगुर्वादीन् सात्विकांश्च ऋषींस्तथा ॥१३८॥
सम्यक् समाज्ञया तेषां जीवन्यासादिकं चरेत् ।
मुहूर्ते समनुप्राप्ते वेदघोषादिकं ततः ॥१३९॥
महावाद्यादिकं नृत्यं कुर्यादिति नियाम्य च ।

मन्त्रतन्त्रादिकुशल आचार्यो थ चतुर्मुख ॥१४०॥
सान्निध्ययाचनं चैव करपुष्पोपदर्शनम् ।
बिम्बोपवेशनं चैव योगविग्रह चिन्तनम् ॥१४१॥
कृत्वा मुद्रां प्रदर्श्याथ सम्यगावाहनादिकम् ।
अग्निप्राकारसंयुक्तं तत्तत् स्थानेषु देशिकः ॥१४२॥
कुम्भस्थदेवसहितं वासुदेवं परात्परम् ।
ध्यात्वा चावाह्य सद्भक्त्यान्यासध्यानादिपूर्वकम् ॥१४३॥

प्राणप्रतिष्ठामन्त्रः

प्राणप्रतिष्ठामन्त्रेण कुर्यात् प्राणप्रतिष्ठितम् ।
ज्ञानप्रतिष्ठासहितं स्मृत्वा चैकाग्रमानसः ॥१४४॥
सम्यग् देवं समावा[illegible] देव्याद्यावहनं क्रमात् ।
लक्ष्मीमन्त्र प्रकारेण [illegible] चतुर्मुख ॥१४५॥
प्राणप्रतिष्टामन्त्रं च न्यासध्यानादिकं श्रुणु ।
न्यासध्यानादिकं सम्यक् तन्मन्त्रस्योच्यते मया ॥१४६॥
प्राणप्रतिष्ठामन्त्रस्य ब्रह्मविष्णुमहेश्वराः ।
ऋषयश्चेति विख्याताः ऋग्यजुस्सामाथर्वणाम् ॥१४७॥
छन्दांसिदेवता श्रीस्च प्राणशक्तिःक्रमात्ततः ।
स्वाहाशक्तिस्तारबीजं ह्रीं कीलकमतःपरम् ॥१४८॥
श्रीं कवचं [illegible]मित्यस्त्रं रक्तो वर्णः प्रकीर्तितः ।
तारतारासुतारैश्च षटस्वरैश्चसुमन्त्रवित् ॥१४९॥

पंचवर्गांककारादीन् कृत्वा मान्तमनुक्रमात् ।
यकारादिक्षकारान्तं वर्णानेतान् दशक्रमात् ॥१५०॥

अंगन्यासः

कृत्वा करषडंगं तु ज्ञानादि गुणसंयुतम् ।
हृदयादि षडंगं वै कुर्यात् बीजादिसंयुतम् ॥१५१॥
व्याप्यं तत् व्यापकं चैव तन्मन्त्रेणैव कारयेत् ।
पद्मप्रिये पद्मिनि पद्महस्ते पद्मालये पद्मदळायताक्षी ॥१५२॥
विश्वप्रिये विष्णुमनोनुकूलेत्वत्पादपद्मं मयि संनिधत्स्व ।
एवं न्यासविधिं कृत्वा ध्यात्वा तन्मन्त्रमुच्चरेत् ॥१५३॥

नारसिंहमन्त्रः

श्रीनारसिंहं ध्यायन् वै अन्तरस्थं त्रिवारकम् ।
देवदेवं प्रतिष्ठाप्य पंचरात्रविधानतः ॥१५४॥
वैखानसोक्त मार्गोण सात्विकैः पांचरात्रकैः ।
सात्विकैर्विष्णुसूक्तैर्वा पांचरात्रविधानतः ॥१५५॥
सर्वोपचारैस्सम्पूज्य षडासनविधानतः ।
महाहरिर्निवेद्याथ देवदेवं समर्चयेत् ॥१५६॥
आहारैष्षड्रसोपेतैःपूपाद्यैः फलादिभिः ।
चित्रान्नैः पायसैस्सम्यक् दुग्धदध्यादिभेदकैः ॥१५७॥
फूजयेत् बिम्ब[illegible]ण स्वयंव्यक्तवदुत्तमम् ।

ततो दर्शननैवेद्यं तत्तदादर्शसंयुतम् ।।१५८।।
तद्वद्दर्शनदेवं च कन्यकाफलधान्यकान् ।
दर्शयेत् देवदेवस्य नीत्वा यवनिकां शुचिः ।।१५९।।

सर्ववेदादिश्रवणम्

आचार्यस्येव तत्सर्वं दद्यात् सम्यक् स्वभक्तादिभिः ।
यजुर्वेदं च ऋग्वेदं सामवेदमथर्वणम् ।।१६०।।
तथोपनिषदस्सम्यक् वेदान्तं क्रमशो बुधः ।
मीमांसां ज्योतिषं वैद्यं धर्मशास्त्रं सुशिल्पकम् ।।१६१।।
पुराणं च स्मृतिं सम्यक् इतिहासं सुसात्विकम् ।
भाषागानं विष्णुभक्तैरुक्तं वेदान्तनिर्णयम् ।।१६२।।
महावाद्यं ततो गीतं नृत्यादीन् श्रावयेत् क्रमात् ।
तदा तद्देवदेवस्य नित्यार्चायां च पूजकः ।।१६३।।
अलंकारासने सम्यक् एतद्वेदादिकं क्रमात् ।
भावयेत् शतधा नित्यं गांधाराद्यष्टमंगळान् ।।१६४।।
दर्शयेच्च हरेः प्रीत्यै पूजासिद्ध्यर्थं आदरात् ।
विष्णुसायुज्यसिद्ध्यर्थं नित्यकर्मादिसिद्धये ।।१६५।।
ततो लक्ष्म्यादिकान् पूज्यान् नित्यान् मुक्तान् गुरून्क्रमात् ।
संपूज्य द्वारपालादीन् तत्तन्मन्त्रेण देशिकः ।।१६६।।
अष्ठदिक्षु बलिं दद्यात् बलिबेरन्वितं ततः ।

प्रदक्षिणम्

प्रदक्षिणं ततः कुर्यात् तत्तन्मन्त्रादिगीतकैः ॥१६७॥
बलिप्रदक्षिणं चैकं चत्रवाद्यादिभिस्त्रयः ।
ततो इन्द्रादि गीताद्यैरष्टदिक्षु विशेषतः ॥१६८॥

वाद्यानि

कुर्यात् प्रदक्षिणं सम्यक् बीणामंगळवादकैः ।
बलिबेरं स्थापयित्वा अर्चयेदुपचारकैः ॥१६९॥

बलिदानम्

ततो देवालयेस्थाप्य बलिबेरं सुखासने ।
बलिं दद्यात् अष्टदिक्षु नित्य होमाद्यनन्तरम् ॥१७०॥
एतत् बल्यादिकं कुर्यात् नित्यार्चासिद्धये सदा ।
त्रिकालं च विशेषेण तथा कालद्वयं तु वा ॥१७१॥
नित्यार्चायां बलिहोमा यत्र नास्ति चतुर्मुख ।
दिव्ये सैद्धे स्वयंव्यक्ते मानुषे च दिने दिने ॥१७२॥
देवग्रामादिकैस्तत्र राजा सर्वजनैस्सह ।
रोगतस्करदुर्भिक्ष भयाद्यैश्च विनश्यति ॥१७३॥
तस्मात् सर्वप्रयत्नेन यथाशक्त्यनुसारतः ।
क्षुद्रग्रामेषु च तथा सदा विष्णुं प्रपूजयेत् ॥१७४॥
प्रत्यक्षं बलिहोमान्तं बलौ राजा च कारयेत् ।

सर्वपापाविनाशर्थं ऐहिकामुष्मसिद्धये ॥१७५॥
नित्यपक्षोत्सवाद्यर्थं ततः कुर्यात् तथा गुरुः ।
प्रतिष्ठादिवसे चैव परेद्युर्वा गुरुत्तमः ॥१७६॥
पाणिग्रहणहोमादौ कुर्यादेव जगत्पतेः ।
ततो नित्यार्चनं कुर्यात् विष्णुप्रीत्यै विशेषतः ॥१७७॥
अन्यधा यः करोत्येव स याति नरकं ध्रुवम् ।
तस्य वंशःक्षयं याति तस्यायुः श्रीश्च नश्यति ॥१७८॥
वत्सरे मासि मासे वा द्वजारोहणमाचरेत् ।
राजराष्ट्रादि वृद्ध्यर्थं स्वयं व्यक्तादिषुक्रमात् ॥१७९॥
सर्वसस्याभिवृद्ध्यर्थं पुत्रापौत्रदिवृद्धये ।
नित्यनैमित्तिकं काम्यं कुर्यादर्चाविधानतः ॥१८०॥
काम्यार्चनायां देवस्य पंचामृतमथा चरेत् ।
शंखं सम्पूज्य देवस्य वामभागे विनिक्षिपेत् ॥१८१॥
सुखेन विष्णुपूजायां दद्यादर्ध्यादिकं तु सः ।
स याति नरकं घोरं स्त्रीपुत्राद्याश्च नश्यति ॥१८२॥
तस्य रोगादिकं सम्यक् आयात्येव न शंशयः ।
प्रतिष्ठादि विहारान्तं कुर्यादवभृतान्तकम् ॥१८३॥
विष्णुस्थापनकर्तावै आचार्यं पूजयेत् ततः ।
पट्टवस्त्रादिना सम्यक् भूषणैरुत्तमैस्ततः ॥१८४॥
ग्रामंवा भूमिदानं वा सुवर्णं च सहस्त्रकम् ।

शतं तदर्धं दश वा यथा वित्तानुसारतः ॥१८५॥
दत्वासम्पूज्य भक्त्या च तदर्धं ब्राह्मणाय च ।
तदर्धं ऋत्विजां चैव दद्यादेव चतुर्मुख ॥१८६॥

ब्राह्मणादीनां भोजनम्

सर्वेभ्यो ब्राह्मणेभ्योश्च भूरिदानं क्रमेण च ।
दत्वा गन्धाक्षतादींश्च अन्येषां अपि दापयेत् ॥१८७॥
सर्वेषां याचकानां च दद्यादेव विधानतः ।
वित्तशाठ्यं न कुर्वीत संपूर्णफलसिद्धये ॥१८८॥
अयुतं च सहस्रं च शतं वा शक्तितः क्रमात् ।
तदा प्रपन्नविप्राणां भोजनं सुविशेषतः ॥१८९॥
तदा तद्विष्णुभक्तानां ब्राह्मणेभ्यश्च दापयेत् ।
अन्नदानं तु सर्वेषां क्रमात् दद्यात् चतुर्मुख ॥१९०॥
स्रक् चन्दनं च ताम्बूलं दद्यात् तत्भोजनोत्तरे ।
विष्णुस्थापनकर्ता वै श्रीविष्णुसदृशस्सदा ॥१९१॥

भक्तप्रतिष्ठापन फलम्

जीवन्नेव विशेषेण सत्यं सत्यं चतुर्मुख ।
देहान्ते विष्णुसायुज्यं तथैव लभते सदा ॥१९२॥
विष्णुभक्तप्रति[illegible]यां यत्फलं तत्फलैस्सदा ।
तस्मात् सर्वप्रयत्नेन [illegible] चरेत् ॥१९३॥

सर्वपापविनाशार्थं सर्वबन्धविमुक्तये ।
मत्सायुज्यादि सिद्ध्यर्थं यूयं चापि चतुर्मुख ॥१९४॥

यतीनां विष्णुस्थापने आधिपत्यम्

विष्णुबिम्बस्थापनादौ यतीनां च विधिर्भवेत् ।
सर्वदा विष्णुसायुज्यसिद्धये च युगे युगे ॥१९५॥
मन्निमिताद्याधिपत्यं यतीनां मोक्षकारणम् ।
ब्रह्मनिष्ठत्वमेतद्वै रहस्यं स्यात् चतुर्मुख ॥१९६॥
विष्णुबिम्बप्रतिष्ठायां श्रीभूमिस्थापनादिषु ।
नित्यमुक्तप्रतिष्ठायां ये नरा विघ्नकारिणः ॥१९७॥
राजा वा राजभृत्यो वा स्त्रियो वा यतयो द्विजाः ।
शूद्राद्याशचापि नश्यन्ति पितृपुत्रादिभिस्सह ॥१९८॥
ते यान्ति नरकं घोरं प्रपन्नाश्च विशेषतः ।
जीव[illegible]श्च चण्डाळास्सर्वकर्मबहिष्कृताः ॥१९९॥
तेषां वंशंक्षयं याति पश्चायुश्श्रीस्च नश्यति
मद्बिम्बस्थापनं कुर्यात् तस्मादेव चतुर्मुख ॥२००॥

नूतनप्रतिष्ठित बिम्बानां स्वयंव्यक्तसमत्वम्

गृहार्चनाप्रतिष्ठायां एतदेव विधिर्भवेत् ।
गृहार्चापि स्वयंव्यक्तसम एव न संशयः ॥२०१॥
स्वयंव्यक्तादिबुद्धिश्च नास्ति चेन्निरयं व्रजेत् ।

उपदेशो गुरोर्नियमः

प्राणप्रतिष्ठाकालेतु आचार्यो मन्त्रवित् शुचिः ।
शिष्यस्य मन्त्रदीक्षार्थं लक्षमेकं तथागुरुः ।।२०२।।
जप्त्वा पश्चात्तु तन्मन्त्रं दद्यान्मोक्षादिसिद्धये ।
अर्चकस्य विशेषेण भक्तानां स्थापनादिषु ।।२०३।।
जपनिष्ठस्य सत्यं वै महद्वा नास्ति पातकम् ।
आचार्योऽथ यतिर्वापि सदा मन्त्राश्रयश्शुचिः ।।२०४।।
आचार्यश्च यतिश्चैव प्रपन्नश्च चतुर्मुख ।
अग्रे पुज्यस्स एवस्यात् विष्णुवत् सर्वकर्मसु ।।२०५।।
तथाचार्यनिन्दा च यतिनित्दा कुलक्षयः ।
आयुश्श्रीनाशहेतुस्स्यात् तस्मान्निन्दां सदा त्यजेत् ।।२०६।।
यतेर्मन्त्रवि ·ं चापि मनःखेदं न कारयेत् ।
तद्दुःखं मम दुःखं स्यात् सत्यमेव चतुर्मुख ।।२०७।।
मन्त्रविद्याधनस्सम्यक् ममस्थानं सदा भवेत् ।
तस्य दुःखं सुखं तस्मात् मामेव लभते सदा ।।२०८।।
हृद्विलासं तु तस्यैव ममप्रीतिकरं भवेत् ।
स्थापकस्य तपोयोगात् पूजायाश्चातिशोभनात् ।।२०९।।
आभिरूप्याच्च बिम्बस्य सदा सन्निहितोस्म्यहम् ।
संग्रहेणोक्त एतद्वै प्रतिष्ठाविधिरुत्तमम् ।।२१०।।
[illegible] वेदमार्गः प्रतिष्ठाविधिरुत्तमः ।

बिम्बसंप्रोक्षणादौ तु एतदेव विधिर्भवेत् ॥२११॥
विना जलादिवासं वै नयनोन्मीलनं विना ।
सदा च गृहबिम्बानां संप्रोक्षणमिदं भवेत् ॥२१२॥
संप्रोक्षणं तथा कुर्यात् जीवन्यासं च मन्त्रवित् ।
गृहे सम्प्रोक्षणे बिम्बे जीवन्यास विहीनकम् ॥२१३॥
चण्डाळार्चाबिम्बसमं तद्बिम्बंस्यात् चतुर्मुख ।

अस्पृश्यस्पर्शः

गृहे वा विष्णु बिम्बस्य पूजाहीने दिनत्रये ॥२१४॥
दीक्षाहीनविप्रादिस्पर्शने च विशेषतः ।
क्षत्रविट्शूद्रजात्यादि नीचादिस्पर्शनेपि च ॥२१५॥
श्वान गर्दभकाकादि स्पर्शनेप्यग्निदाहके ।
कराद्यल्पांग भंगेच तस्यांगं तत्पुनस्सदा ॥२१६॥
सूतकस्त्रीस्पर्शने वा चोरादिस्पर्शने तथा ।
मृतगर्भादिसंयुक्त सूतकस्पर्शने तथा ॥२१७॥
तदर्चकस्य स्त्रीपुत्र स्पर्शने गोत्रजस्य च ।
श्रुतिस्मृतिपुराणेषु आगमादिषु यत्श्रुतम् ॥२१८॥
सम्प्रोक्षणं च तद्दोषे कर्तव्यं स्यात् चतुर्मुख ।
संप्रोक्षण विहीने तु तद्बिम्बं नीचवत् त्यजेत् ॥२१९॥
तस्मात् सम्प्रोक्षणं कुर्यात् विष्णोर्नैवेद्यशुद्धये ॥२२०॥

तीर्थप्रसादमहिमा

तीर्थपूजादिसिद्ध्यर्थं हव्यकव्यादिसीद्धये ।
विष्णोर्निवेदितान्नं वै पितॄणां मुक्तिदायकम् ॥२२१॥
अर्चकानां विशेषेण विप्रादीनां चतुर्मुख ।
विष्णोस्तीर्थं च नैवेद्यं विष्णुसायुज्यदायकम् ॥२२२॥
तस्मात् सम्प्रोक्षणं कुर्यात् स्पृष्ठ्यादौ च गुरुश्शुचिः।
मन्त्रवत् विधिना ब्रह्मन् मयोक्तेनैव मार्गतः ॥२२३॥

इति श्रीपांचरात्रे पराशरसंहितायां विशिष्ठपरमधर्मशास्त्रे एकविंशोऽध्यायः

अथ द्वाविंशोऽध्यायः

श्रीभगवानुवाच

अथ वक्ष्ये विधानेन क्रमादेव चतुर्मुख ।
भक्तारूपावतारं च सदास्ते च हरेस्तदा ॥१॥
मत्स्यादि[illegible]वत् भक्तरूपादिकं अतःपरम् ।
सहस्रनाममध्येच नमोन्तं केचिदूचिरे ॥२॥
वक्ष्ये [illegible]भक्तादिरूपान् वै मुक्तिदायकान् ।
गुरुरूपधरांश्चैव नित्यपूजादिसिद्धये ॥३॥
अभूपरिस्थां भूतात्मा ततश्चासि महान् ह्रदः ।
कृते युगे त्वमासीच्च क्रमात् भूतं सरस्च तत् ॥४॥

महदाह्वयनामादि नामभेदेन च क्रमात् ।
त्रेतायां तु ततो जातो ब्रह्मज्ञो भक्तरूपतः ॥५॥
ततस्तत् भक्तवंशेषु जातो वै श्रीविभावनः ।

भूतादिमुनयः

तदा जातस्तु देवेशो द्वापरे च ततः क्रमात् ॥६॥
जातो योगपथानेतान् भूतावासस्ततः परम् ।
ततो रमयिता जातः कलौ चैव ततः क्रमात् ॥७॥
वेदान्तादि प्रकाशाय जातश्रीशत्रुतापनः ।

नाधमुन्याद्याचार्यावतारः

तथा जातस्सत्पतिश्च नाथो वै विष्ण्वंशकः ॥८॥
जातो वै पुण्डरीकाक्षो रामः कृष्णस्ततः क्रमात् ।
जातः पूर्णस्तु योगीशः कृष्णस्तद्वरदस्ततः ॥९॥
जातस्तु सुन्दरस्तद्वत् विष्ण्वंशश्शत्रुजित् क्रमात् ।
भक्तावताराश्चैते वै विष्ण्वंशाश्शुद्धसात्विकाः ॥१०॥
भुक्तिमुक्तिप्रदास्सम्यक् रामकृष्णादिवत् सदा ।
वासुदेवस्य पार्श्वे च पूजयेत् व्यूहमूर्तिवत् ॥११॥
भक्तप्रतिष्ठाकर्तव्या तस्मादेव चतुर्मुख ।
सर्वेषां विष्णुसायुज्यसिद्धये च युगे युगे ॥१२॥
विष्णोरंशो भवेत् सम्यक् लक्ष्मीरूपमभेदकम् ।

भूरूपं च ततो नीळा रूपं लक्ष्मीवदुच्यते ॥१३॥
चक्रशंखगदापद्म रूपं विष्णवंशकं भवेत् ।
अनन्तो गरुडश्चैव विष्वक्सेनस्त्वमानवः ॥१४॥
विष्णोरंशावतारा वै भुक्तिमुक्तिप्रदायकाः ।
पूजायोग्याश्च सततं विष्णुवद्देवसन्निधौ ॥१५॥
विष्णोरंशावताराश्च रूपा भागवताख्यकाः ।
तद्वक्ष्ये वर्तते सम्यक् क्रमादेव चतुर्मुख ॥१६॥
प्रह्लादो नारदश्चैव पुण्डरीकः पराशरः ।
वेदव्यासोम्बरीषश्च शुकस्तद्वच्च शौनकः ॥१७॥
भीष्मो दाल्भ्यस्ततो जातश्तत्वद्वंशेषु सादरः ।
रुक्मांगदस्तदा तद्वत् वशिष्ठस्तु विभीषणः ॥१८॥
एते विष्णवंशसंभूतास्सात्विका ॠषिनामकाः ।
एते भागवताश्चैव भुक्तिमुक्तिप्रदायकाः ॥१९॥
आचार्योग्र्यास्सदा सम्यक् विष्णुपार्श्वे च नित्यवत् ।
एतदर्चाविधिस्सम्यक् विष्णुसायुज्य हेतवे ॥२०॥
प्रपन्नानां च सर्वेषां सर्वपापप्रशान्तये ।
विष्णवर्चानित्यपूजा च मुक्तार्चा च विशेषतः ॥२१॥
तथा भागवतार्चा च नित्यनैमित्तिकैः क्रमात् ।
दिव्ये सैद्धे स्वयं व्यक्ते मानुषे देवमन्दिरे ॥२२॥
गृहे च पूजयेत् विप्रः प्रपन्नश्च विशेषतः ।

अन्ये च क्षत्रियाद्या वै गृहे कुर्युश्च तत् क्रमात् ॥२३॥
विप्रप्रपन्नहस्तैर्वै विष्ण्वादीन् देवमन्दिरे ।
दत्वा धनादिकं सम्यक् पूजां वै कारयेत् सदा ॥२४॥
इति सम्क्षेपतः प्रोक्तं सर्वेषां मुक्तिसिद्धये ॥२५॥

वैष्णवलक्षणम्

न चलति निजवर्णधर्मतोयः
समममतिरात्मसुहृत् विपक्षयोश्च ।
न हरति न चलति किंचिदुच्चैः
सितमनसं तमवेहि विष्णुभक्तम् ॥२६॥
अर्थपंचकतत्वज्ञाः पंचसंस्कारसम्युताः ।
आकारत्रयसंपन्नाः महाभागवतास्स्मृताः ॥२७॥
शंखचक्रोर्ध्वपुण्ड्रादिधारणं दास्यलक्षणम् ।
तन्नामकरणं चैव वैष्णवं तदिहोच्यते ॥२८॥
वैष्णवं द्विविधं प्रोक्तं बाह्यमाभ्यन्तरं तथा ।
शंखचक्रादिकं बाह्यं आन्तरं वीतरागता ॥२९॥

प्रपन्नलक्षणम्

ईषणात्रयनिर्मुक्तः कामादिगुणवर्जितः ।
तापत्रयगुणातीतः प्रपन्नस्स उदाहृतः ॥३०॥
विष्णुसेवैकनिरतः स वै लक्ष्मीगुणान्वितः ।

तापः पुण्ड्रस्तथा नाम मन्त्रो यज्ञश्च पंचमः ॥३१॥
अमी परमसंस्काराः परमैकान्ति हेतवः ।
भक्तादि लक्षणं सम्यक् संग्रहेण निरूपितम् ॥३२॥
सर्वेषां ज्ञानसिद्ध्यर्थं मुक्त्यर्थं च चतुर्मुख ।
ग्रन्थान्तरे व्यक्तमेतत् प्रपन्नादेश्च लक्षणम् ॥३३॥

इति श्रीपांचरात्रे पराशरसंहितायां विशिष्टपरमधर्मशास्त्रे भक्तरूपावतारो नाम द्वाविंशोऽध्यायः

अथ त्रयोविंशोऽध्यायः

नामत्रयमन्त्रस्य न्यासध्यानादिकम्

श्रीभगवानुवाच

अथ वक्ष्ये विशेषेण क्रमादेव चतुर्मुख ।
नामत्रयाख्यमन्त्रस्य न्यासध्यानादिकं ततः ॥१॥
नामत्रयाख्यमन्त्रस्य ऋषिर्व्यासो भवेत् सदा ।
छन्दश्च देवी गायत्री देवतात्र उदाहृतः ॥२॥
अच्युतानन्तगोविन्दरूपी वै भगवान् भवेत् ।
ओंबीजं च नमस्शक्तिः श्रीं कीलकमिति स्मृतम् ॥३॥
ह्रीं कवचं ऐमित्यस्त्रं वर्णं तत् कृष्णपिंगळम् ।
नामत्रयं द्विरुच्चार्य करन्यासं षडंगकम् ॥४॥
ज्ञानाद्यं च तथा कुर्यात् मन्त्रदेवं स्मरेत् शुचिः ।

व्याप्यं तत् व्यापकं चैव तन्मन्त्रेणैव कारयेत् ॥५॥
चक्रमुद्रां प्रदर्श्याथ ध्यानं कृत्वा जपेत्मनुम् ।
अच्युतानन्तगोविन्दरूपिणं विभुमव्ययम् ॥६॥
भजेहं वासुदेवं तं श्रीभूनीळादिसंयुतम् ।
किरीटादि विभूषांगं ब्रह्मरुद्रादिसेवितम् ॥७॥
चक्राब्जशंखासि गदा धनुर्बाणसमन्वितम् ।
लक्षमेकं जपेत् भक्त्या तद्बिम्बस्थापनादिषु ॥८॥
कुर्यात् मन्त्रादि देवार्थं कुर्यादर्चादिकं ततः ।
पुरश्चरणहोमादीन् पुंसूक्तोक्तवदाचरेत् ॥९॥

नामत्रययन्त्रम्

वक्ष्ये तद्यन्त्रममलं सर्वेषां च हिताय वै ।
सुवर्णे राजते ताम्रे शुद्धद्रव्ये सुयन्त्रके ॥१०॥
मध्ये वृत्तं समालिख्य तन्मध्ये प्रणवं लिखेत् ।
रामबीजं महामायां नारसिंहं सुदर्शनम् ॥११॥
वाराहबीजं मसंलिख्य प्रणवेनैव वेष्ठयेत् ।
षट्कोणं तद्बहिर्लिख्य तन्मध्ये प्रणवं लिखेत् ॥१२॥
रामं कोणेषु संळिख्य सन्धौ विष्णुषडर्णकम् ।
सहस्रारस्तु कोणाग्रे मायाबीजेन वेष्टयेत् ॥१३॥
बहिरष्टदळान् लिख्येत् मूलमन्त्रं दळेषु च ।
सन्धौ रामा[illegible]कं न्यस्य दळाग्रेषु सुदर्शनम् ॥१४॥

मायाबीजेन संवेष्ट्य तद्बहिर्द्वादशं दळम् ।
दळेषु वासुदेवं च सीतारामं च संधिषु ॥१५॥
नारसिंहं दळाग्रेषु संलिखेत् साधकोत्तमः ।
मान्मथेन संवेष्ट्य बहिरष्टदळं लिखेत् ॥१६॥
तद्दळेषु स्वरान् लिख्य हयग्रीवं च सन्धिषु ।
दळाग्रेषु च वाराहं वेष्टनं मायया भवेत् ॥१७॥
तद्बहिर्द्वादशदळं गायत्रीं तद्दळेषु च ।
सन्धौ तु विष्णुगायत्रीं श्रीगायत्रीं दळाग्रके ॥१८॥
नीळाबीजेन संवेष्ट्य द्वात्रिंशद्दळमालिखेत् ।
दळेषु मन्त्रराजं च चक्रराजं च सन्धिषु ॥१९॥
श्रीरामं तद्दळाग्रेषु प्रणवेनैव वेष्टयेत् ।
परितो व्यंजनान् लिख्य हंस हंसेति सम्युतम् ॥२०॥
तद्बहिर्लिख्यते ब्रह्मन् पार्थिवं मण्डलं ततः ।
अष्टवज्रसमोपेतं उपवेष्ट्यास्त्रमन्त्रवित् ॥२१॥

॥मत्रयथन्त्रांगानि

यन्त्रागानि ततो लिख्य प्राणास्थापनमाचरेत् ।
तद्यन्त्रं पूजयेत् सम्यक् धारयेत् वा सुभक्तितः ॥२२॥
विप्राश्च क्षत्रिया वैश्याश्शूद्राद्यास्सर्वकर्मसु ।
आयुरारोग्यपुत्रादिसिद्धये सर्वकर्मसु ॥२३॥
शत्रुराज्यजयार्थं च परसेना जयाय वै ।

सर्वशत्रुक्षयार्थं च अष्टैश्वर्यादि सिद्धये ॥२४॥
दुर्भिक्षभयनाशाय गजराज्याभिवृद्धये ।
सर्वोत्पातनिवृत्यर्थं व्याध्यादीनां क्षयायच ॥२५॥
पशुप्रजासमृद्ध्यर्थं अपमृत्यु विनाशने ।
स्वसेनारक्षणार्थाय महापातकनाशने ॥२६॥
आत्मद्रोहे सुतद्रोहे स्वामिद्रोहे च वंचने ।
पितृमातृसुहृद्द्रोहे भ्रातृद्रोहादिसम्भवे ॥२७॥
सर्वरोगविनाशार्थं एतद्यन्त्रं च धारयेत् ।
मन्त्रवित् गुरुणा सम्यक् कारयित्वा चतुर्मुख ॥२८॥
यन्त्राणां उत्तमं यन्त्रं रहस्यमिदमेव हि ।
एतद्यन्त्रं समुद्धार्य पश्चान्नामत्रयं बुधः ॥२९॥
लक्षमेकं जपेत् भक्त्या तत्तत् कर्म जयाय वै ।
चातुरंगविधानेन शान्तिके पौष्टिकादिषु ॥३०॥
यन्त्रहीनजपात् सम्यक् पादमात्रफलं भवेत् ।
तस्मात् सर्वात्मना ब्रह्मन् यन्त्रं उद्धार्य तं जपेत् ॥३१॥
द्वादशांगुळमात्रेण कुर्यादष्टांगुळेन वा ।
गोरोचनेन वा सम्यक् मेळयेच्च हरिद्रया ॥३२॥
हरिचन्दनपंकेन विलिखेत्त् यन्त्रमुत्तमम् ।
विष्णुसायुज्यसिद्ध्यर्थं एतद्यन्त्रं च धारयेत् ॥३३॥

मोक्षार्थी धारयेत् भक्त्या सर्वदा कमलासन ॥३४॥

इति श्रीपांचरात्रे पराशरसंहितायां विशिष्टपरमधर्मशास्त्रे अच्युतानन्तगोविन्दाख्य नामत्रयाणां ऋष्यादिध्यानं नाम त्रयोविंशोऽध्यायः

अथ चतुर्विंशोऽध्यायः

हंसादि विष्णुमन्त्राणां वेदमन्त्रान्तर्भावः

श्रीभगवानुवाच

अथ वक्ष्ये विधानेन क्रमादेव चतुर्मुख ।
हंसादि विष्णुमन्त्राणां वेदमन्त्राणि संग्रहात् ॥१॥
एकवारं जपेत् मन्त्री वेदमन्त्रं दिने दिने ।
तत्तन्मन्त्रं जपेत् भक्त्या तन्मन्त्रफलसिद्धये ॥२॥
वेदमन्त्रादिकं सर्वं विप्राणां विधिरेव हि ।
वर्जयेत् वेदमन्त्रं वै शूद्राद्यस्तज्जपादिषु ॥३॥
हंसश्शुचिषडिति हम्समन्त्रं भवेत् सदा ।
राज्याय सन्तं राज्यन्नोपनमे[illegible]ति मत्स्यमन्त्रमिति स्मृतम् ॥४॥
प्रातरग्निं प्रातरिंद्रं इति हयग्रीवमनुर्भवेत् ।
यो रस[illegible]मिति कूर्ममन्त्रं तदा भवेत् ॥५॥
उद्धृ[illegible] मन्त्रं वाराहकं भवेत् ।
मृगोन भीम इति मन्त्रं नारसिंहकं भवेत् ॥६॥

वर्तते मन्त्रराजस्य पदान्येकादशस्य वै ।
वक्ष्ये तन्मन्त्रसिद्ध्यर्थं तत्प्रतिष्ठादिसिद्धये ॥७॥
ध्रुवोसि मानस्तोके त्रीणिपदाज्वालामालादि विश्रुतिः ।
चक्षुर्मृगो न भीमो भीषास्मात् भद्रं कर्णे त्यम्भकम् ॥८॥
ओं नमो ब्रह्मणे आर्द्रं ज्वलतीत्येकादशमन्त्राः ।
वैष्णवं वामनमालभन्ते यज्ञो वै विष्णुः ॥९॥
विष्णुरेव भूत्वेमां लोकान् अभिजयतीति मन्त्रस्स्याद्यां
अनन्तधा ॥१०॥
त्रीणि पदा विचक्रम इति मन्त्रस्स्यात् वै त्रिविक्रमम् ।
राजाधिराजराजायेति मन्त्रश्रीरामकं भवेत् ॥११॥
श्वेतो दक्षिणतः कृष्णः उत्तरतइति
बलरामकृष्णमन्त्रो भवेतात् ।
पतिं विश्वस्यात्मेति श्रीकृष्णमन्त्रं भवेत् ॥१२॥
सहस्त्रशीर्षा पुरुष इति विष्णु
नारायणवासुदेवमन्त्राश्च भवन्ति ।
सहस्त्रशीर्षं देवमिति केशवादि
चतुर्विंशति मूर्तिमन्त्रश्च भवेत् ॥१३॥
चतुर्वेदास्सर्ववेदास्सर्वोपनिषदस्त्रयत्रिंशत् ।
कोटिविष्ण्वंशांश विग्रहमन्त्रा भवन्ति ॥१४॥
चरणं [illegible]ति सुदर्शनमन्त्रो भवेत् ।

यं पांचजन्यमिति शांखोमन्त्रो भवेत् सदा ॥१५॥
हिरण्यवर्णां हरिणीमिति लक्ष्मीमन्त्रो भवति ।
इषेत्वोर्जेत्वेति नीळामन्त्रो भवति ॥१६॥
अनन्तमव्ययं कविमित्यनन्तमन्त्रो भवति ।
सुपर्णोसि गरुत्मानिति गरुडमन्त्रो भवति ॥१७॥

वेदमन्त्राश्शूद्रैर्न वक्तव्याः

तत्तत् बिम्बप्रतिष्ठा यां तत्तन्मन्त्रजपादिषु ।
शूद्राद्यौ न वदेत् सत्यं सर्वदा च चतुर्मुख ॥१८॥
वेदमन्त्रविहीने तु प्रतिष्ठायां जपादिषु ।
नास्ति वै देवसान्निध्यं सत्यं सत्यं चतुर्मुख ॥१९॥
अमन्त्रमक्षरं नास्ति नास्तिमूलमनौषधम् ।
अयोग्यःपुरुषो नास्ति प्रयोगस्तत्र दुर्लभः ॥२०॥
आचारहीनं न पुनन्ति वेदा यद्यप्यधीतस्सहषड्भिरंगैः ।
छन्दांस्येनं मृत्युकाले त्यजन्तिनीडं शकुन्ता इव जातपक्षाः ॥२१॥
आचारप्रभवो धर्मो धर्मस्य प्रभुरच्युतः ।
तस्मात् सर्वात्मना ब्रह्मन् आचारं न त्यजेत् सदा ॥२२॥

इति श्रीपांचरात्रे पराशरसंहितायां
विशिष्ट परमधर्मशास्त्रे हंसादि विष्णूनां वेदमन्त्रनिर्देशो नाम
चतुर्विंशोऽध्यायः

अथ पञ्चविंशोऽध्यायः

श्रीभगवानुवाच

अथ वक्ष्ये विधानेन सर्वेषां च हिताय च ।
न्यासादि सत्प्रयोगादीन् अपमृत्यु हरं ततः ॥१॥
सुदर्शननृसिम्हस्य मन्त्रस्यैकाक्षरस्य च ।
पूर्वं तत्संग्रहेणोक्तं तद्बिम्बस्थापनाय वै ॥२॥
स्वरान्तं सान्तसंयुक्तं विषस्यानिल संयुतम् ।
षट्स्वरं बिन्दुसंयुक्तं मोक्षाभीष्टप्रदायकम् ॥३॥
सुदर्शननृसिंहस्य बीजमन्त्रं इदं भवेत् ।
ऋषिर्ब्रह्मास्य देवस्य गायत्री छन्द उच्यते ॥४॥
देवता भगवान् सोऽपि चक्रराजोनृकेसरी ।
क्षंबीजं शक्ति रूपं वै ह्रीं कीलकमिति स्मृतम् ॥५॥
श्रीं कवचं ऐमित्यस्त्रं रक्तवर्ण इति स्मृतः ।
षट्स्वरैस्तु करन्यासं षडंगं कारयेत् सदा ॥६॥
सुदर्शन नृसिंहं वै ध्यायन् ज्ञानादि षड्गुणैः ।
व्याप्यं तत् व्यापकं चैव तन्मन्त्रेणैव कारयेत् ॥७॥
अन्तर्बहिर्मात्रके च एतन्मन्त्रेण कारयेत् ।
षट्चक्रेषु च तत्वेषु एवं देवं च संस्मरेत् ॥८॥
चक्रमुद्रां प्रदर्श्याथ ध्यायेत् चक्रनृसिंहकम् ।
प्राणायामं षोडशाख्यं पूर्वोक्तं चात्र वै भवेत् ॥९॥

नृसिंहध्यानम्

बिभ्राणं शक्तिखड्गज्वलनमथसृणिं कुन्तदन्तौ कुठारं
चक्रं शंखाब्जपाशं हलमुसलगदाखेटशूलांश्च दोर्भिः ।
प्रत्यालीढं तमीढे त्रिनयनलसितं पिंगकेशं सुदंष्ट्रं
देवं पंचार्धयोगासनलसितचतुश्चक्रभास्वन्नृसिंहम् ॥१०॥
एवं ध्यात्वा जपेन्मन्त्रं लक्षमेकं सुमन्त्रवित् ।
प्रतिष्ठादौ च रोगादौ ग्रहपीडादिनाशने ॥११॥
सर्वाभीष्टादिसिद्ध्यर्थं वेदमन्त्रैः सहादरात् ।
तत्तन्मन्त्रादिसंयुक्तं एतन्मन्त्रं प्रयोजयेत् ॥१२॥
स्वस्यैवावरणादीन् वै हयग्रीवस्य मन्त्रवित् ।
प्राणपंचकमन्त्रं वै मन्त्रराजस्य मन्त्रवित् ॥१३॥
लिखेत् बीजं च तन्मध्ये मन्त्रे चक्रं नृसिंहकम् ।
साध्ययुक्तं लिखेन्मन्त्री वाय्वग्निविषसंयुतम् ॥१४॥
पार्थिवं मण्डलं लिख्य फणि यन्त्रं च तद्बहिः ।
अष्टवज्रसमोपेतं यन्त्रांगसहितं क्रमात् ॥१५॥
प्राणप्रतिष्ठां कृत्वाथ कुर्यादर्चादिकं ततः ।
धारयेद्यन्त्रमेतद्वै सर्वदा सर्वसिद्धये ॥१६॥
वृत्तकुण्डे सर्वसिद्धिं शान्तिकं चतुरश्रके ।
वर्णाजिह्वादिकं ज्ञात्वा पश्चात् होमं समाचरेत् ॥१७॥
अतीतवर्षपर्याये तत्तन्मन्त्रविदाचरेत् ।

अपमृत्युविनाशार्थं दूर्वाहोमं घृताक्तकम् ।।१८।।
सुदर्शननृसिंहस्य मन्त्रेणैवायुतं ततः ।
पंचायुतं यजेन्मन्त्री इमं मे वरुण ।।१९।।
तत्वायामीत्यन्नो अग्ने सत्त्वन्नो अग्ने त्वमगने
अयासीति आयुर्मन्त्रै स्तत्बीजसहितं स्वाहांतं
सर्वापमृत्युनाशनं स्यात् एतत् होमात् चतुर्मुख ।।२०।।
कृत्वा ऋष्यादयस्सर्व एतद्वै कालवंचनम् ।
चिरायुत्वं च सम्प्राप्ताः हरिश्चन्द्रादयो नृपाः ।।२१।।
राज्यं कृत्वा चिरंकालं सुखेनैव च संस्थिताः ।
अकृत्यादीन् पुनः कृत्वा कृत्वा चैतत् पुनः पुनः ।।२२।।
होमादि निग्राभ्या अग्ने तेजस्विन्होमादौ
भविष्यन्ति मम नाम जुहुयात् ।।२३।।
सर्वरोगविनाशार्थं होममेतत् तथा भवेत् ।
सर्वसिद्धावपामार्गहोमं कुर्यात् घृताक्तकम् ।।२४।।
सुदर्शन नृसिंहस्य बीजमन्त्रेण सादरम् ।
अयुतं जुहुयान्मन्त्री तत्त् बिम्बादि पल्लवैः ।।२५।।
आदौ चान्ते जपेत् सम्यक् हविष्मतीः मम नाम ।
प्रतिष्ठां विष्णोर्नुकं कृणुष्व वाजः ।।२६।।
रक्षोहणो निग्राथ्यास्थ अग्ने तेजस्विन्
भद्रं कर्णेभिः पुंसूक्त श्रीसूक्त भूसूक्त ।

नीळासूक्तस्येकवारं जपेत् ॥२७॥

अतिवृष्ट्यादि शमनम्

अतिवृष्टावनावृष्टौ अपमार्गौर्हुनेत् तथा ।
सुदर्शननृसिंहस्य मन्त्रंमुद्रादिसंयुतम् ॥२८॥
समुद्रं गच्छेति मन्त्रंवै आदौ चान्ते जपेत् त्रयाः ।
वृष्ट्यर्थं जुहून् मन्त्री अपामार्गं घृताक्तकम् ॥२९॥
सुदर्शननृसिंहस्य मन्त्रेणायुतमादरात् ।
पुरोवातो वर्षन् जिन्वरावृदिति अष्टसहस्त्रं वैतसैर्जुहुयात् ।३०।
होमादौ चान्ते वा सूक्तानि चैतद्बीजतत्वलव
सहितानि एकवारं जपेत् ॥
अष्टोत्तरसहस्त्रं वा अपामार्गं घृताक्तकम् ।
सुदर्शननृसिंहस्य मन्त्रेणैव हुनेत् शुचिः ॥३१॥
सर्ववन्ध्या निवृत्यर्थं दंपतीनां स च तत् होमान्ते जपेत्मन्त्री ।
धाता ददातु नो रयिमिति चतस्त्रो यस्त्वाहृदा कीरिणेति
सहस्त्रम् ॥३२॥
विष्णोर्यो कल्पयतु
अक्षिभ्यां ते होमादौचान्ते त्रिवारं जपेत् ॥३३॥
अष्टैश्वर्यादिसिद्ध्यर्थं तथा कुर्यात् विचक्षणः ।
रक्षोघ्नादि जपेत् सम्यक् पूर्वोक्तं च चतुर्मुख ॥३४॥
कन्यार्थं अयुतं जुहुयात् अपामार्गधृताक्तकैः ।

होमार्थी च विशेषेण अपामार्गैर्घृताक्तकैः ॥३५॥
अयुतं जुहुयान्मन्त्री एवं संपूज्य तत् हरिम् ।
प्रपन्नः परमैकान्ती सर्वबन्धविमुक्तये ॥३६॥
कस्तूर्यगरुकर्पूरपूतिद्वयसमन्वितः ।
श्रीचन्दनेनसंयुक्तं सुगन्धनिशिताम्बुना ॥३७॥
सुगन्धकुसुमैस्सम्यक् तुळसीबिल्वसंयुतम् ।
अन्नाद्यैष्षड्रसोपेतै अपूपैस्सत्फलादिभिः ॥३८॥
सुदर्शननृसिंहंवै पूजयेच्च सुमन्त्रवित् ।
तच्चन्दनाद्यैः कुसुमैः निर्माल्यैश्च दिने दिने ॥३९॥
अलंकृत्य स्वदेहं वै जपहोमादिकं चरेत् ।
सुदर्शननृसिंहं वै मन्त्रवत् साधकोत्तमः ॥४०॥
तथैवास्य च नैवेद्यं अश्नीय च दिने दिने ।
अशक्तो बिल्वपत्रैश्च श्रीतुळस्या च पूजयेत् ॥४१॥
यथाशक्ति च नैवेद्यं माषपिष्टैर्गुळं विना ।
दद्यात् देवस्य नैवेद्यं स्वयंभुंजीत सादरम् ॥४२॥
सुदर्शननृसिंहस्य मन्त्रवित् मन्त्रमादरात् ।
सघृतं ससूपंच अळर्कं तण्डुलोदनम् ॥४३॥
कार्कोटकी शृंगिभेरमगस्त्यं नागरं सदा ।

अलमोजं निम्बपत्रं गोक्षीरं दधिशर्कराः ॥४४॥
माक्षिकं माषपिष्टं च तैलपक्वं गुडं विना ।
भक्षयेत् विष्णुसायुज्य सिद्धये देहशुद्धये ॥४५॥
ज्ञानकर्मादि शुद्ध्यर्थं सर्वपापविनाशनम् ।
सर्वबन्धविनाशार्थं एतदुक्तं विधानतः ॥४६॥
आचार्यो विप्रवर्यश्च ब्रह्मचारी गृही यतिः ।
आचरेत् मन्त्रवित् ब्रह्मन प्रपन्नश्च विशेषतः ॥४७॥
एकान्ती परमैकान्ती सर्वदा च युगे युगे ।
सुदर्शननृसिंहस्य बिम्बस्य च चतुर्मुख ॥४८॥
मन्त्रस्य च विशेषेण यन्त्रस्यापि सदा चरेत् ।
सत्यं सत्यं पुनस्सत्यं समंत्रास्ति कदाचन ॥४९॥
देवत्वं च ऋषित्वं च चक्रवर्तित्वमुत्तमम् ।
तथा च कामरूपित्वं खेचरत्वादिकं सदा ॥५०॥
कर्तुं ह्यकर्तुं सामर्थ्यं अन्यथा कर्तुमेव च ।
सुदर्शननृसिंहस्य सत्यं वै मन्त्रजापनात् ।
लभेदत्र नसंदेहो रहस्यमिदमेव हि ॥५१॥
सर्वज्ञत्वं वेदपाठं वेदान्तपठनादिकम् ।
सर्वविद्याप्रदं सम्यक् परवादजयादिकम् ॥५२॥
काव्यशास्त्रादि निर्माणं सर्वेशत्वमकृत्रिमम् ।
सदा लभेच्च सत्यं वा एतन्मन्त्रस्य जापनात् ॥५३॥

एतदुक्तं विशेषेण सर्वदा सर्वसिद्धये ।
तवोपरि कृपा जाता तस्मादुक्तं चतुर्मुख ॥५४॥
सुदर्शननृसिंहस्य बीजं तत् प्रणवं भवेत् ।
तस्मात् शुचिर्मन्त्रजापो जपेन्मन्त्रमिदं सदा ॥५५॥
सर्वेषां बालकानां च सर्वदा हितमाचरेत् ।
येनकेनाप्युपायेन यस्य कस्यापि देहिनः ।
संतोषं जनयेत् यस्तु तदेवेश्वरपूजनम् ॥५६॥

इति श्रीपांचरात्रे पराशरसंहितायां विशिष्टपरमधर्मशास्त्रे सुदर्शननृसिंहमन्त्रस्य ऋष्यादिन्यासो नाम पञ्चविंशोऽध्यायः

अथ षड्विंशोऽध्यायः

श्रीभगवानुवाच

हंसादि कृष्णमन्त्राणां यद्बिम्बं वर्तते तथा ।
वक्ष्ये तद्बिम्बपूजार्थं तत्प्रतिष्ठादिसिद्धये ॥१॥

हंसादि मन्त्राणां संख्या

तत्तन्मन्त्रफलोक्तादि सिद्धये च चतुर्मुख ।
अष्ठाथ हंसमन्त्राश्च मत्स्यमन्त्राश्च षोढश ॥२॥
हयग्रीवस्य मन्त्रस्य भेदाश्च द्वादश क्रमात् ।
कुर्ममन्त्रश्च षड्रोक्ताः किटिमन्त्रश्च षोडश ॥३॥
तथा नृसिंहमन्त्रश्च चतुष्षष्ठिःचतुर्मुख ।

दशवामन मन्त्राश्च षट्त्रिविक्रममेव च ।।४।।
षट्त्रिंशत् राममन्त्राश्च बलमन्त्राश्च षोडश ।
कृष्णमन्त्रास्त्रयस्त्रिशत् गारुडा विंशतिःक्रमात् ।।५।।
अशीति चक्रमन्त्राश्च पंचचक्रनृकेसरी ।
लक्ष्मीमन्त्राश्च पंचाशत् भूमन्त्रस्त्रिंशदेव हि ।।६।।
नीळामन्त्रास्त्रयस्त्रिंशत् मन्त्राश्चानन्तका दश ।
शंखपद्मगदामन्त्रासहस्त्राणि त्रयस्त्रयः ।।७।।
दशसेनेश मन्त्राश्च सत्यमन्त्राश्च षोडश ।
द्वेद्वे पुरुषमन्त्राश्च ह्रानुमन्त्ताश्च षोडश ।।८।।
पंचाशद्वर्णमन्त्राश्च पंचाशदिति कथ्यते ।
केशवादि चतुर्विंश मन्त्रास्स्युश्च चतुर्मुख ।।९।।
मन्त्रनामत्रयं चैकं मन्त्रसंख्याः प्रकीर्तिताः ।
सहस्त्रनाममूर्तीनां मन्त्राः पंचसहस्त्रकाः ।।१०।।
एते मुख्याः प्रपन्नानां विष्णुसायुज्यदायकाः ।
सर्वेषां इष्टसिद्ध्यादि दायकास्सात्विकोत्तमाः ।।११।।
तत्तद्बिम्बार्चनादौ तु तत्तन्मन्त्रेण कारयेत् ।
आकारं बिन्दुसंयुक्तं सर्वेषां मुक्तिदायकम् ।।१२।।
हंसबीजमितिप्रोक्तं द्विजानां च विशेषतः ।
ऋषिर्ब्रह्मास्य मन्त्रस्य गायत्री छन्द उच्यते ।।१३।।
हंसरूपी च भगवान् देवो नारायणो भवेत् ।

अंबीजं शक्ति रीं चैव करन्यासं षडंगकम् ॥१४॥
षड्स्वरैस्तु सदा कुर्यात् ज्ञानादि गुणसंयुतम् ।
चक्रशंखधरं देवं किरीटादि विभूषितम् ॥१५॥
सत्यज्ञानमयं देवं हंसानन हरिं भजे ।
एवं ध्यात्वा जपेन्मन्त्रं लक्षमेकमनुत्तमम् ॥१६॥
तद्बिम्बस्थापनं कुर्यात्पश्चात् सद्वैष्णवोत्तमः ।
प्रपन्नः परमैकान्ती मोक्षार्थी च जपेत् सदा ॥१७॥
यतिश्च ब्रह्मचारी च द्विजाद्यो दीक्षीतो व्रती ।
षडक्षरं हंसमन्त्रं क्रमाद्वक्ष्ये चतुर्मुख ॥१८॥
तार्तीयं पूर्वं उद्धार्य हंसाय नमइत्यपि ।
जपेत् हंसमनुं सम्यक् सर्वाभीष्टफलप्रदम् ॥१९॥
करन्यासं षडंगं च द्विरुच्चार्य मनुं क्रमात् ।
कृत्वा ज्ञानादिभिर्मन्त्री पश्चात् ध्यानं समाचरेत् ॥२०॥
शंखचक्रगदापद्मधरं नीलोत्पलप्रभम् ।
हंसवक्त्रं हरिं वन्दे सर्वाभरणभूषितम् ॥२१॥
लक्षमेकं जपेत् भक्त्या दशांशं तर्पयेत् शुचिः ।
श्रीचन्दनाम्भसा सम्यक् जुहुयात् गोघृतेन च ॥२२॥
पूजयेत् श्रीतुळस्या तु दशांशोक्त विधानतः ।
भोजयेत् षड्रसोपेतं विष्णुभक्तद्विजांस्ततः ॥२३॥
जपेत् तं मोक्षकाम्यार्थी तद्बिम्बस्थापकस्सदा ।

भवेत् तत् हंसमन्त्राणां होमाद्याश्च तदेव हि ॥२४॥

हंसत्र्यक्षरी

हंसस्य त्र्यक्षरं वक्ष्ये क्रमादेव चतुर्मुख ।
धार्यं च द्विजवर्याद्यैः प्रणवादि नमोन्तकम् ॥२५॥
आदिमूलं इदं चैतत् भुक्तिमुक्ति प्रदायकम् ।
ऋषिर्ब्रह्मास्य मन्त्रस्य गायत्री छन्द उच्यते ॥२६॥
हंसनारायणो देव ओं बीजं शक्ति रीं ततः ।
पदद्वयेन ज्ञानाद्यैस्त्रिरुच्चार्य मनुं क्रमात् ॥२७॥
करन्यासं षडंगं तु कुर्यात् ज्ञानादि सिद्धये ।
चक्रशंखगदापद्मशार्गबाणधरं विभुम् ॥२८॥
किरीटादि विभूषांगं हंसग्रीवमहं भजे ।
एवं ध्यात्वा जपेन्मन्त्रं द्विजाद्यस्सर्वसिद्धये ॥२९॥
हंसस्याष्ठाक्षरं मन्त्रं क्रमाद्वक्ष्ये चतुर्मुख ।
तार्तीयं श्रीं तथा ह्रीं च हंसायेति नमोन्तकम् ॥३०॥
भुक्तिमुक्तिप्रदं शांतं यतीनां च तदेव हि ।
ऋषिर्वसिष्ठो मन्त्रस्य जगती छन्द उच्यते ॥३१॥
हयग्रीवो देवता वै ओं बीजं शक्ति रीं ततः ।
करन्यासं षडंगं तु कुर्यान्मन्त्रपदैः क्रमात् ॥३२॥
मन्त्रान्ते प्रणवं योज्यं ज्ञानाद्यैर्ज्ञानसिद्धये ।
चक्रशंखगदापद्म शार्गबाणासिधारिणम् ॥३३॥

वरहस्तधरं शांतं सर्वाभरणभूषितम् ।
श्रीभूमिसहितं देवं श्रीवत्साद्यादिधारिणम् ॥३४॥
परात्परमजं सत्यं हंसग्रीवमहं भजे ।
एवं ध्यात्वा जपेन्मन्त्रं मुमुक्षुश्च यति व्रती ॥३५॥
क्रमाद्वक्ष्ये हंसमन्त्रं द्वादशाक्षरमुत्तमम् ।
ओं ह्रीं क्लीं नमो भगवते हंसायेति पदं वदेत् ॥३६॥
भुक्तिमुक्तिप्रदकरं द्विजानां च विशेषतः ।
मन्त्रस्यास्य ऋषिर्व्यासस्त्रिष्टुप् छन्द उदाहृतम् ॥३७॥
भगवान् देवता हंस ओं बीजं शक्ति रीं ततः ।
करन्यासं षडंगं तु तन्मन्त्रपदपंचकैः ॥३८॥
मन्त्रान्ते प्रणवं चो[illegible] कुर्यात् ज्ञानगुणादिभिः ।
चक्रशंखगदापद्महलशार्गासिधारिणम् ॥३९॥
वरबाणाभयधरं कौस्तुभाद्यैरलंकृतम् ।
किरीटहारकेयूर कटकादि विभूषितम् ॥४०॥
श्रीभूनीळाधिपं देवं हंसग्रीवमहं भजे ।
एवं ध्यात्वा जपेन्मन्त्रं यतिश्शान्तो गृही व्रती ॥४१॥
वक्ष्ये मोक्षादि सिद्ध्यर्थं क्रमात् हंसदशाक्षरम् ।
ओं श्रीं ह्रीं हंसायेति पदं ततः ॥४२॥
स्वाहांतो मन्त्र एष स्यात् मोक्षधर्मादिदायकः ।
ऋषिश्शुकोस्य मन्त्रस्य गायत्री छन्द उच्यते ॥४३॥

हंसग्रीव हरिर्देव ओं बीजं शक्ति रीं ततः ।
स्वाहान्तो मन्त्र एषस्यात् मोक्षधर्मादिदायकः।।४४।।
तारं विनामन्त्रपदैः करन्यासं षडंगकम् ।
कुर्यात् ज्ञानगुणाद्यैस्च व्याप्यं तत् व्यापकं न्यसेत् ।।४५।।
इषुचक्रगदाशंखपद्मशार्गसिधारिणम् ।
हलपाशांकुशाग्निं च देवं खेटधरं विभुम् ।।४६।।
किरीटहारकेयूरकटकादिविभूषितम् ।
श्रीभूमिसहितं देवं हंसग्रीवं परात्परम् ।।४७।।
एवंद्यात्वा जपेन्मन्त्रं ज्ञानैश्वर्यादिसिद्धये ।।४८।।
क्माद्वक्ष्ये हंसमनुं षोडशाक्षरमुत्तमम् ।
ओं श्रीं ह्रीं तथा क्लीं च रां क्षां हूं क्ष्रीं रमोन्ततः ।।४९।।
हंसाय वह्निजायान्तो मन्त्रदेव अयं भवेत् ।
मन्त्रदेव समं मन्त्रं नास्ति सत्यं चतुर्मुख ।।५०।।
मुमुक्षूणां प्रपन्नानां यतीनां मोक्षसिद्धये ।
दीक्षितानां गृहस्थानां व्रतीनां ब्रह्मचारिणाम् ।।५१।।
धर्मकामार्थमोक्षादिदायकं ज्ञानदायकम् ।
श्रीदायकं मन्त्रदेवं वेदवेदान्तदायकम् ।।५२।।
ब्रह्मत्वदायकं सम्यक् मन्त्रमेकं चतुर्मुख ।।५३।।
ऋषि ब्रह्मास्य मन्त्रस्य गायत्री छन्द उच्यते ।
हंसग्रीव हरिर्देव ओं बीजं शक्ति रीं ततः ।।५४।।

करन्यासं षडंगं तु अक्षरद्वयकेन च ।
पंचस्थानेषु विन्यस्य शेषं मन्त्रेषु विन्यसेत् ।।५५।।
ज्ञानादि षड्गुणोपेतं कुर्यात् ज्ञानादिसिद्धये ।
चक्रपद्मगदाशंखचापखड्गादिधारिणम् ।।५६।।
वज्रादिहलशूलेषु पाशखेटधरं विभुम् ।।५७।।
शक्तिकुन्तधरं देवं सर्वाभरणभूषितम् ।

हंसमन्त्रजयन्त्यादि

ज्ञानानन्दमयं शांतं भजे हंसहरिं सदा ।।५८।।
एवं ध्यात्वा [illegible]न्मन्त्रं लक्षमेकं सदा मुने ।
जपेत् हंसं तु भक्त्या वै सहस्रं चतुरंगकैः ।।५९।।
तन्मन्त्रस्य भवेत् सिद्धिस्सत्यमेतत् चतुर्मुख ।।६०।।
वक्ष्येहं स जयन्तीं च सर्वेषां मुक्तिसिद्धये ।
उत्सवांतं समभ्यर्च्य द्विजाद्यश्च जपादिभिः ।।६१।।
भक्ष्यैरपूपैर्नैवेद्यैर्लाजैस्स्रक्चन्दनादिभिः ।
तथा कुर्यात् वैष्णवश्च [illegible]न्ते तु पारणम् ।।६२।।
काम्यार्थी प्रतिमादानं हंसग्रीवं तदा शुचिः ।
तद[illegible] लभेत् सर्वं कर्ता वांचितमुत्तमम् ।।६३।।
ज[illegible]ं उत्सवान्तं वै अन्नं गोमं[illegible]त्यजेत् ।
सर्वविष्णुजयन्तीषु तत्तन्मन्त्रेषु पूजयेत् ।।६४।।
अन्यदा यः [illegible]वं तस्यायुश्श्रीश्च नश्यति ।

कृते युगे तु प्रथमे सृष्ट्यादौ मासि एषके ॥६५॥
कृष्णपक्षे त्रयोदश्यां बुध्न्यृक्षे गुरुवासरे ।
हंसाकारावताराय संभवे मिथुन लक्नके ॥६६॥
सश्रीहरिस्तु भगवान् सृष्ट्यादौ च चतुर्मुख ॥६७॥
चतुर्मुखस्यप्रणवं दत्वा च हरिरोमिति ।
सर्वज्ञत्वं तदा दत्वा वैकुण्ठं प्रति निर्गतः ॥६८॥
स हंसरूपी भगवान् सृष्टिस्थित्यन्तकारकः ।
स एव परमात्मा च सदा देवपितामहः ।
तस्मात् सर्वप्रयत्नेन तमेवार्च्यन् जपेत् सदा ॥६९॥
दिव्ये सैद्धे स्वयंव्यक्ते मानुषे ग्रामपत्तने ।
तत्तत् स्थलादिवृद्ध्यर्थं जयायुष्येभिवृद्धये ॥७०॥
सर्वसस्याभिवृद्ध्यर्थं ज्ञानमोक्षादि वृद्धये ॥७१॥

हंसमालामन्त्रः

हंसमालामनुं वक्ष्ये क्रमादेव चतुर्मुख ।
ओं नमः पदमुच्चार्य ततो भगवतेति च ॥७२॥
हंसरूपाय चोद्धार्यं सर्वलोकाभिवृद्धये ।
सर्वज्ञत्वं ततो धार्यं सर्वस्य ऋषिमुत्तमम् ।
मे देहीति दापयेति स्वाहान्तं मनुमु[illegible]रेत् ॥७३॥
जपेदयुतमेतद्वै तन्मन्त्रफलसि[illegible]ये ।
यावज्जीवं त्रिवारं वा जपेत् ज्ञानादिसिद्धये ॥७४॥

इति संक्षेपतः प्रोक्तान् हंसमन्त्रान् सुसा[illegible]न् ।
यः पठेत् सहितां एतां श्रुणुयात् भक्तितोऽपि वा ॥७५॥
सर्वपापानि संत्यज्य देहान्ते मुक्तिमाप्नुयात् ।
काम्यार्थी लभते कामान् पुत्रार्थी पुत्रमाप्नुयात् ॥७६॥

इति श्रीपांचरात्रे पराशर संहितायां विशिष्टपरमधर्मशास्त्रे [illegible] ऋष्यादि न्यासहंसावतारकालोनाम षड्विंशोऽध्यायः

अथ सप्तविं[illegible]ोऽध्यायः

मत्स्यमन्त्रः

श्री[illegible]

अथ वक्ष्ये विधानेन श्रुणुष्व कमलासन ।
[illegible]रष्टमत्स्यमन्त्रांश्च मुक्त[illegible]न् शु[illegible] सात्विकान् ॥१॥
धान्तं मान्तं वह्नियुतं महामाया स बि[illegible]कम् ।
मत्स्यबीजं इदं मन्त्रं सर्वेषां मुक्तिदं भवेत् ॥२॥
यतीनां च [illegible]नां भुक्तिदं मुक्तिदं भवेत् ।
शत्रुक्षयकरं नृणां भूपतीनां च सर्वदा ॥३॥
ऋषिर्ब्रह्मास्य मन्त्रस्य गायत्री छन्द उच्यते ।
मत्स्य[illegible]ीव [illegible]रिर्देवो मं बीजं शक्ति रीं ततः ॥४।
ष[illegible]स्वरैस्तु करन्यासं षडंगं कारयेत् शुचिः ।

चक्रशंखधरं देवं सर्वाभरणसंयुतम् ।
मत्स्यग्रीवहरिं वन्दे श्रीभूनीळादिसंयुतम् ॥५॥
एवं ध्यात्वा जपेन्मन्त्रं लक्षमेकं प्रभातके ।
दशांशं जुहुयात् भक्त्या अपामार्गे घृताक्तकैः ॥६॥
सर्वशत्रुक्षयार्थं च परराज्य जयाय च ।
कर्पूरेण दशांशं वै तर्पयेत् चन्दनाम्भसा ॥७।
बिल्वपत्रैस्तु मोक्षार्थी तुळस्या चार्चयेत् हरिम् ।
विष्णुभक्तद्विजान् सम्यक् दशांशं भोजयेत् ततः ॥८॥

मत्स्यत्र्यक्षरमन्त्रः

मत्स्यस्य त्र्यक्षरमनुं क्रमात् वक्ष्ये चतुर्मुख ।
नमोन्तमीमिति ख्यातं जपेन्मन्त्र त्रयक्षरम् ॥९॥
अज्ञाननाशकं सम्यक् एतत् सौभाग्यदायकम् ।
मन्त्रस्यास्य ऋषिर्ब्रह्मा बृहती छन्द उच्यते ॥१०॥
मत्स्यग्रीवो देवता वै ओं बीजं शक्ति रीं ततः ।
तन्मन्त्रपदसंयुक्तं मत्स्यग्रीवमहं भजे ॥११॥
मनोश्चरणषट्केन [illegible]रुच्चार्य मनुं क्रमात् ।
करन्यासं षडंगं तु कुर्यात् ज्ञानगुणादिभिः ॥१२॥
शंखचक्रगदाशार्ङ्गपद्मबाणधरं विभुम् ।
सर्वालंकारसंयुक्तं मत्स्यग्रीवमहं भजे ॥१३॥
पौरश्चरणकं सर्वं मत्स्यैकाक्षरवत् भवेत् ।

क्रमाद्वक्ष्ये मूलमन्त्रं मत्स्याष्टाक्षरमुत्तमम् ॥१४॥
ओं नमो मीनरूपाय इति मन्त्रं चतुर्मुख ।
भवेन्मत्स्याष्टाक्षरं वै मुक्तिश्रीजयकारणम् ॥१५॥
ऋषिर्ब्रह्मास्यमन्त्रस्य गायत्री छन्द उच्यते ।
देवता भगवान् मत्स्य ओं बीजं शक्ति रीं ततः ॥१६॥
क्रमान्मन्त्रं द्विरुच्चार्य पदषट्कैर्द्विजास्सदा ।
करन्यासं षडंगं तु कुर्युर्ज्ञानगुणादिभिः ॥१७॥
चक्रशंखगदापद्म शाङ्‌र्गं बाणासिधारिणम् ।
विभुं खेटधरं देवं किरीटाद्यैरलंकृतम् ॥१८॥
श्रीवत्सकौस्तुभोरस्कं वनमालाविराजितम् ।
मत्स्यनारायणं वन्दे श्रीभूनीळाधिपं सदा ॥१९॥
दशाक्षरं मत्स्य मन्त्रं क्रमाद्वक्ष्ये चतुर्मुख ।
तारं मायां तथा श्रीं च मत्स्यरूपाय संयुतम् ॥२०॥
स्वाहांतं मन्त्रमेतत् स्यात् लक्ष्मीमोक्षादिदायकम् ।
ऋषिर्ब्रह्मास्य मन्त्रस्य त्रिष्टुप् छन्द उदाहृतम् ॥२१॥
मत्स्यग्रीवो हरिर्देव ओं बीजं शक्ति रीं ततः ।
प्रणवेन करन्यासं षडंगं षट्स्वरैर्न्यसेत् ॥२२॥
शाङ्‌र्गचक्रगदापद्म शंखबाणासिधारिणम् ।
शूलपद्मांकुशधरं मत्स्यग्रीवमहं भजे ॥२३॥
मत्स्यमन्त्रं क्रमाद्वक्ष्ये द्वादशाक्षरसंयुतम् ।

ओं मत्स्यरूपनारायणायस्वाहामनुस्तथा ॥२४॥
पूर्ववच्च करन्यासं कुर्यात् तद्वत् षडंगकम् ।
चक्रशंखगदापद्म शाङ्र्गबाणासिधारिणम् ॥२५॥
खेटवज्रांकुशधरं वह्निशूलधरं विभुम् ।
किरीटहारकेयूरकटकादि विभूषितम ॥२६॥
श्रीभूमिसहितं देवं मत्स्यग्रीवं हरिं भजे ।
क्रमाद्वक्ष्ये मत्स्यमन्त्रं षोडशाक्षरमुत्तमम् ॥२७॥
ओं क्लीं ह्लीं श्रीं क्षां मत्स्यरूपाय नारायणायस्वाहा ॥२८॥
प्रणवेन करन्यासं कुर्यात् देवे षडंगकम् ।
वराभयगदाचक्रशंखबाणधनुर्धरम् ॥२९॥
शूलखेटाम्बुजधरं वज्रपाशधरं विभुम् ।
श्रीभूनीळादिपं देवं अरिनाशनकारणम् ॥३०॥
मत्स्यग्रीवहरिं वन्दे भुक्तिमुक्तिप्रदायकम् ।
अष्टादशाक्षरं वक्ष्ये मत्स्यमन्त्रमनुक्रमात् ॥३१॥
मत्स्यग्रीवहरिं वन्दे भुक्तिमुक्तिप्रदायकम् ।
ओं -क्षां -रां-यं-रं-ह्लीं-क्लीं -मत्स्यरूपनारायणाय
स्वाहा ॥३२॥
न्यासहोमादिकं सर्वं मत्स्यैकाक्षरवत् भवेत् ॥३३॥
ओं नमो भगवते मत्स्यग्रीव नारायणाय यं– ह्लीं
जलम ्ध्यनावं रक्ष रक्ष शीघ्रं

ममेच्छास्थलं प्रति नय हुम्फट् स्वाहा ॥३४॥
तत्कार्येप्ययुतं भक्त्या मन्त्रं तत्र जपेत् बुधः ।
अग्निचक्रधरं देवं किरीटादि विभूषितम् ॥३५॥
मत्स्यग्रीव हरिं वन्दे सर्वमृत्युविनाशनम् ।
सर्वशत्रुक्षयकरं सदाशिवपितामहम् ॥३६॥
मत्स्यानुष्टुबमेतत् वै सदा सर्वफलप्रदम् ।
न्यासद्यानादिकं सर्वं मत्स्यैकाक्षरवत् भवेत् ॥३७॥
समुद्रयानवणिजस्तथा तत् फलसिद्धये ।
तद्बीम्बं स्थाप्य विधिवत् विहस्ताख्य विशेषतः ॥३८॥
ओं -रं-वं-ह्रीं- मं मत्स्यनारायणाय जलमध्यसारं स्तम्भय
स्तम्भय रं वं ठ ठ स्वाहा ॥३९॥
मन्त्रमेतत् जपेत् भक्त्या अयुतं ध्यान भेदतः ।
स्तम्भनार्थं ममेत्युक्त्वा शत्रुकार्ये तथैव च ॥४०॥
जलमध्ये नावं शीघ्रमुच्चाटयोच्चाटय हुम्फट् स्वाहा ।
तत्कार्यफलसिद्ध्यर्थं जपेत् पूर्वोक्त संख्यया ॥४१॥
ओं-ह्रीं -क्लीं ऐं -वौ - षट् -मं मत्स्यरूपनारायणाय
जलमध्यनावं शीघ्रं आकर्षय आकर्षय ॥४२॥
पूर्वोक्त संख्यया सम्यक् जपेत्तत्फलसिद्धये ।
ओं. ह्रीं-क्रीं-ऐं-श्रीं-यं-मं मत्स्यरूपनारायणाय
जलमध्यनातबं रक्ष रक्ष हुम्फट् स्वाहा ॥४३॥

जपेदयुतं एतत् वै फलस्यास्य सुसिद्धये ।
ओं -मं- रं- यं- क्षं मत्स्यरूपनारायणाय
सर्ववेदनाशकविदारणाय सर्ववेदनाशकान् भ्रामय भ्रामय
स्तम्बय स्तम्भय उच्चाटय उच्चाटय हुम्फट् ॥४४॥
जपेदयुतमादौ वा एतन्मन्त्रार्थसिद्धये ॥४५॥

इति श्रीपांचरात्रे पराशरसंहितायां विशिष्ठपरमधर्शास्त्रे मत्स्यमन्त्राणां ऋष्यादिन्यासो नाम सप्तविंशोऽध्यायः

अथ अष्टाविंशोऽध्यायः

हयग्रीवैकाक्षरी

अथोच्यन्ते विशेषेण क्रमात् द्वादशसंख्यया ।
हयग्रीवमहामन्त्रा विद्यामोक्षप्रदायकाः ॥१॥
शान्तं हान्तं समुद्धृत्य प्रणवान्तं सबिन्दुकम् ।
एकाक्षरं हयग्रीवं एतत् ज्ञानादिदायकम् ॥२॥
षट्स्वरैस्तु करन्यासं कुर्यादेव षडंगकम् ।
व्याप्यं तत् व्यापकं चैव तन्मन्त्रेणैव कारयेत् ॥३॥
एकाक्षरहयग्रीवं दृष्ट्वा पूर्वोक्तमादरात् ।
पौरश्चरणहोमादि कुर्यात्तन्मन्त्रसिद्धये ॥४॥

हयग्रीवत्र्यक्षरी

क्रमाद्वक्ष्ये विधानेन हयग्रीवत्र्यक्षरम् ।
महामायां हौं ह्रीं च भवेदेतत् त्र्यक्षरम् ।
ज्ञानैश्वर्यकरं शांतं सर्वेषां मुक्तिदायकम् ॥५॥
करन्यासं षडंगं तु कुर्यान्मन्त्राक्षरत्रयैः ।
हयग्रीवमहं वन्दे चक्रपद्मधरं विभुम् ॥६॥
श्रीभूमिसहितं देवं सर्वाभरणभूषितम् ।
लक्षमेकं जपेत् भक्त्या ए[illegible]न्मन्त्रा[illegible]सिद्धये ॥७॥

हयग्रीवषडक्षरम्

[illegible]पूजनादिकं सर्वं एकाक्ष[illegible]चरेत् ।
वक्ष्ये तद्वत् क्रमेणैव हयग्रीव षडक्षरम् ॥८॥
ओं-हं-सां-हुं-षट्-स्वाहेति उद्धरेत् [illegible]न्त्रमुत्तमम् ।
[illegible]नमोक्षप्रदं नृणां [illegible]विजयप्रदम् ॥९॥
[illegible]णवेन करन्यासं षडंगं षड्[illegible]त् ।
चक्रशंखगदापद्मज्ञानपुस्तकधारिणम् ॥१०॥
हयगारीवमहं वन्दे किरीटादि विभूषितम् ।
पौरश्चरणहोमादीन् एकाक्षरवदाचरेत् ॥११॥

हयग्रीव अष्टाक्षरी

अष्ठाक्षरं हयग्रीवं क्रमाद्वक्ष्ये [illegible]तुर्मुख ।

ओं हयग्रीवाय नम इति इदमष्टाक्षरं भवेत् ॥१२॥
हयग्रीवमिदं शान्तं मोक्षश्रीज्ञानदायकम् ।
प्रणवेन करन्यासं षडंगं षड्स्वरैर्न्यसेत् ॥१३॥
शंखचक्रगदापद्म ज्ञा[illegible]रिणम् ।
पाशांकुशधरं देवं हयग्रीवमहं भजे ॥१४॥

हयग्रीव दशाक्षरी

पूजनार्चादिकं सर्वं तदेकाक्षरवत् भवेत् ।
दशाक्षरं हयग्रीवं वक्ष्ये तद्वत् क्रमेण च ॥१५॥
ओं ह्रीं ह्लौं हयग्रीवाय स्वाहा इति मन्त्रं समुद्धरेत् ॥१६॥
दशाक्षरहयग्रीवमेतत् विद्या प्रदायकम् ।
प्रणवेन करन्यासं षडंगं षडस्वरैर्न्यसेत् ॥१७॥
चक्रशंखगदापद्मपाशशाङ्र्गासिधारिणम् ।
ज्ञानादि पुस्तकधरं ह[illegible]ननमहं भजे ॥१८॥
पौरश्चरण होमादीन् एकाक्षरवदाचरेत् ।

हयग्रीव[illegible]दशाक्षरी

हयग्रीवाख्यममलं वक्ष्ये तत् द्वादशक्षरम् ॥१९॥
ओं नमो भगवते हयग्रीवाय मनुर्भवेत् ।
हयग्रीवमनुं शान्तं विद्यैश्वर्या[illegible]यकम् ॥२०॥
[illegible]

पूजाहोमादिकं सर्वं एकाक्षरव..ाचरेत् ॥२१॥
शंखचक्रगदापद्म ज्ञानपुस्तकधारिणम् ।
पाशांकुशा...वज्रादि खेटकुन्तधरं विभुम् ॥२२॥
श्रीभूनीळाधिपं देवं वनमालाविराजितम् ।
हयग्रीवं भजे नित्यं सर्वाभरणभूषितम् ॥२३॥

हयग्रीवानुष्टुप्

वक्ष्ये चानुष्टुभं शांतं ...यग्रीवमनुत्तमम् ।
भुक्तिमुक्तिप्रदं सम्यक् सर्वविद्याप्रदायकम् ॥२४॥
...नुस्सामरूपाय वेदाहरणकर्मणे ।
...गीथवपुषे महाश्वशिरसे नमः ॥२५॥
उद्गीथ प्रणवोद्गीथ सर्ववागीश्वरेश्वर ।
सर्ववेदमयाचिन्त्य सर्वं बोधय बोधय ॥२६॥
पदैरर्थैः करन्यासं कुर्यादेव षडंगकम् ।
अनुष्टुभद्वयं चैव ज्ञानाद्यैश्च तथा भवेत् ॥२७॥
...नार्चनादिकं सर्वं एका...ाचरेत् ।
ओं-ह्लौं - ह्रीं - श्रीं ऐं श्रीहयग्रीव मम सर्वविद्यां दापय
दापय ।
त...बुद्धिं हन हन ॥२८॥
अ...नादीन् नाशय नाशय सर्वव...शास्त्रादिषु
सर्वज्ञत्वं दापाय दापय अणि...दीन् तत् षट्स्वाहा॥२९॥

एतन्मन्त्रार्थसिद्ध्यर्थं जपेदयुतमादरात् ।।३०।।
ओं-ह्रीं हयग्रीवाय यं रं परवादिविद्यां
परवादिजिह्वास्तम्भं कुरुकुरुहुम्फट् स्वाहा ।
जपेत् अयुतमेतत् वै तन्मन्त्रफलसिद्धये ।।३१।।
ओं-ह्रीं -ष्ट्रां हयग्रीवाय परवादिसर्ववेदशास्त्र-
सर्वविद्यामाकर्ष्याकर्ष्य ह्लौं -क्षौं वौ षट् ।।३२।।
ओं -ष्ट्रां श्रीं -क्षां -हयग्रीवनरसिंहाय- यं-रं- सर्वशत्रून्
स्तम्भय स्तम्भय भ्रामय भ्रामय हुम्फट्- एतन्मन्त्रार्थ
सिद्ध्यर्थं जपेदयुतमादरात् ।।३३।।

इति श्रीपांचरात्रे पराशरसंहितायां विशिष्टपरमधर्मशास्त्रे हयग्रीवमन्त्राणां ऋष्यादिध्यानं नाम अष्टाविंशोऽध्यायः

अथ एकोनत्रिंशोऽध्यायः

कूर्म मन्त्रः

अथ वक्ष्ये विधानेन कूर्ममन्त्रांश्च षट्क्रमात् ।
स्वाहान्तं इन्द्रसम्युक्तं षट्पदैश्च समन्वितम् ।।१।।
वन्हिकाबिन्दुसम्युक्तं कूर्मबीजं इदं भवेत्।
सर्वसिद्धिकरं शान्तं मोक्षैश्वर्यादिदायकम् ।।२।।
ऋषिर्ब्रह्मास्य मन्त्रस्य गायत्री छन्द उच्यते ।
श्रीकूर्मो देवता चैव नं बीजं शक्ति रीं ततः ।।३।।

षड्पदैस्तु करन्यासं कुर्यादेव षडंगकम् ।
शंखचक्रधरं देवं चन्द्रमण्डलमध्यगम् ॥४॥
श्रीभूमिसहितं देवं किरीटादिविभूषितम् ।
श्रीवत्सकौस्तुभोरस्कं वनमालाविराजितम् ॥५॥
गदापद्मधरं शान्तं कूर्मग्रीवं अहं भजे ।
लक्षमेकं जपेत् भक्त्या प्रतिष्ठादिषु कर्मसु ॥६॥
जुहुयात् गोघृतेनैव दशाम्शं तर्पणादिकम् ।
कुर्यात्तदंगहीने तु षड्गुणं जपमाचरेत् ॥७॥
मन्त्रेण द्रव्यहीने तु विष्णुमन्त्रेप्ययं विधिः ।
मूलादि मन्त्रसिद्ध्यर्थं नित्यमेव चतुर्मुख ॥८॥
क्रमात् वक्ष्ये विशेषेण कूर्माष्टाक्षरमुत्तमम् ।
ओं-ह्रीं-कूर्मान्तमनूमद्धरेत् ॥९॥
प्रणवेन करन्यासं कुर्यादेव षडंगकम् ।
अन्यत् होमादिकं सर्वं कूर्मैकाक्षरवत् भवेत् ॥१०॥
चक्रशंखाभयवर गदापद्मादि धारिणम् ।
शाङ्र्ग[illegible]ग्नि शूलपाशधरं विभुम् ॥११॥
किरीटादिधरं शान्तं परशुं मुसलं हलम् ।
कूर्म[illegible]ीवमहं वन्दे चन्द्रमण्डलमध्यगम् ॥१२॥
अन्यत् होमादिकं सर्वं कूर्मैकाक्षरवत् भवेत् ।
कूर्ममाला मनुं वक्ष्ये क्रमात्तत् फलसिद्धये ॥१३॥

ओं-ह्रीं-क्रूं-कूर्मरूपाय मम वंशमुद्धारय राज्य गोभूधनादीन् दापय दापय ह्रीं हुम्फटस्वाहा ।।

तन्मन्त्रफलसिद्ध्यर्थं जपेत् अयुतं आदरात् ।।१४।।

ओं-क्ष्रौं ह्रीं-क्लूं - कूर्मरूपाय ब्रह्मेन्द्रादिरक्षकाय सर्वशत्रून् भ्रामय भ्रामय संहर संहर उच्चाटय उच्चाटय बन्धय बन्धय ह्रीं- क्षौं हुम्फट स्वाहा ।

तन्मन्त्रार्थसिद्ध्यर्थं जपेत् अयुतं आदरात् ।।१५।।

इति श्रीपांचरात्रे पराशरसंहितायां परमधर्मशास्त्रे
कूर्ममन्त्राणां ऋष्यादिध्यानवर्णन्नाम
एकोनत्रिंशोऽध्यायः

अथ त्रिंशोऽध्यायः

श्रीवराहमन्त्रः

श्रीभगवानुवाच

श्रीवराहमहामन्त्रं क्रमात् वक्ष्येऽथ षोडश ।
सान्तं बिन्दुसमायुक्तं पंचमस्वरसंयुतम् ।।१।।
वराहं बीजमित्युक्तं लक्ष्मीधनधराप्रदम् ।
ऋषिर्ब्रह्मास्य मन्त्रस्य गायत्री छन्द उच्यते ।।२।।
श्रीवराहो देवता वै हं बीजं शक्ति रीं ततः

षट्पदैस्तु करन्यासं कुर्यादेव षडंगकम् ।।३।।
चक्रशंखगदापद्मधरं लक्ष्मीधरापतिम् ।
श्रीवराहमहं वन्दे किरीटादि विभूषितम् ।।४।।
घृताक्तं जुहुयान्मन्त्री अपामार्गं च माक्षिकम् ।
लवंगं जुहुयान्मन्त्री भ्रष्टैश्वर्यादिसिद्धये ।।५।।
सर्वसिद्धावपामार्गं खादिरं च विशेषतः ।
लक्षमेकं जपित्वा तु तर्पयेत् चन्दनाम्भसा ।।६।।
कर्पूरमृगनाभ्याद्यैधूपाद्यगरुपूतिभिः ।
अर्चयेत् देवदेवं वै विष्णुधर्मादिसिद्धये ।।७।।
यतिः कुर्यात् विशेषेण देवविप्रादिरक्षणं ।
वराहमन्त्रसदृशं नास्ति सत्यं चतुर्मुख ।।८।।

वराहाष्टाक्षरी

अष्टाक्षरवराहं वै क्रमात् वक्ष्ये विशेषतः ।
ओं-हुं-वराहाय नम इति मन्त्रं समुद्धरेत् ।।९।।
षड्पदैस्तु करन्यासं कुर्यादेव षडंगकम् ।
चक्रशंखगदापद्मधनुर्भाणासिधारिणम् ।।१०।।
वज्रायुध धरं देवं वन्दे वाराहरूपिणम् ।
होमार्चनादिकं सर्वं एकाक्षरवदाचरेत् ।।११।।

वराहदशाक्षरी

वक्ष्ये वराहमन्त्रं वै दशाक्षरमनुत्तमम् ।
ओं-हुं आदिवराहाय स्वाहेति मन्त्रमुद्धरेत् ॥१२॥
चक्रशंखाभयवरफणिवालाग्रधारिणम् ।
श्रीमदादिवराहं तं देवं जानुधरं विभुम् ॥१३॥
बजे भूमिधरं वन्दे फणमूर्ध्नि स्थितं हरिम् ।
वराहं श्रीनिकेशाद्यं किरीटादि विभूषितम् ॥१४॥
प्रणवेन करन्यासं षडंगं षट्पदैर्न्यसेत् ।
होमार्चनादिकं सर्वं एकाक्षरवदाचरेत् ॥१५॥

वराहद्वादशाक्षरी

अथोच्यते विशेषेण वाराहद्वादशक्षरम् ।
ओं-हुं- नमो भगवते वराहायेति चोच्चरेत् ॥१६॥
प्रणवेन करन्यासं षडंगं षट्पदैर्न्यसेत् ।
शंखचक्रगदापद्म धनुर्बाणासिधारिणम् ॥१७॥
शूलखड्गाग्निखेटादि पाशांकुशधरं विभुम् ।
सदावराभय हलधरं नीलोत्पलप्रभम् ॥१८॥
वन्दे वराहमीशं तं सर्वाभरणभूषितम् ।
न्यासहोमादिकं सर्वं एकाक्षरवदाचरेत् ॥१९॥

वराह षोडशाक्षरी

अतोच्यते विधानेन वराहं षोडशाक्षरम् ।
ओं- ह्रीं - श्रीं - क्लीं -क्ष्रौं -रां -वं-हुं-यज्ञवराहाय
स्वाहा ॥२०॥

प्रणवेन करन्यासं षडंगं षट्पदैर्न्यसेत् ।
चतुश्चक्रधरं देवं किरीटादिविभूषितम् ॥
वराहनरसिंहं तं भजे राज्यजयप्रदम् ।
होमार्चनादिकं सर्वं एकाक्षरवराहवत् ॥२१॥

वराहत्रयस्त्रिंशाक्षरी

त्रयस्त्रिंशाक्षरं वक्ष्ये वाराहं भूप्रदं शुभम् ।
ओं नमो भगवते वराहरूपाय भूर्भूवस्वःपतये भूपतित्वं मे
देहि दापय स्वाहा ॥२२॥
प्रणवेन करन्यासं षडंगं षट्पदैर्न्यसेत् ।
शंखचक्रधरं देवं किरीटादिविभूषितम् ।
बूवराहमहं वन्दे श्रीभूमिसहितं विभुम् ॥२३॥
ऋषिन्यासादिकं होमं एकाक्षरवराहवत् ॥२४॥

वाराहानुष्टुप्

वाराहानुष्टुभं तद्वत् वक्ष्येसर्वार्थसिद्धये ।
भूवराहमहोत्साह सर्वशत्रुविनाशन ।

शत्रून् संहर मां रक्ष श्रियं दापय देहि मे ॥२५॥
प्रणवेन करन्यासं षडंगं षट्पदैर्न्यसेत् ।
गदाचक्रधरं देवं सर्वाभरणभूषितम् ।
श्रीभूनीळाधिपं देवं भूवराहं अहं भजे ॥२६॥
ओं-हुं-वं-रं-भं-बूवराहाय नम देहपुष्टिं कुरु करु
सर्वावयवपूर्तीं कुरु कुरु स्वाहा ॥२७॥
मालामन्त्रादिकं चैतत् जपेन्दयुतमादरात् ।
होमन्यासादिकं सर्वं एकाक्षरवराहवत् ॥२८॥
हुं वराहायफट्-प्रणवेन करन्यासं षडंगं षड्पदैर्न्यसेत् ।
अग्निचक्रधरं देवं सर्वाभरणभूषितम् ॥२९॥
ध्यायेत् वराहग्रीवं तं भयरोगार्ति नाशनम् ।
ऋषिन्यासादिकं सर्वं एकाक्षरवराहवत् ॥३०॥
वराहमालामन्त्रं च वक्ष्ये सम्यक् चतुर्मुख ।
ओं हुं आदिवराहाय सर्वजनान् भ्रामय भ्रामय ।
मम वशं कुरु कुरु स्वाहा ॥३१॥
जपेन्दयुतमेतत् वै तन्मन्त्रफलसिद्धये ।
ओं-हुं यज्ञवराहाय नम अष्टैश्वर्यं कर्षय कर्षय ह्रीं
-श्रीं-हुं फट् स्वाहा ॥३२॥
तन्मन्त्रफलसिद्ध्यर्थं जपेदयुतमदरात् ।
नारसिंहाय प्रस्वेदाः परवादीन् परकृत्यान्

स्तम्भय स्तम्भय हुंफट् स्वाहा ।

जपेदयुतमेतत् वै तन्मन्त्रफलसिद्धये ॥३३॥

ओं- हुं-क्लीं-हीं वराहरूपाय सुदर्शनाय सर्वदुष्टान् अन्योन्य

विद्वेषिणं कुरु कुरु हुम्फट् स्वाहा ॥३४॥

हुं- बं -हुं- यं- रां- उग्रवराहरूपाय मम सर्वशत्रून् उच्चाटय

उच्चाटय हुम्फट् ॥ ३५॥

बं-वं-रं-बं यज्ञवराहाय मम सर्वपापान् नाशय नाशय ।

सर्वरोगान् उच्चाटय उच्चाटय ओं हुम्फट् स्वाहा ॥३६॥

बं-हुं-वं-रं-ठं-बं-हीं भूवराहाय ममदेहपुष्टिं कुरु कुरु

सर्वावयवपूर्तिं कुरु कुरु स्वाहा ॥३७॥

मालामन्त्रादिकं सर्वं जपेदयुतमादरात् ॥

इति श्रीपांचरात्रे पराशरसंहितायां विशिष्टपरमधर्मशास्त्रे श्रीवराहमन्त्राणां ऋष्यादि ध्यानं नाम त्रिंशोऽध्यायः

अथ एकत्रिंशोऽध्यायः

नृसिंहमन्त्रः

श्रीपराशर उवाच

अथ वक्ष्ये विशेषेण भुक्तिमुक्त्यर्थं आदरात् ।

नारसिंहमहामन्त्रं चतुराशिः क्रमात्ततः ॥१॥

ब्रह्म शान्तं वह्नियुतं प्रणवान्तं सबिन्दुकम् ।

नृसिंहैकाक्षरं चैतन्मोक्षधर्मादि दायकम् ।।२।।
सर्वशत्रुक्षयकरं सर्वबन्धक्षयं भवेत् ।
ऋषिर्ब्रह्मास्य मन्त्रस्य गायत्री छन्द उच्यते ।।३।।
ज्वालानृसिंहदेवं तु क्षं बीजं शक्तिरीं ततः ।
श्रीं कीलकं हीं कवचं रं अस्त्रमिति चोच्यते ।।४।।
षट्पदैस्तु करन्यासं षडंगं षट्पदैर्न्यसेत् ।
व्याप्यं तत् व्यापकं चैव तन्मन्त्रेणैव कारयेत् ।।५।।
चक्रमुद्रां प्रदर्श्याथ जपध्यानादिकं चरेत् ।
रहस्यमन्यत् वक्ष्यामि महामृत्युजयं हरिम् ।।६।।
कालरुद्रात्मकं घोरं नृसिंहं दैत्यमर्दनम् ।
पंचवक्त्रं महाभीमं कालानलसमप्रभम् ।।७।।
आन्द्रमालाधरं रौद्रं कण्टहारेण शोभितम् ।
स्वर्णयज्ञोपवीतं च पंचाननसुशोभितम् ।।८।।
चन्द्रमौलिं नीलकण्ठप्रतिवक्त्रं त्रिलोचनम् ।।
भुजैः परिघसंकाशैः दशभिश्चोपशोभितम ।।९।।
अक्षसूत्रं गदापद्म शंखं गोक्षीरसन्निभम् ।
धनुश्च मुसलं चैव तथा चक्रेण मर्दनम् ।।१०।।
खड्गत्रिशूलबाणं च नृहरिं घोररूपिणम् ।
चन्द्रांजनसुवर्णाभं इ[illegible]गोरौचनानिभम् ।।११।।
नरवीरं हरिं ध्यायेत् सर्वविघ्नोपशान्तये ।

उद्यत् भास्वत् सहस्त्रप्रभं अशनिनिभं त्रिक्षणैर्दृष्टिमन्तं
वह्निज्वालाय

विद्युत्ततिविततसटाभिषणम् भूषणैश्च दिव्यैरादीप्तदेहं
निशितनखलसत् पाहुदण्डैरनेकैः

स्सम्भिन्नच्छिन् दैत्येश्वर तनुमतनुं नारसिंहं नमामि ॥१२-१३॥

लक्षमेकं जपेत् भक्त्या तन्मन्त्रफलसिद्धये ।
अपामार्गात् गोघृतेन हुनेत् सर्वार्थसिद्धये ॥१४॥

धूपतैलेन कर्पूर कुंकुमागरुसंयुतम् ।
दशांशं तर्पयेत् बक्त्या पूजयेत् बिल्वपत्रकैः ॥१५॥

कमलैः पंकजैर्जाति मल्लिकैश्शतपत्रकैः ।
सुगंधैस्तुळसीपत्रैर्भोजयेत् वैष्णवान् ततः ॥१६॥

नानाविधरसोपेतैःरपूपैर्घृतपायसैः ।
प्रयोजयेदिमं मन्त्रं विष्णुधर्मादिसिद्धये ॥१७॥

गोब्राह्मणहितार्थाय दयाधर्मनृपाय च ।
गुरुधर्मादिरक्षार्थं स्वमतस्थापनाय च ॥१८॥

कुर्यात् यतिश्च सततं विष्णुस्थापनहेतवे ।
विष्णुभक्तप्रतिष्ठार्थं विष्णुपूजाभिवृद्धये ॥१९॥

नृसिंहचक्रराजादि केशवान्तं तथाब्जज ।
रामकृष्णादिसन्मन्त्रान् ब्रह्मचारी गृही तथा॥२०॥

प्रपन्नः परमैकान्ती वानप्रस्थ यतिस्तथा ।
सर्वसंगपरित्यागी तन्मन्त्रान् वै प्रयोजयेत् ॥२१॥

जोतिष्टोमादिमध्ये तत्सन्ध्योपासनवत्तदा ।
मन्निमित्तकृतं पापं अपि धर्माय कल्पते ॥२२॥

नृसिंहानुष्टुप्

क्रमात् वक्ष्ये मन्त्रराजं नृसिंहानुष्टुभं परम् ।
नृसिंहमन्त्रनिष्ठानां प्रपन्नानां विशेषतः ॥२३॥
मुमुक्षूणां सदाचारं परमैकान्तीनां तथा ।
अन्नशुद्ध्यादिकं सम्यक् पङ्क्तिपाकादिभेदकम् ॥२४॥
यतीनां तु विशेषेण वक्ष्ये तन्मन्त्रसिद्धये ।
विष्णुसायुज्यसिद्ध्यर्थं वक्ष्ये आचारलक्षणम् ॥२५॥
प्रातस्स्नात्वा च विधिवत् मुमुक्षुर्मन्त्रसाधकः ।
कृत्वा सन्ध्यादिकं सर्वं अनेनैव सदा द्विजः ॥२६॥
जप्त्वा यथोक्तं गायत्रीं पश्चात् सौदर्शनं जपेत् ।
सुदर्शननृसिंहं च मन्त्रराजमनुत्तमम् ॥२७॥
सत्यं जपान्तपर्यन्तं चण्डाळान् नावलोकयेत् ।
अम्बष्टरजकम्ले[illegible] किरातान् नावलोकयेत् ॥२८॥
शूद्रसम्भाषणं सम्यक् क्षुद्रसम्भाषणं तथा ।
त्यजेत् प्रपन्न[illegible]तं जपहोमादिकर्मसु ॥२९॥
कृत्वास्नानं सुविधिवत् चण्डाळम्लेच्छदर्शने ।
शूद्रसंभाषणे चैव प्रत्यहं वै चतुर्मु[illegible] ॥३०॥
सुदर्शन[illegible]सिंहस्य मन्त्रशीलस्य सर्वदा ।

एतदाचारममलं वैधं स्यात् सर्वदा तथा ॥३१॥
शूद्रसम्भाषणाच्चैव चण्डालादेश्च दर्शनात् ।
सुदर्शननृसिंहस्य मन्त्रराजस्य तत्फलम् ॥३२॥
मूलमन्त्रस्य तद्वच्च गायत्रीफलमुत्तमम् ।
मन्त्ररत्नफलं तद्वत् नाप्नोत्येव चतुर्मुख ॥३३॥
प्रपन्नानां मुमुक्षूणां परमैकान्तिनां सदा ।
विष्णुसायुज्यसिद्ध्यर्थं देहज्ञानसिद्धये ॥
अन्यथा येनुशिष्यन्ति ते यान्ति नरकं ध्रुवम् ॥

इति श्रीपांचरात्रे पराशरसंहितायां विशिष्टपरमधर्मशास्त्रे नृसिंहमन्त्रस्य ऋष्यादिध्यानं नाम एकत्रिंशोऽध्यायः

श्रीमते रामानुजाय नमः